Calcutta
655a

चतुष्टङ्कार्घं

श्रीमदानन्दरामबड्डुयाप्रकाशितं

तत्कृतजानकीरामभाष्योद्भासितं

महाकविभवभूतिविरचितं

महावीरचरितम्।

MAHAVIRACHARITA

OF

BHAVABHUTI

EDITED BY

ANUNDORAM BOROOAH, B.A.; B.C.S.;

WITH A SANSKRIT COMMENTARY
AND A SANSKRIT-ENGLISH GLOSSARY.

Calcutta: KHETROMOHAN MUKHERJEA,
49, *Mechua Bazar Road.*

London: TRUBNER & Co.

1877.

All Rights Reserved.

2 rupees 8 annas

Digitized by Google

Collated

चतुष्कार्षं

श्रीमदानन्दरामवङुयाप्रकाशितं

तत्कृतजानकीरामभाष्योद्भासितं

महाकविभवभूतिविरचितं

महावीरचरितम्।

MAHAVIRACHARITA

OF

BHAVABHUTI

EDITED BY

ANUNDORAM BOROOAH, B.A. ; B.C.S. ;

WITH A SANSKRIT COMMENTARY

AND A SANSKRIT ENGLISH-GLOSSARY.

Calcutta : KHETROMOHAN MUKHERJEA,
49, *Mechua Bazar Road.*

London : TRUBNER & Co.

1877.

All Rights Reserved.

Digitized by Google

IndL 736.2.25

HARVARD COLLEGE LIBRARY
CHARLES ... LEE LAMMAN
MARCH 15, 1941

CALCUTTA :
PRINTED BY KHETROMOHAN MUKHERJEA AT THE SARASWATI PRESS.

F

Digitized by Google

PREFACE.

The Viracharita of Bhavabhuti was first published by Francis Henry Trithen in London in 1848. It was followed in 1857 by the Calcutta edition of Taranatha Tarkavachaspati, which has been reprinted by his son. None of these editions is accompanied with a commentary or translation of the *prakrita* passages, which are absolutely necessary for the elucidation of the text. I have, therefore, thought proper to issue this edition to remove a want much felt by, I believe, all students of Sanskrit.

2. I am principally indebted to these two editions for the text of this play. I have, however, consulted the principal rhetorical works—the Dasarupa—the Kavyaprakasha—the Sahitya Darpana—the Sarasvati Kanthabharana and the important readings found in them have been all given in this edition. I also consulted at one time the manuscript,* which used to be in the Calcutta Sanskrit College Library and I am indebted to it for some of the readings of the sixth act.

3. In the *prakrita* portion, I have generally followed the English edition, which mostly agrees with the rules of Vararuchi. But I have printed ऋ for ष, except where it changes into a vowal in the modern dialects or some of them, in which case its *prakrita* representative is ऋ and not ऋ. For instance, I print रि for ऋषि because the modern dialects derive सी

*I am sorry I could not procure any manuscript when I set to edit this work. The learned Principal of the Sanskrit College wrote back to me that he had no manuscript in the College. The Asiatic Society of Bengal does not possess any. My attempts in other quarters have been all unsuccessful.

Digitized by Google

from it. The view of Professor Cowell* is different. The Sutra of Hema Chandra quoted by him, however, quite bears out my remark, for चलात् the instance given there becomes चाल in Bengali.

4. As a rule, I have not ventured to correct the text in any place. But where there are obvious mistakes, probably owing to the copyists, I have been obliged to substitute more rational readings, giving almost always the reasons for the changes. For instance, at page 281 line 8 the other editions read उत्तमपुरुषपदक्षाङ्कितो मध्यमलोकः. This, so far as I can see, is an obvious mistake, first because the divine car is just before said to go up from the "middle world" to cross the Ghats and secondly because the earth is not "the world marked by the step of the Supreme Spirit." It will also be seen from what follows that the car is passing through the skies and not over the earth.

5. So far as I am aware there is no ancient commentary on this play. Tarkavachaspati in the preface to his edition, says "many portions of this work are obscure and I have not ventured to write notes to them." I think there can be no greater mistake than the view inculcated in this passage. Truth can generally be attained only by many unsuccessful attempts and we must not desist from attempting, simply because our attempts may be futile. I have therefore, added a complete commentary to the text, feeling sure that my readers will look with great indulgence on the mistakes they may come across.

6. In preparing this commentary, I have consulted the short notes appended to Tarkavachaspati's edition, although I can not say that I generally agree with him. Tarkavachaspati is a great Sanskrit Scholar, deeply read in its grammatical and lexicographical literature. He sees every thing with

*Preface to Prakrita Prakasha, page XIV.

Digitized by Google

an erudite eye and gives learned explanations of what he considers difficult. For instance he explains गोदान (1. 199.) as *hair-cutting*. I have preferred its simple meaning and quoted a passage of the Ramayana in support of my view. Even in the Grihya Sutras of Asvalayana, which, however,* appears to me to be a much later work than the Ramayana or the Dharma Sanhitas, the present of a *cow-couple* is noted as an essential condition (गोमिथुनं दक्षिणा) of the ceremony.

7. I have also freely consulted the published commentaries on the author's other two works and have derived some assistance from them. But I regret to say that none of them seems to have been written after a careful comparison of the text of all the three plays of the author. I think many a difference of opinion would subside if this method is pursued and attempt made to interpret not simply intelligibly, but also according to the ideas of the author and the meanings attached by him.

8. I give an illustration. Vidyasagara in explaining Uttaracharita IV. 19., evidently connects धत्ते with भयं of the preceding reply. There are various objections to this interpretation. First of all, Bhavabhuti is one of those writers whose construction never presents any ambiguity and it is unkind to make him unnecessarily responsible for a bad and obscure construction. Secondly it is very doubtful whether Sanskrit ever admits of such a sentence as भयमुरो धत्ते. But the best

*The simple fact of aphoristic style cannot make it an ancient work. We have *Sutras* by Bopadeva, *Sutras* by Purushottama, *Sutras* even by living Pundits. But the language of Asvaláyana differs, in its arrangement, extremely from old *Sutras* and he omits altogether ancient Aryan practices repulsive to modern Hindu Ideas—practices alluded to by Bhavabhuti and described in the older Sanhitas.

Digitized by Google

proof is to be found in Vi. 1. .17., which is the same verse, but being applied to two persons, यत्ते cannot agree with the dual चूर्णौ. My interpretation will be found under that verse.

9. The commentaries of Jagaddhara and Malanka mentioned by Wilson* I have not seen, but they appear to have been freely used in Kailash Chandra Dutt's edition of the Malatí Madhava, although without acknowledgment. I have, therefore thought useless to consult them, specially as their explanations do not often commend to me. For instance, I cannot agree with their interpretations of चरचगुरव: (p. 4. l. 3.). One of the commentators makes it mean "*disciples of Charana*" which is first of all a mere guess, as there is no authority that charana was a teacher and secondly absurd as the whole family could not have had the same teacher for generations. The other makes it mean "*great by metres.*" What this means I do not understand. I should like to know whether चरच is ever used in the sense of metre. Wilson connects तैत्तिरीयिक: with चरचगुरव: and translates "followers of the Tittiri portion of the Vedas *according to the teacher Charana.*"† His meaning is intelligible, but not deducible from the Sanskrit. तैत्तिरीयिक: and चरचगुरव: are different compounds and one cannot be merged in the other.

10. The simple meaning that चरच is the same as आचरच does not appear to have crossed the minds of any of these writers, ‡ although every one of them must have known that

---

*Vidyasagara also mentions a short commentary on the Uttara Charita by Narayana Bhatta of Benares, a copy of which is said to be in the Sanskrit College Library. Vidyasagara's remarks on it are not favorable.

† Hindu Theatre 3rd. edition, vol. II. page 11.

‡ I am glad to say this meaning appears also to have the sanction of our Vidyasagara. See the last sentence in the 5th. para of his preface to Uttara Charita first edition.

Digitized by Google

the verb चर् is often used in that sense. As I understand, it means that the family of Bhavabhuti was not only "versed in the Taittiriya Veda," but also "great in the observance (of Vedic rites)."*

11. I have also consulted the other available plays on the History of Rama and have derived much aid from them. The passages I have quoted from them are often as much to show the true force of words as to shew how much they owe to the father of Ramaic drama.

12. Besides explaining the text, I have spared no labour to clear up all the allusions in it, which are probably as many as in any other Sanskrit play. With reference to कालप्रियनाथ (p. 2. l. 3.) Wilson observes :—"who this deity is, is not known to the Pundits of the present day. Malanka takes no notice of the name ; Jagaddhara is content to say it is that of a sort of divinity worshipped in that country. It is probably the appellation of a Siva-Linga."† Vidyasagara agrees with Jagaddhara, ‡ without quoting any authority for the statement. That it is a mere guess, Vidyasagara will probably admit. That it is an unsound guess will appear from a careful study of the whole passage in the play. If Kalapriyanatha was an idol at Padmapura, the play was acted at Padmapura, and the author would have not said a few lines below "there is a city

---

*In making the above remarks, it must not be supposed that I think lightly of the learning and labours of any of these Sanskritists. I have derived much aid from their writings and I freely acknowledge it. Yet we should fearlessly express our opinions when we differ from them. If they are wrong, they are likely to strengthen the basis of the opposite opinions.

† Hindoo Theatre, vol. II. page 10.

‡ "कालप्रियनाथो नाम विदर्भेषु पद्मनगरे प्रतिष्ठितो देवमूर्त्तिविशेषः" U. C. page 2.

Digitized by Google

named Padmapura in the south." To me it is clear from this line that Kalapriyanatha was not at Padmapura and was not in the Deccan.

13. Wilson's guess appears to me to be correct and I consider it to be the same as the celebrated Mahàkála of Ujjayini. In addition to the arguments adduced in note 1. 4., I may add that the following line occurs in the Bala Ramayana* "जय-मुज्जयिनीनिवासी भगवान् महाकालनाथः." Surely the Sanskrit language was not so dead in the time of Srikantha that he could not call it "the dear lord of time," which another writer calls "the great lord of time." I say nothing of the tradition which connects Bhavabhuti with the Court of Ujjayini.

14. In a note to the cloud-messenger, Wilson says "I have not been able to make any thing of this pass or hole "क्रौञ्चरन्ध्र." The passage I have quoted from the Mahabharata (note II. 36.) will I hope remove that difficulty. It also agrees with the description of Kalidasa in the Meghaduta. What is more, we read in English gazetteers of deep gorges near the lake Manasa, of the depression separating the Kieulun from the Himalaya. Its exact position can, I believe, be found with little difficulty by modern travellers, as it is very probably still associated with its old traditions.

15. My view of the Mandakini given in note IV. 93. is not quite correct. Mandakini, in our lexicons, is called the celestial Ganges and I have used Bhagirathi as a synonym. Considering its contiguity to the confluence of the Ganges and the Jumna and the estimation in which it is held by sacred writers, I am perhaps not wrong in holding that our ancestors considered it to be the Mandakini of heaven. But properly speaking, it is, I believe, the Paisuni of Bundelkhand. Thornton says :— "Chitrakote, in the British District of Banda, is a town on

* Govinda Deva Sastri's edition, page 304.

Digitized by Google

the river Paisuni 50 miles S. E. of the town of Banda. It is described by Tieffenthaler, as the resort of all India, being the residence of Rama and his wife Shita, after they had left Ayodhya. It is crowded with temples and shrines of Rama and his brother Lakshmana. The clear river Paisuni here expands into a small shallow lake, enclosed by a border of masonry."*

16. In note I. 27., I have observed that the use of the genitive for the dative as an indirect object is ungrammatical and faulty. What I mean is that it is against the rules of Panini and must be condemned as giving rise to great ambiguity.

17. My contention will be obvious from Panini I. IV. 32. Translated into English, the rule is "the person aimed at by the object is the dative." Bhattoji Dikshita adds "by the object of gift." I say addition for there is nothing in the rule of Panini to warrant this interpretation and few persons will doubt that Panini would have prefixed the simple word 'gift,' if he wanted to restrict the signification of his rule. I admit that the rules of Panini are very concise. I admit they are sometimes obscure. But it is presuming too much to suppose that he wanted the faculty of clothing his thoughts in intelligible and suitable language.

18. That the rule does not admit of the limited meaning attached by Dikshita will be obvious from the following examples, in none of which is the dative what I may call the dative of gift :—

(1) याज्ञवल्क्यो मुनिर्यत्नै ब्रह्मपारायणं जनौ । Vi. I. 13.

(2) यत्नै मुनिर्ब्रह्मपरं विवव्रे । Vi. II. 43.

---

* एषा प्रसन्नस्खलितप्रवाहा सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ R. XIII. 48.

Digitized by Google

(3) तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपायां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै प्रश्रंस वाचा पुनरुक्तयेव ॥ R. II. 68.

(4) वृद्धि मे कुरुतं सर्वं सीतायै, A. R. v. III. 33.

(5) प्रजिघाय.....हरिरश्वं हरिश्मश्रु सुराङ्गना, R. VIII. 99.

(6) तं दिदेश हृतये सलक्ष्मणं, R. XI. 2.

(7) यीमच्च तं यीग्यतमाय तस्मै तपःप्रभावाधिततार सद्यः, Ki. III. 26.

(8) इयं पत्रिका तस्मै कन्यकायै देया, K.

(9) सुमतये मन्त्रिणे तदनुजमर्पितवान्, D.

19. From these instances, it is clear that the indirect object is put in the dative not only after verbs signifying to give, but also after verbs signifying *to explain, to disclose, to represent, to speak, to communicate, to send, to deliver, to make over*, etc. In all these cases, the indirect object is represented in English by the preposition *to* and I doubt whether it is expressed by the simple genitive in any modern dialect of India.

20. Bhattoji Dikshita himself knew that his explanation was not sufficient, for under his note to Panini II. 3. 13., he adds a rule precisely similar to I. 4. 32. of which there was not the least necessity and gives as example पत्रं प्रेते which, if I understand right, does not fit at all. It is not an example of indirect object, but of what is expressed in English by the preposition 'for' and called in Latin Grammar *dativus commodi*.

21. Tarkavachaspati seems to hold from the foot-note no. 113 page 275 vol. I. of the Siddhanta Kaumudi that examples like "तत्तदभूमिपतिः पत्रैः दर्शयन् प्रियदर्शनः" (R. I. 47.) come under Panini II. 3. 14. With every deference to his erudition, I think it clearly refers to the class of cases I have been considering. My view is supported not only by the rule itself, but also by the examples cited by Dikshita in illustration

Digitized by Google

of the rule. In further confirmation of my view, I may say that Mallinatha never quotes this rule of Panini whenever he explains such passages (see his notes to Ki. 1. 2. and R. v. 39.)

22. In the Vedas, the genitive is sometimes used for the dative (Panini II. 3. 62.) The *prakrita* declensions make no distinction between them. And some of the classical writers occasionally use the genitive for the indirect object. But it is not the less true that it gives rise to great ambiguity*—that it is not sanctioned by Panini—and must be avoided.

23. After this discussion, it is needless to add that Bhattoji Dikshita's explanation of Panini's rule षष्ठी शेषे (II. III. 53.) is also not quite correct. शेष in this rule does not mean any thing more than what it always means in such cases—more than what Panini conveys by it in other rules as e. g., in II. II. 23. (शेषो बहुव्रीहिः)—more than what Dikshita himself explained under that rule. It has however been best explained by Bhamaha in his note to Vararuchi IX. 18. (शेषः संबन्धात्) in these words "उक्तादन्यः शेषः". The confusion, if I may use the term, of Dikshita has arisen from the occasional use of the genitive for the dative. He attempted to fit the rules of Panini to them, instead of examining whether they actually fit the rules of Panini.

24. In writing the commentary, my greatest indebtedness is to the Ramayana, from which Srikantha himself drew his meterials. I have consulted two editions of it—viz—the Italian edition of Gaspar Gorresio and the Bombay edition of Krishna-

* For instance, take the passage in the fourth act of this play "दशरथस्य वार्ताहारिणी." Why should it not mean "conveyer of the message of Dasaratha"? What is there to shew that the message is *to him* and *not from him*? This ambiguity must have given rise to the use of the dative in such cases and the consequent rule in Panini.

Digitized by Google

ji Ganapatji. These two editions differ so much from each other that it is high time that a competent scholar should undertake a thoroughly critical edition of so important a work. So far as I can guess, the Italian edition is much nearer the original text of Ramayana. The two verses in Uttara Charita (VI. 28. and 29.) quoted by Kusha from, what Bhavabhuti calls, the last chapter in the first book of Ramayana,* occur in the Italian edition, being respectively I. 78. 13. and 14. † They do not occur at all in the Bombay edition. So U. VI. 33. corresponds with II. 105. 6. of the Italian edition. My quotations from the first six books of the Ramayana are all from the Italian edition, except where the words ब॰ स॰ are added, ‡ So are all my references to it. The seventh book is altogether omitted in the Italian edition and my quotations from it will be found in the Bombay edition. As the Adhyatma Ramayana, is much shorter—in fact an epitome of the Ramayana, I have sometimes preferred to quote from it. The edition consulted has deen that of Kali Kinkara Vidyaratna of Calcutta.

25. Next to the Ramayana, I am indebted to the rules of Panini. My quotations are taken from the second edition of the Siddhanta Kaumudi by Taranatha Tarkavachaspati. This is an excellent edition and the rules of Panini prefixed to it in regular order greatly enhances its value. What is wanted is an alphabetical index at the end and clearing up all the citations by Bhattoji Dikshita.

---

* इतो बालचरितस्यान्ते ऽध्याये दौ श्लोकौ ।

† It is curious that no edition of the Uttara Charita makes any remark about these verses.

‡ In some places, I have been obliged to quote from both the editions, where Bhavabhuti's reading or reference shews that neither is wholly correct, as, e. g., in Vi. v. 24.

Digitized by Google

26. My quotations from the Mahabharata, the Bhagavata Purana, and the Devi Bhagavata are from the Bombay editions of those works. They contain few typographical errors but there is nothing to shew that they were edited after a careful collation and comparision of many manuscripts, without which a correct text is almost impossible to attain.* They are however, all edited with care, which is totally wanting in many Calcutta publications.

27. I must reserve my observations on the other works consulted to my essay on "Bhavabhuti and his place in Sanskrit literature," which it was my intention to prefix to this edition, but which I am now obliged to defer to the beginning of the next year. All I should say here is that the quotations from the Bala Ramayana are taken from the Benares edition of Govinda Deva Sastri and the quotations from other plays and rhetorical works are taken from Calcutta editions. The few quotations from the Vedas are taken from European editions and the quotations from the Katha Sarit Sagara from the edition of Hermann Brockhaus.

28. The indiscriminate use of a commentary is, however, open to many grave objections and I candidly advise the readers of this play that they should always try to understand it without the use of the commentary. To facilitate this self-study, I have added a Sanskrit-English Glossary of the most diffiicult terms—which is the chief difficulty in the way of understanding this play.

---

* As regards the Mahabharata, it is well known that many interpolations have been made. But such is the want of critical spirit among our countrymen and such the spell of imitation that notwithstanding five editions of it, no attempt has been yet made to restore its original text.

Digitized by Google

29. Before concluding I must thank the learned Principal of the Sanskrit College for kindly lending me manuscripts which have occasionally been of great use in preparing the commentary and ask the public to take a lenient view of its short comings and favour me with its errors.

RANIGUNGE.
Oct. 17. 1817.

A. B.

Digitized by Google

सङ्केतवर्णानि ।

अ० रा०	...	...	अनर्घराघवम् ।
उ० च०	...	...	उत्तरचरितम् ।
ऋ०	...	...	ऋग्वेदसंहिता ।
पा०	...	...	पाणिनीयाष्टकम् ।
प्र० रा०	...	...	प्रसन्नराघवम् ।
बा० रा०	...	...	बालरामायणम् ।
भा०	...	...	भागवतपुराणम् ।
म०	...	...	महाभारतम् ।
मा० मा०	...	...	मालतीमाधवम् ।
मे०	...	...	मेघदूतम् ।
रा०	...	...	रामायणम् ।
वि०	...	...	विष्णुपुराणम् ।
श०		...	अभिज्ञानशाकुन्तलम् ।

Digitized by Google

Digitized by Google

श्रीगणेशाय नमः ।

(1) महावीरचरितम् ।

(2) अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥ १ ॥

महाकविभवभूतिविरचितस्य महावीरचरितस्य जानकीरामभाष्यम् ।

नाटकं वीरचरितं प्रणीतं भवभूतिना ।
जानकीरामसंबद्धं वाक्यार्थदुरधिरोहम् ॥
प्रणम्य जानकीरामौ सर्वभारतपूजितौ ।
जानकीरामसंज्ञेन भाष्येण विवृणोम्यहम् ॥
जानकीरामसीदर्यो दुर्लभानन्दनन्दनः ।
आनन्दरामवडुया प्राग्ज्योतिष्पुरसम्भवः ॥

(1) महावीरस्य रामस्य चरितं महावीरचरितम् । अस्मिन्नाटके रामाभिषेकपर्य्यन्तं रामचरितं वर्णितम् । तस्योत्तरचरितमधिकृत्य कविनोत्तररामचरितं ग्रथितम् ।

(2) 'अथ नित्याय देवाय' परमेश्वराय नमः । नमःस्वादिना चतुर्थी पा० । २,३,१६, ॥ किम्भूताय देवाय स्वस्मिन् तिष्ठतीति स्वस्थः

Digitized by Google

(3) नान्द्यन्ते सूत्रधारः।

सूत्र। (4) अथ खलु भगवतः कालप्रियनाथस्य यात्रा-यामार्यमिश्राः समादिशन्ति—

अनन्यस्थितिरूपौ। तथा हृताः पाप्मानः पापानि यस्य तस्मै निरस्त-कल्मषाय। तथा त्यक्तः क्रमो विभागश्च येन तस्मै अविकार्याय। तथा चैतन्यस्य चेतनावाः उद्योतिषे चैतन्यरूपाय ब्रह्मणे।

(3) नन्दयतीति नान्दी रङ्गविघ्नोपशान्तये सूत्रधारप्रवेशात् प्राग्विहिताभिनन्दनभारती। आशीर्वचनसंयुक्ता नान्दीति विश्वनाथ-व्याख्यानं न सम्यगविशुद्धं यतः सर्वत्र नान्दी नाशीर्वचनसंयुक्ता यथा-भिज्ञाशाकुन्तले यथा चानर्घराघवे। नान्द्यन्ते नान्द्यवसाने नान्दीपाठा-नन्तरमित्यर्थः। सूत्रं नाटकावतरणं धारयति सूचयतीति सूत्रधारः।

(4) "कालः सृजति भूतानि कालः संहरते प्रजाः" इति भारतम्। तस्य कालस्य प्रियो नाथः पतिः कालप्रियनाथः महाकालः शिव इत्यर्थः। तस्य सर्वसंहारकत्वात्। यथा हस्तिनापुरं गजसाह्वयं वदन्ति यथा च हिमकरमरीचीतदीधितिं तथा कविना कालप्रियनाथपदेन महाकाल उक्तः। पुरा किलोज्जयिन्यां महाकालायतनमासीत्। यदुक्तं कथासरित्सागरे "यस्यां वसति विश्वेशो महाकालवपुः स्वयम्। गिरिशोऽतकैलासनिवासव्यसनो हरः॥" इति। यथा च मेघदूते "अप्यन्यस्मिन् जलधर महाकालमासाद्य काले स्थातव्यं ते नयनविषयं यावदत्येति भानुः" इति। मे० १, ३५। यात्रा उत्सवविशेषः। इदानीमपि कामरूपादिप्रदेशेषु यात्राप्रसङ्गेन नाटकप्रयोगरीतिः प्रचलिता। आर्याः कुलादिसम्पन्नाः मिश्राः बहुतत्त्वज्ञाः आर्यमिश्राः। कोविदार्यश्रेष्ठा इति व्याचक्षते तन्न सङ्गतं यतो भवभूतिनैव स्वकीये

(5) महापुरुषसंरम्भो यत्र गम्भीरभीषणः ।
प्रसन्नकर्कशा यत्र विपुलार्था च भारती ॥ २ ॥
अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः ।
भेदैः सूक्ष्मैरभिव्यक्तैः प्रत्याधारं विभज्यते ॥ ३ ॥ युग्मकम् ।
स संदर्भोऽभिनेतव्यः इति सहर्षम् महावीरचरितं तर्हि प्रयोक्तव्यमित्यादिष्टमर्थतो भवति ।

(6) वश्यवाचः कवेः काव्यं सा च रामाश्रया कथा ।
लब्धश्च वाक्यनिस्यन्दनिष्पेषनिकषो जनः ॥ ४ ॥

मालतीमाधवे "आर्या विदग्धा विक्रा भगवन्तो भूमिदेवाश्च" इति सदृशम् । समादिशन्ति आज्ञापयन्ति ।

(5) यत्र यस्मिन् प्रबन्धे गम्भीरश्च भीषणश्च भयानकश्च गम्भीरभीषणः महापुरुषाणां महात्मनां संरम्भो संभ्रमः । यत्र भारती वाक् च विपुलः अर्थः यस्याः विपुलार्था गुर्वी प्रसन्ना विमला कर्कशा कठिना च क्वचिदिति भावः प्रसन्नकर्कशा । यत्र अप्राकृतेषु असाधारणेषु महत्तृस्थित्यर्थः पात्रेषु स्थितः वीरो रसः प्रत्याधारं प्रतिपात्रं अभिव्यक्तैः स्फुटैः सूक्ष्मैः भेदैः विभज्यते विविच्यते । यत्रैकस्मिन्नपि वीररसस्य रामरावणादिपात्रगतस्य सूक्ष्मभेदाः स्फुटीकृताः । स एतादृशः सन्दर्भः अभिनेतव्यः प्रयोक्तव्यः । तर्हि तदा वीरचरिताभिनयायादिष्टा इति भावः ।

(6) वश्या वशगा वाक् यस्य वश्यवाक् वागीश्वरः । तस्य कवेः काव्यं नाटकम् । रामाश्रया रामसम्बद्धा सा प्रसिद्धा कथा च । वाक्यनिस्यन्दस्य वाक्यप्रसरस्य निष्पेषनिकषः निष्पीड़नोपलः भावप्रकाशनार्थः जनस्य लब्धः । यथा निकषोपलेन स्वर्णस्य गुणागुणौ परीक्ष्येते तथास्य नाटकस्य गुणागुणप्रवक्तारो भवादृशाः सामाजिकाः ।

Digitized by Google

(7) सोऽहमेतद्विज्ञापयामि । अस्ति दक्षिणापथे पञ्चपुरं नाम नगरम् । तत्र केचित्तैत्तिरीयिणः काश्यपाश्वरणगुरवः पंक्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिनः उदुम्बरा ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य

---

(7) दक्षिणापथे दक्षिणदेशे विदर्भेष्वित्यर्थः । "यजूंष्यत्र विरूपाणि याज्ञवल्क्येन वै द्विजाः । जग्मुस्तित्तिरिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥" इति विष्णुपुराणम् । तैत्तिरीयं यजुर्वेदशाखां विदन्तीति तैत्तिरीयिणः । काश्यपाः काश्यपगोत्राः । चरणे आचरणे धर्मानुष्ठाने गुरवः चरणगुरवः । पंक्तिं पावयन्तीति पंक्तिपावनाः । "अत्रयः सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विप्रेयाः पंक्तिपावना" इति मनुः, ३. १८४. । पञ्च अग्नयः येषां ते पञ्चाग्नयः । "एकोऽग्निरादावभवद्वैतेन त्वत्र मन्वन्तरे त्रेता प्रवर्त्तिता" इति विष्णुपुराणम् । गार्हपत्याहवनीयदक्षिणाग्निरूपमग्नित्रयं तनोतीति श्रीधरव्याख्या । एतद्विधौ सभ्यावसथ्यौ वेद उदाहृतौ । एते पञ्चाग्नयः पुरा किल साग्निकब्राह्मणैः सततं रक्षिताः । धृताः व्रताः यैः ते धृतव्रताः व्रतशालिन इत्यर्थः । सोमपीथं सोमरसपानं कुर्वन्तीति सोमपीथिनः सोमपाः सोमयज्ञानुष्ठातार इति भावः । छान्दसोऽयं प्रयोगः । यथा "तव राधः सोमपीथाय हर्यते" इत्यृ, १. ५१. ७. । पातृतुदिवचीत्यादिना थक्प्रत्यय इति सायनाचार्याः । उदुम्बराः सुप्रसिद्धाः । प्रसिद्धौ डम्बरं विदुरिति विश्वः । उडुम्बरा इति पाठे स एवार्थः । ब्रह्म वेदं वदन्तीति ब्रह्मवादिनः वेदपारगा इत्यर्थः । प्रतिवसन्ति वसन्ति । तत्रोपसर्गस्य निरर्थकत्वम् । अमीषां प्रथितयशसां ब्राह्मणानां कुले जातस्य आमुष्यायणस्य । अमुष्यापत्ये फक् । पा० ४. १. ९९. ।

Digitized by Google

तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः सुगृहीत-नाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्म-सम्भवः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम जातूकर्णीपुत्रः कविर्मित्रधेयमस्माकमित्यत्रभवन्तो विदांकुर्वन्तु ।

(8) श्रेष्ठः परमहंसानां महर्षीणामिवाङ्गिराः ।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः ॥ ५ ॥

तत्रभवतः पूज्यस्य । "स भवान्" "अत्रभवान्" "तत्रभवान्" इत्यादयः सम्भाषणे पूज्येषु प्रयुज्यन्ते । वाजपेयं यागविशेषं याजयन्ति कारयन्तीति वाजपेययाजिनः । "वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः" इत्या-दिभिर्मन्त्रैर्वाजपेययाजनं वाजसनेयिसंहितायां नवमेऽध्याये द्रष्टव्यम् । वाजमन्त्रमिति महीधरेण व्याख्यातम् । पञ्चमः पौत्र इति सम्बन्धः । सुगृहीतं नाम यस्य तस्य सुगृहीतनाम्नः शोभनसंज्ञस्येति भावः । भट्टगोपालस्य गोपालभट्टस्य । पवित्रा कीर्त्तिर्यस्य तस्य विशुद्धयशसः । आत्मनो सम्भवो जन्म यस्य स आत्मसम्भवः आत्मजः पुत्र इति यावत् । श्रीः सरस्वती कण्ठे यस्य स श्रीकण्ठः । श्रीकण्ठपदं लाञ्छनं ख्याति-र्यस्य स श्रीकण्ठपदलाञ्छनः श्रीकण्ठोपाधिक इत्यर्थः । अत्रभवन्तो मित्रधेयमस्माकमिति अस्माकं मित्रमिति विदांकुर्वन्तु जानन्तु । विनये लोट् पा० ३.३.१६१. । नीलकण्ठश्रीकण्ठजातूकर्ण्यभवानां महादेव-वाचकत्वाद्भवभूतेः शैवत्वमायङ्कृते । नीलकण्ठश्रीकण्ठभवानां व्युत्पत्तिः स्पष्टा । शिवस्य सर्वश्रवणत्वात् जातूकर्ण्यसंज्ञा सम्भवा । विष्णु-पुराणव्याख्यानमतं नात्राकमभिमतम् ।

(8) महर्षीणां महर्षिषु । यतश्च निर्द्धारणमिति (पा० २.३.४१)

Digitized by Google

(9) तेनेदमद्भुतजगत्त्रयमन्युमूल-
मस्तोकवीरगुरुसाहसमद्भुतञ्च।
*वीराद्भुतप्रियतया रघुनन्दनस्य
धर्मद्रुहो दमयितुश्चरितं निबद्धम् ॥ ६ ॥

(10) तदिदं भवन्तः परिपुनन्तु। उक्तञ्च तेन श्रोत्रियपुङ्गवेन—

---

* तत्रैव वीराद्भुतारम्भगम्भीरोदात्तवस्तवे। भ०. रा०. १.६.।

क्षत्रानुसारेण षष्ठी। अङ्गिरा इव परमहंसानां दण्डीनां यतीनां श्रेष्ठः यथार्थनामा भगवान् ज्ञाननिधिः यस्य भवभूतेर्गुरुः। न केवलं नामतः अर्थतोऽपि यो ज्ञानस्य निधिः आधार आसीत्। "यतीन् प्रजानामसृजं महर्षीणामितो दश ॥ मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ॥" इति मनुः। अङ्गिरसोऽग्निरूपत्वात् (ऋ०१.१.६.) महर्षिषु प्राधान्यम्।

(9) वीरेषु अद्भुतः अपूर्वः वीराद्भुतः महावीर इत्यर्थः। तस्य प्रियतया अनुरागात् वीराद्भुतप्रियतया। तेन भवभूतिना रघुनन्दनस्य रघुवंशजस्य रामस्य इदम् अद्भुतं चरितं निबद्धं ग्रथितम्। किम्भूतं चरितम् उद्धृतम् उत्पाटितं जगत्त्रयस्य मन्योः शोकस्य मूलं रावण इति यावत् येन तत्। पुनः किम्भूतम्। न स्तोकः अल्पः अस्तोकः। अस्तोकस्य महतः वीरस्य गुरु महत् साहसं यत्र तत् अतिसाहसीत्यर्थः। किम्भूतस्य रामस्य। धर्मं द्रुह्यन्तीति धर्मद्रुहः धर्मद्वेषिणः। तान् दमयितुः शासितुः। न लोकाव्ययनिष्ठाखलर्थतृणां (पा० २.३.६९.) इति कर्मणि।

(10) परिपुनन्तु पवित्रीकुर्वन्तु अवधेनानुष्टङ्कयन्तीति भावः। श्रोत्रियः वेदविद्विप्रः नीलकण्ठ इति भावः। तस्य पुत्रेण भवभूतिना।

Digitized by Google

(11) प्राचेतसो मुनिवृषा प्रथमः कवीनां
यत् पावनं रघुपतेः प्रणिनाय वृत्तम् ।
भक्तस्य तत्र समरंसत मेऽपि वाच-
स्तत् सुप्रसन्नमनसः कृतिनो भजन्ताम् ॥ ७ ॥

प्रविश्य नटः ।

नटः । (12) कृतप्रसादाः पारिषदाः । किन्तु अपूर्वत्वात् प्रबन्धस्य कथाप्रदेशं समारभे श्रोतुमिच्छन्ति ।

सूत्र । (13) स तु भगवान् दीक्षिष्यमाणः कौशिको विश्वामित्र ऐक्ष्वाकस्य राजर्षेर्वशिष्ठपुरोधसो दशरथस्य गृहानुपेत्य स्वमेव तपोवनं प्रत्यागतः । स च—

---

(11) कवीनां प्रथमः आदिकविः मुनिवृषा मुनीन्द्रः प्राचेतसः प्रचेतसोऽपत्यं वाल्मीकिः यत् रघुपतेः रघुनाथस्य रामस्य पावनं भक्तायत्तं वृत्तं चरितं प्रणिनाय निबबन्ध । तत्र वृत्ते भक्तस्य मे मयापि वाचः समरंसत विजहुः तच्चरितं मयापि निबद्धमिति भावः । तत् मत्कृतं चरितं कृतिनो विचक्षणा यूयं सुप्रसन्नमनसः सोल्लासं भजन्तां सेवन्तां गृह्णन्त्वित्यर्थः । "समरंसत" संपूर्वकरमेर्लङि रूपम् ।

(12) पारिषदाः सामाजिकाः रङ्गप्रेक्षका इति यावत् । कृतप्रसादाः प्रसादिताः । प्रबन्धस्य निबन्धस्य नाटकस्यास्येति यावत् । अपूर्वत्वात् अपूर्वप्रयोगत्वात् । कथाप्रदेशं कथाभागम् ।

(13) दीक्षिष्यमाणः यागाय दीक्षां कर्तुं । कौशिकः कुशिकाराजः । विश्वस्य मित्रं विश्वामित्रः तन्नामधेयो मुनिः । ऐक्ष्वाकस्य इक्ष्वाकुवंशस्य वशिष्ठः पुरोधाः पुरोहितो यस्य तस्य वशिष्ठपुरोधसः ।

Digitized by Google

(14) विजयि सहजमस्त्रैर्वीर्य्यमुच्छ्राययिष्यन्
जगदुपकृतिबीजं मैथिलीं प्रापयिष्यन् ।
दशमुखकुलघातश्लाघ्यकल्याणपात्रं
धनुरनुजसहायं रामदेवं निनाय ॥ ८ ॥

(15) निमन्त्रितस्तेन विदेहनाथः
स प्राहिणोद्भ्रातरमात्तदीक्षः ।
कुशध्वजो नाम स एष राजा
सीतोर्मिलाभ्यां सहितोऽभ्युपैति ॥ ९ ॥

[इति निष्क्रान्तौ ।

दशरथस्य गृहानुपेत्य दशरथसकाशं गत्वा स्वं स्वकीयं तपोवनम् आश्रममेव प्रत्यागतः प्रतिनिवृत्तः ।

(14) विजयि जयशीलं सहजं स्वाभाविकं वीर्यम् अस्त्रैः दिव्यास्त्रैः तेषां प्रदानेनेति भावः उच्छ्राययिष्यन् उन्नतिं नेष्यन् वर्धयिष्यन्निति भावः । जगतः उपकृतेः उपकारस्य बीजं मूलं मैथिलीं वैदेहीं प्रापयिष्यन् । दशमुखस्य रावणस्य कुलस्य वंशस्य घातेन नाशेन श्लाघ्यं स्तुत्यं कल्याणानां मङ्गलानां पात्रं भाजनम् । धनुः अनुजः लक्ष्मणश्च सहायौ यस्य तं लक्ष्मणेन सह धनुर्धरमिति भावः । रामदेवं निनायाश्रममिति शेषः । उच्छ्राययिष्यन्नित्यादिपदानि भविष्यति 'लृट्' निमित्तानि । उच्छ्रापयिष्यन्निति पाठस्तु भ्रममूलकः णिजन्तस्य श्रयतेः पादेयाभावात् ।

(15) तेन विदेहानां नाथः पतिः विदेहनाथः जनकः निमन्त्रितः । आत्तदीक्षः स गृहीतदीक्षो जनकः भ्रातरं कुशध्वजं प्राहिणोत् प्रेरितवान् । स एष राजा सीतोर्मिलाभ्यां जनकसुताभ्यां सहितोऽभ्युपैति आगच्छति ॥

Digitized by Google

[इति (16) प्रस्तावना ।

ततः प्रविशति रथस्थो राजा सूतः कन्ये च ।

राजा । (17) आयुष्मत्यौ सीतोर्म्मिले अद्य भगवान् विश्वामित्रः श्रद्धानेन चेतसा वत्साभ्यां प्रणन्तव्यः ।

कन्ये । (18) जधा कणिट्ठतादो आणवेदि ।

राजा ।—

(19) तुरीयो ह्येष मेध्योऽग्निराम्नायः पञ्चमोऽथवा ।
अथवा जङ्गमं तीर्थं धर्म्मो वा मूर्त्तिसञ्चरः ॥ १० ॥

सूतः । (20) साङ्काश्यनाथ ! एवमेतत् । न खलु विश्वामित्रातिशयमहत्त्वेन कश्चिदपरः प्रक्रथते । यस्य भग-

---

(16) नाटकीयवस्तुनः प्रयोगसूचकः सूत्रधारेण संलापः प्रस्तावना ।

(17) आयुष्मत्यौ दीर्घायुषौ । श्रद्धानेन श्रद्धायुक्तेन । वत्साभ्यां भवतीभ्याम् ।

(18) यथा कनिष्ठतात आज्ञापयति । पितुरनुजः कनिष्ठतातः ।

(19) एष विश्वामित्रो हि तुरीयः चतुर्थः मेध्यः पवित्रः अग्निः । त्रयाणां श्रौतस्मार्तदक्षिणाग्नीनामिति भावः । अथवा पञ्चम आम्नायः वेदः चतुर्णामृग्यजुःसामाथर्ववेदानामिति भावः । अथवा जङ्गमं सञ्चरं तीर्थम् । मूर्त्तिसञ्चरः कायवान् जङ्गमो वा धर्मः ।

(20) साङ्काश्यस्य नगरस्य नाथः पतिः साङ्काश्यनाथः । सुधन्वनो वधानन्तरं जनकाग्रया तदनुजः कुशध्वज इक्षुमतीनदीतीरस्थं

यतस्त्रैशङ्कवं शौनःशेफं रम्भास्तम्भनं *चेत्यपरिमेयमाश्चर्य-जातमाख्यानविद आचक्षते।

(21) तदस्मिन् ब्रह्मार्षेस्त्रिदशमुनिभिर्नार्थितगमे
तपस्तेजोधाम्नि स्वयमुपगतब्रह्मणि गुरौ।

---

* इत्यपरमप्यपरिमेयं चित्रं चरित्रजातमाचक्षते। वा०. रा०. १.।

स्वर्गसंकाशं वाङ्मात्रं नगरमध्यासितवानिति रामायणी कथा। मङ्क्षेन कश्चिदवरः प्रक्रमते कश्चिदन्यो मङ्क्षतर इत्यर्थः। आश्चर्यजातम् अद्भुतावलिम् आख्यानविदः पुराविदः आचक्षते कथयन्ति। यज्ञानानुपकर्माणि मङ्क्षर्षिभिः वाल्मीकादिभिर्वर्णितमिति भावः। त्रैशङ्कवं त्रिशङ्कोः स्वर्गगमनविषयकम्। कुलगुरुत्वा वसिष्ठेन प्रत्याख्यात इक्ष्वाकुवंशीयत्रिशङ्कुर्नाम नरपतिः स्वशरीरेण स्वर्गं जिगमिषुर्विश्वामित्रमुपागमत्। तस्य च तपस्तेजसा "ययौ स्वर्गं सभाविघ्न सुनीनां पश्यतां यदा" इति रामायणे पठ्यते। शौनःशेफं शुनःशेफोऽनविषयकम्। अम्बरीषनाम्ना राजर्षिणा नरमेधाय क्रीत ऋचीकात्मजः शुनः-शेफः पथि विश्वामित्रं मरुधं गत्वा तत्रादिन्द्राभिष्टमन्त्रं लेभे। मे-नेन्द्रं सन्तोषत्र सुन्निनाय। इति च रामायणे पठ्यते। रम्भास्तम्भनं रम्भादमनम्। विश्वामित्रविक्षोभनाय मघेन्द्रः किल रम्भां प्रेषितवान्। क्रुद्धो मुनिस्तां शशाप। "यन्मामुद्दीक्षसे रम्भे कामात्मगुणसम्मदा। तन्मामुद्दिश्य कामेन स्थास्यसीह तपोवने॥" सर्वमेतत् रामायणे आदिकाण्डे ५८.....६६ सर्गेषु विस्तरेण वर्णितम्।

(21) तत् तस्मात् ब्रह्मार्षेः त्रिदशमुनिभिः देवर्षिभिः नार्थितः आमन्त्रितः गमः प्रयत्नो यस्य तस्मिन्। रामायणानुसारेण विश्वामित्रो

निवासे विद्यानामुपहितकुटुम्बव्यवहृति-
र्भवानेव श्लाघ्यो जगति गृहमेधी गृहवताम् ॥११॥

राजा। (22) साधु भोः साधु! सूनृतं हि सूत भाषसे। प्रजप्टकल्पाणोदर्कसङ्गमा ह्येते भगवन्तः साक्षात्कृतब्रह्माणो महर्षयः।

(23) तमांसि ध्वंसन्ते परिणमति भूयानुपशमः
सकृत्संवादेऽपि प्रथत इह चामुत्र च शुभम्।

ब्रह्मणः सकाशात्पूर्वं जन्म लेभे। तपसां तेजसां च धाम्नि निवासे तपस्तेजोधाम्नि निरतिशयतपस्तेजोयुक्त इत्यर्थः। स्वयम् उपगतं सर्वं ब्रह्म येन तस्मिन्। यथोक्तं रामायणे "प्रतिभास्यन्ति ते वेदा ब्रह्म चाव्ययमुत्तमम्" इति १. ६७. १७.। विद्यानां निवासे विद्यानिधौ अग्निनं गुरौ विश्वामित्रे उपहितः न्यस्तः कुटुम्बस्य वन्धोः जनस्य वा हस्तित्वेन व्यवहृतिः मेधते वर्धते इति गृहमेधी गृहस्थः। भवानेव जगति त्रिभुवने गृहवतां गृहिणां मध्ये श्लाघ्यः। एतादृशेन सुनिना सङ्गत्या गृहिणामेतदपि वन्दितता न भवतीति भावः।

(22) "सूनृतमूनयत्यप्रियमिति सूनृ" इति सायणः। तच्चेदम् ऋतमेति सूनृतं प्रियसत्यम्। प्रजप्टकल्पाणोदर्कः विशिष्टमङ्गलावहः अतिशुभकर इत्यर्थः सङ्गमः सङ्गः येषां ते प्रजप्टकल्पाणोदर्कसङ्गमाः। साक्षात्कृतो ब्रह्मा पितामहो यैस्ते साक्षात्-कृतब्रह्माणः।

(23) सकृत्संवादेऽपि एकवारसंलापेऽपि दैवयोः सुनिभिः सह इति शेषः तमांसि अज्ञानरूपाणि ध्वंसन्ते नश्यन्ति। भूयान् भूरिः उपशमः शमः परिणमति परिपाकं गच्छति स्थिरो भवतीति भावः।

अथ प्रत्यासन्नः कमपि महिमानं वितरति
प्रसन्नानां वाचः फलमपरिमेयं प्रसुवते ॥ १२ ॥

कृतः । (24) दृश्यते हरितपरिसरारण्यरमणीयं कौशिकीपरिक्षिप्तमायतनमृषेस्तस्य सिद्धाश्रमपदं नाम । किं बहुना । अयमात्मना तृतीयः कुशिकनन्दनो भवन्तमेवाभ्युदयातः ।

इह अस्मिन् लोके अस्मत् परलोके च शुभं कल्याणं प्रथते वितन्यते । अथ प्रत्यासन्नः तैः सह मैत्री कमपि अनिर्वचनीयं महिमानं महत्त्वं वितरति ददाति । प्रसन्नानां लब्धप्रसादानां वाचः अपरिमेयं प्रभूतं फलं प्रसुवते जनयन्ति । एतावद्भीर्याः प्रसन्नोक्तिभिर्वाञ्छनीयानि लभ्यन्त इति भावः ।

(25) हरितेन हरिद्वर्णेन परिसरारण्येन पर्यन्तस्थितेन वनेन रमणीयं मनोहरं तत् । कौशिकीपरिक्षिप्तं कौशिकीनदीपरिगतम् । यदुक्तं देवीभागवते "कौशिकी यमुना चैव मन्दाकिनी हसन्ती । गोमती सरयू रोधवती सप्रवती तथा ॥" इति ८, ११, १७ । यथा चोक्तं स्कान्दे "स्थानं भोलकटं नाम प्राप्तो गाधिमहीपतेः । यत्र सा कौशिकी नाम नदी त्रैलोक्यविश्रुता ॥" इति । तस्यर्षेः आयतनं निवासस्थानम् । सिद्धाश्रमपदं नाम सिद्धाश्रमनामकम् । यदुक्तं रामायणे "एष पूर्वाश्रमो राम वामनस्य महात्मनः । सिद्धाश्रम इति ख्यातः सिद्धो यत्र महाबलः ॥ मयाऽपि भक्त्या तस्यैव वामनस्य निषेव्यते" इति १, २२, २–१६ । आत्मना तृतीयः रामलक्ष्मणाभ्यां सह इति भावः । कुशिकनन्दनः अभ्युदयातः प्रत्युद्गतः सभाजनायेति भावः ।

Digitized by Google

राजा। (25) यद्येवमवतरामो रथात्। कन्याभ्यां सहावतीर्य। सूत! सूत! उच्यतां सैनिकाः न कैश्चिदाश्रमाभ्यर्णभूमयः परिक्रम्यन्तामिति।

सूतः। यथाज्ञापयसि [इति निष्क्रान्तः।

ततः प्रविशति विश्वामित्रो रामलक्ष्मणौ च।

विश्वा। स्वगतम्—

(26) रक्षोघ्नानि च मङ्गलानि सुदिने कल्यानि दारक्रिया
वैदेह्या च रघूद्वहस्य कुशलैर्दीक्षाप्रवेशश्च नः।
आख्याप्यानि च तानि तानि जगतीक्षेमाय रामात्मनो
दैत्यारेश्चरिताद्भुतान्यथ खलु व्यग्राः प्रमोदामहे ॥ १३ ॥

(27) संदिष्टं च मैथिलस्य राजर्षेरस्माभिः "आचार इति

---

(25) आश्रमाभ्यर्णभूमयः आश्रमपरिसराः। न परिक्रम्यन्तां यत आश्रमबाधा भविष्यतीति शेषः।

(26) सुदिने शुभदिने रक्षोघ्नानि राक्षसक्षयकराणि मङ्गलानि मङ्गलकर्माणि कल्यानि विधेयानि। तथा वैदेह्या सीतया सह रघूद्वहस्य रघुकीर्त्तिवर्धनस्य रामस्य दारक्रिया विवाहः विधेयः। तथा नः मम कुशलैः मङ्गलमन्त्रैः दीक्षाप्रवेशः दीक्षाग्रहः। संयोगार्थे चतुर्थी। जगत्याः त्रिभुवनस्य क्षेमाय कुशलाय रामात्मनो रामरूपस्य दैत्यारेः दानवदमनस्य विष्णोः तानि तानि प्रसिद्धानि चरिताद्भुतानि अद्भुतचरितानि आख्याप्यानि प्रवर्त्तितव्यानि। अथ खलु वयं व्यग्राः औत्सुक्यं प्रमोदामहे प्रहृष्यामः।

(27) मैथिलस्य राजर्षेः मिथिलाराजाय जनकाय अस्माभिः संदिष्टं

यजमानोऽपि यज्ञे निमन्त्रितोऽसि कुमध्वजस्तु सीतोर्मिलाभ्यां सहितः प्रेषितव्यः" इति । श्रुतश्च तत् प्रियसुहृदा ।

कुमारौ । (28) भगवन् ! कः पुनरयं महात्मा यमत्रभवन्तोऽप्येवमभ्युद्याताः ?

विश्वा । (29) शूयन्त एव निमिकुलात्मसम्भवा राजर्षयो विदेहेषु ।

सन्देयः प्रेरितः । यद्यपि भट्टोजिदीक्षितस्यैतस्य "अनौ मेधे" इति सूत्रस्य व्याख्यानस्यानुसारेणैतस्य वाक्यस्य दोषो न लक्ष्यते, तथापि "भोजेन दूतो रघवे विसृष्टः" "राजराजगिरौ तपस्यते दर्पसाराय सन्दिश्य" इत्यादिष्वसन्दिग्धस्थलेषु सम्प्रदानप्रयोगदर्शनात्, "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रेणैतेषां सम्प्रदानत्वस्यासन्दिग्धत्वात्, सम्प्रदानार्थे मेधपदस्यावाचकत्वात्, महाभाष्ये दैडयानामुदाहरणानामनुल्लेखात्, दंसञ्जीवादीनां भाषान्तराणां रीतिसैलक्षण्यादत्र श्रुतसंस्कारदोषोऽस्माभिरामंस्यते । 'आचार इति' आचारानुसारेण । प्रेषितव्यः प्रेरितव्यः । आचारादिकः प्रेषितपर्यन्तो विश्वाधिलसन्देयः । प्रियसुहृदा जनकेन ।

(28) महात्मा महाजनः । अत्रभवन्त इति पूज्यार्थे बहुवचनम् ।

(29) निमिकुलात्मसम्भवाः निमिकुलजाः । यदुक्तं राजावचे" राजाभूत् त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा । निमिः परमधर्मात्मा सर्वसत्त्ववतां वरः ॥.....ज्येष्ठोऽहमनुजस्यास्य भ्राता मम कुमध्वजः ॥ सांकाश्ये ततो राज्येऽभिषिच्य पिता मम । कुमध्वजं यौवराज्ये त्वङ्गा

तेषामिदानीं दायादो वृद्धः सीरध्वजो नृपः।
*याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥१४॥

कुमारौ। (30) यस्य तत् गृहेषु माहेश्वरं धनुः पूज्यते?

विश्वा। अथ किम्।

कुमारौ। चकौतुकम्। (31) अथ किलान्यदपि तत्रा-श्चर्यं †यदयोनिजा कन्यकेति।

विश्वा। विदेह। तदप्यस्ति।

(32) अयन्तु यजमानेन यज्ञमाणस्य मे गृहम्।
प्रेषितस्तेन वात्सल्यादनुजन्मा कुशध्वजः॥ १५॥

(33) तदस्मिन् राजश्रोत्रिये वत्साभ्यां प्रश्रयेण वर्त्तितव्यम्।

कुमारौ। एवम्।

---

* स योगी याज्ञवल्क्याख्यो वेदान्तानध्यजीगपत्। अ०. रा०. ३.१३.।

† अगर्भसम्भवा मातृषी। अ०. रा०. २.।

राज्यं वनं गतः॥" इति १. ७२. २।१२।१२॥ दायादः ऋक्थहरः सिंहासनाधिष्ठाता इति भावः। ब्रह्मणो वेदस्य पारायणम् आद्यन्तं यस्मै जगौ यमध्यापयामासेत्यर्थः। जगौ इति गायतेर्लिटि रूपम्।

(30) माहेश्वरं शैवम्। पूज्यते सादरं रक्ष्यते। अथ किम् वाढम्।

(31) अन्यदपि अपरञ्च न योनेः जाता अयोनिजा अगर्भसम्भवा यज्ञवाटभूस्थिता इति भावः।

(32) यज्ञमानस्य यज्ञं कुर्वतः। अयम् अनुजन्मा अनुजः कुशध्वज प्रेषितः प्रेरितः।

(33) राजा च श्रोत्रियश्च राजश्रोत्रियः वेदविद्राजा। प्रश्रयेण विनयेन वर्त्तितव्यं व्यवहर्त्तव्यम्। एवं तथैव वर्त्तिष्यावहे।

Digitized by Google

राजा। (34) तौ निर्वर्ण्य—

प्रकृत्या पुण्यलक्ष्मीकौ कावेतौ, श्रूयते त्विदम्।
राजन्यदारकौ नूनं कृतोपनयनाविति ॥ १६ ॥
द्वितीयस्य च वर्णस्य प्रथमस्याश्रमस्य च।
अहो! रम्ये इमे मूर्त्ती वयसो नूतनस्य च ॥१७॥ युग्मकम्।

तथाहि—

(35) चूड़ाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोमपवित्रलाञ्छनमुरो *धत्ते त्वचं रौरवीम्।

---

* प्रशान्तामैणेयीं त्वचमपि च वक्षः कलयति। अ०. रा०. ४. २७.।

---

(34) निर्वर्ण्य निरूप्य। एतौ प्रकृत्या स्वभावतः पुण्या पवित्रा लक्ष्मीः श्रीः ययोः तौ पुण्यलक्ष्मीकौ मधुरदर्शनौ एतौ कौ? इदं तु श्रूयते एतत्तु जानामि यत् एतौ नूनं कृतोपनयनौ व्याहितोपवीतौ राजन्यदारकौ क्षत्रियपिल्लू। एकादशे वर्षे क्षत्रियाणामुपनयनं कर्त्तव्यमिति मनुः २. ३६.। किम्भूतौ दारकौ। द्वितीयस्य वर्णस्य क्षत्रियस्य। तथा प्रथमस्य आश्रमस्य। द्विजातीनामाश्रमचतुष्टयमस्ति। यदुक्तमानन्दगिरिणा "ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वाऽथ प्रव्रजेत्" इति। तथा नूतनस्य वयसः नवयौवनस्य इमे रम्ये मनोहरे मूर्त्ती आकृती। नववयसौ ब्रह्मचारिणौ रमणीयौ क्षत्रियकुमारावित्यर्थः। अहो इति आश्चर्ये।

(35) पृष्ठतः पृष्ठदेशे अभितः उभयतः पृष्ठस्य उभयपार्श्वे इत्यर्थः चूड़ाभिः शिखाभिः चुम्बिताः स्पृष्टाः कङ्कपत्राः कङ्कपक्षयुक्ताः शराः यस्य तत् तूणीद्वयं इषुधी स्त इति शेषः। भस्मस्तोमः भस्मचयः पवित्रं

मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ १८ ॥

कन्ये । (36) सौम्यदर्शने कस्य एते ।

राजा । उपसृत्य । भगवन्नभिवादये ।

विश्वा । (37) दिष्ट्या गर्भरूपकं त्वां कुशलिनमागतं राजर्षिगृहात् पश्यामि । तत् परिष्वजस्व । आलिङ्ग्य ।

(38) अपि प्रवृत्तयज्ञोऽसौ विदेहाधिपतिः सुखी ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १९ ॥

क्षाञ्छनं चिह्नं तत् भक्षयतीत्यर्थः उरो वक्षः रौरवीं रुरुमृगस्य त्वचं चर्म धत्ते धारयति । रुरुचर्माहतं वस्त्रं रौरवम् इत्यर्थः । मञ्जिष्ठया रक्तं माञ्जिष्ठं तदेव माञ्जिष्ठकम् अधोवासः अधोवसनं च मौर्व्या मूर्वी-मय्या मेखलया कटिसूत्रेण नियन्त्रितं संयतम् । पाणौ कार्मुकं धनुः अक्षसूत्रमेव वलयम् अक्षसूत्रवलयम् अपरः अन्यश्च पैप्पलः आश्वत्थो दण्डः । अत्र सर्वत्र जनयोरिति योज्यम् ।

(36) सौम्यदर्शनौ सुन्दरौ । सौम्यदर्शनौ सुदर्शनौ ।

(37) गर्भरूपकं पुत्ररूपम् । जनकेन सह सख्यात् तदनुजः गर्भ-रूप इति प्रियोपदेन सम्बोधितः । परिष्वजस्व आलिङ्ग ।

(38) अपि प्रवृत्तः आरब्धः यज्ञो येन स विदेहाधिपतिः जनकः सुखी कुशली । गौतमः गौतमपुत्रः शतानन्दश्च किं सुखीति शेषः । गौतमश्च ज्येष्ठपुत्रोऽहल्यानन्दनः शतानन्दो जनकस्य पुरोहित आसी-दिति रामायणे वर्णितम् (१.५२.) । जनकानाम् इति वंशार्थे बहु-वचनम् । लक्षणयाऽपत्यार्थे बहुवचनमिति भट्टोजिदीक्षितमतम् । तच्च सम्यक् सङ्गतं जनकस्याप्यत्व सङ्ख्यात् । तथा तदुदाहृते कालि-दासीये "रघूणामन्वयं वक्ष्ये" इति वाक्ये रघुरपि गृहीतः ।

Digitized by Google

राजा। (39) नन्वार्य्यः स एकः सुखी सह पुरोधसा दैर्घतपसेन यस्यैवं भवन्तः कुटुम्बवृत्तिमनुपतिताः।

वन्धे। (40) प्रणमामो।

राजा। (41) लाङ्गलोल्लिख्यमानायां यज्ञभूमेः सुनिर्गता।
सीतेयमूर्म्मिला चेयं द्वितीया जनकात्मजा॥२०॥

विश्वा। भद्रमस्तु।

वन्धु। (42) जनान्तिकम्। आश्चर्य्यमियमद्भुतसूतिरार्य्या।

रामः। (43) उत्पत्तिर्दैवयजनात् ब्रह्मवादी नृपः पिता।
सुप्रसन्नोज्ज्वला मूर्त्तिरस्याः स्नेहं करोति मे॥२१॥

---

(39) दीर्घाणि तपांसि यस्य स दीर्घतपाः गौतमः तस्य अपत्यं पुमान् दैर्घतपसः यतानन्दः। स एकः सुखी स एव सुखी। कुटुम्ब-वृत्तिमनुपतिताः बन्धुव्यवहारं सेविताः यं बन्धुवदाचरन्तीति भावः।

(40) प्रणमावः।

(41) लाङ्गलेन हलेन उल्लिख्यमानायाः विदार्यमाणायाः जनकेनेति शेषः यज्ञभूमेः सुनिर्गता इयं सीता। यथोक्तं रामायणे "तस्य लाङ्गलहस्तस्य कर्षतो यज्ञमण्डलम्। अहं किलोत्थिता भित्त्वा जगतीं जनतो गतिम्॥" "विदार्य सेनयसुधां यस्मात् सीतेव चोत्थिता। तस्मात् सीतेत्यसौ ख्यातिं लोके यास्यति ते सुता॥" इति १, ४, १२-१७। इयञ्च अर्म्मिला द्वितीया जनकात्मजा इमे सीरध्वजदुहितरावित्यर्थः।

(42) अद्भुता अपूर्वा सूतिः सम्भवो यस्याः सा अद्भुतसूतिः अयोनिजेति भावः।

(43) दैवयजनात् यज्ञभूमेः उत्पत्तिः जन्म। यजनं यजतेरधि-करणे ल्युट्। ब्रह्मवादी वेदवित् नृपः जनकः पिता। अस्याः दैवज्ञाः

राजा। भगवन्!

(44) कौ त्वामनुगतावेतौ क्षत्रियौ ब्रह्मचारिणौ।
प्रतापविक्रमौ धर्मं पुरस्कृत्योद्गताविव॥ २२॥

विश्वा। (35) रामलक्ष्मणौ दाशरथी।

कुमारौ। सविनयमुपसृत्य। गुरो! अभिवादयावहे।

राजा। दिष्ट्या महाराजदशरथप्रसूतिर्दृश्यते। परिष्वज्य।

(46) नान्यत्र राघवाद्वंशात् प्रसूतिर्वत्सयोः क्षमा।
दुग्धार्णवाद्धते जन्म चन्द्रकौस्तुभयोः कुतः॥ २३॥

(47) श्रुतपूर्वं ह्येतदस्माभिः कर्णामृतम्—

वीतायाः सुप्रसन्ना मधुरा च उज्ज्वला च सुप्रसन्नोज्ज्वला मूर्त्तिः आकृतिः मे मम स्नेहं करोति जनयति मामुपस्नेहयति।

(44) त्वामनुगतौ तवानुचरौ ब्रह्म वेदं चरतः सेवेते अधीयाते इति भावः इति ब्रह्मचारिणौ। यदुक्तं विष्णुपुराणे "बालः क्रतोपनयनो वेदाहरणतत्परः। गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः॥" २. ६. १.। एतौ क्षत्रियौ कौ। यौ धर्मं पुरस्कृत्य धर्मरूपस्य तप पश्चात् प्रतापः तेजः विक्रमः पराक्रमश्च तौ इव उद्गतौ आविर्भूतौ।

(45) दशरथस्य पुत्रौ दाशरथी। दाशरथेर्हि वचनम्।

(46) रघोरयं राघवः तस्मात् वंशात् रघुकुलात् अन्यत्र रघुवंशं विहाय वत्सयोः एतयोः रामलक्ष्मणयोः प्रसूतिः जन्म न क्षमा न सम्भवा। दुग्धार्णवाद्धते क्षीराब्धिं वर्जयित्वा कुतः कस्मात् चन्द्रकौस्तुभयोः जन्म उत्पत्तिः सम्भवमिति शेषः। चन्द्रस्य कौस्तुभमणेश्च क्षीरोदमथनादुत्पत्तिर्मेदाभारते आदिपर्वण्यष्टादशेऽध्याये द्रष्टव्या।

(47) श्रुतं पूर्वं श्रुतपूर्वम्। कर्णस्य अमृतं कर्णामृतम् अतिशुभव-

Digitized by Google

प्राप्ताः कृच्छ्राद्यज्ञकोपचारैः
पुत्रश्रीकाः कोशलेन्द्रेण पुत्राः।
ये दीप्तस्य श्रेयसः पारकामा-
श्चत्वारोऽपि ब्रह्मचर्यं चरन्ति ॥ २४ ॥

(48) तद्भवता निष्प्रज्ञाशिषां काममरिष्टतातिम् आशास्महे सिद्ध एव तु रघूणां प्रसूतेरुत्कर्षः।

(49) यान् मैत्रावरुणिः प्रशास्ति भगवानाम्नायपूते विधौ यज्ञेषु विशामनन्यविषयो रक्षाधिकारः स्थितः।

मिति भावः। कोशलानां कोशलदेशस्य इन्द्र इव कोशलेन्द्रः कोशलाधिपतिः दशरथः। "कोशलो नाम मुदितः स्फीतो जनपदो महान्। निविष्टः सरयूतीरे प्रभूतधनधान्यवान्। अयोध्या नाम तत्रायी नगरी लोकविश्रुता।" इति रा० १, ५, १-२। तेन दशरथेन ऋष्यशृङ्गस्य मुनेः उपचारैः अनुष्ठानैः तत्कृततया पुत्रेच्छा इति भावः कृच्छ्रात् कष्टेन पुत्रश्रीकाः मधुराकृतयः पुत्राः जाताः। ऋष्यशृङ्गविवरणं रामायणे आदिकाण्डे विस्तरेण वर्णितम्। ये चत्वारोऽपि राजपुत्राः दीप्तस्य श्रेयसः परमसुखस्य पारम् अन्तं कामयन्तीति पारकामाः ब्रह्मचर्यं चरन्ति वेदानधीयते।

(48) निष्प्रज्ञा जाता आशीः आशीर्वादः येषां तेषां निष्प्रज्ञाशिषाम्। कामं पर्याप्तम्। अरिष्टतातिं शुभकरम्। आन्दसोऽयं प्रयोगः ऋ० १०, १२७, ४। शिवशमरिष्टस्य करे [तातिल्] पा० ४, ४, १४३। प्रसूतेः अपत्यानाम् उत्कर्षः उन्नतिः।

(49) भगवान् मैत्रावरुणिः। "मित्रयोगात् वसिष्ठः किल देवं तमाप। ततश्च मित्रावरुणयोः प्रविष्टम्। उर्वशीदर्शनाद्भूतवीर्ज-

Digitized by Google

सावित्रस्य मनोर्महीयसि कुले तेषामवाप्तात्मनां
राज्ञां नो महिमा न जातु वचनप्रज्ञानयोर्गोचरः ॥ २५ ॥

विश्वा । (50) अस्राल्पुण्यकर्माणः पावनप्रायकीर्त्तयः ।
* महाभाग्यविदस्तेषां यूयमेव स्तवक्षमाः ॥२६॥

सखे ! विश्वस्य लौकिकाः संख्यायान् अनुप्रविशन्ति तद्-

---

* भवतीर्मर्हिम्नि भवन्तावेव साक्षिणौ । अ०. रा०. ३. ।

प्रपातयोः सकाशात् पुनर्जन्म लेभे ।" इति विष्णुपुराणे श्रूयते । ४.५. । यान् आमनन्ति अधिगच्छन्ति अस्मात् इति आम्नायो वेदः तेन पूते निर्मलीकृते विधौ प्रशास्ति उपदिशति । यस्यत् सर्वदा विश्वं प्रजालात् । न अन्येषां विषयः असाधारणः रक्षाधिकारः पालनाधिकारः येषु स्थितः य एव प्रजापालनेऽधिकृता इत्यर्थः । सवितुः सूर्यस्य अपत्यं सावित्रो वैवस्वतः तस्य मनोः महीयसि पूज्यतमे कुले अवाप्तात्मनां लब्धजन्मनां तेषां राज्ञां भूपतीनां महिमा प्रभावः नोऽस्माकं वचन-प्रज्ञानयोः न जातु न कदाचिदपि गोचरः विषयः । तेषां प्रभावं वक्तुं ज्ञातुं वा न कदापि समर्थाः इति भावः ।

(50) अस्राणि अविरतानि पुण्यानि पवित्राणि कर्माणि येषां ते अस्राल्पुण्यकर्माणः । पावनप्राया प्रायेण जगत्पावनी कीर्त्तिः येषां ते पावनप्रायकीर्तयः विशुद्धयशसः । महाभाग्यं परमसौभाग्यं विदन्ति अनुभवन्तीति महाभाग्यविदः धन्याः यूयमेव तेषां स्तवक्षमाः तान् प्रशंसितुं समर्थाः । अन्ये न समर्था इति भावः । बाडवाः स्तवार्हाः कोशलेन्द्राः ताडवाः स्तवक्षमाः विदेहाधिपतयः । लौकिकाः जनाः विश्वस्य संख्यायान् अनुप्रविशन्ति विश्वसाक्षात्कारान् कुर्वन्ति । विकल्पनैः इच्छाविशेषैः तस्य छायायां सत्यं विश्रामं कुर्मः ।

स्मिन् विकङ्कतप्रच्छाये मुहूर्त्तमास्महे । इति सर्वे परिक्रम्योपविशन्ति ।

नेपथ्ये । जय जय जगत्पते ! रामचन्द्र ! जय । सर्वे साङ्गुतमवलोकयन्ति ।

राजा । भगवन् ! का पुनरीयं देवता ?

विश्वा । (51) अस्त्यहल्या नाम गौतमस्य महर्षेर्गौतथ्यस्य धर्म्मपत्नी । यस्याः शतानन्द आङ्गिरसोऽजायत । तामिन्द्रश्चकमे । तस्मात्तं गौतमदारावस्कन्दिनमहल्याजार

---

(51) महर्षेरङ्गिरसः सृष्टिरचनादिः प्रागेवोक्ता । तस्य ब्रह्मायां पत्न्यां द्वौ पुत्रावजायेताम् "उतथ्यो भगवान् साक्षात् ब्रह्मिष्ठश्च दृढव्रतिः" इति भा० ४. १. ३५. । ममतासौदुतथ्यस्य "भार्या परमसम्मता ।" तस्या "दीर्घतमा नाम शापादन्धिरजायत ।" स उपयेमे "तरुणीं ब्रह्मचर्यां नाम ब्राह्मणीम् । पुत्रांश्च जनयामास गौतमादीन्" बहूनुनीन् । भ० १. १०४. । "सर्वधर्मज्ञतां श्रेष्ठः गौतमो लोकविश्रुतः । तस्मै ब्रह्मा ददौ कन्यामहल्यां लोकसुन्दरीम् ॥" इत्यध्यात्मरामायणम् । तस्यामिन्द्रः साभिलाषोऽभूत् । कदाचिदुत्कृष्टाङ्गिर्गते च मुनीन्द्रे मुनिवेषेण तां धर्षितवान् । गौतमस्तु तद्विज्ञाय भार्यां शशाप । "तथमाना निराहारा त्वं पापे दुश्चारिणि । अदृश्या सर्वभूतानां वनेऽस्मिंस्त्वं निवत्स्यसि । यदा त्विदं वनं घोरं रामो दशरथात्मजः । आगमिष्यति तं दृष्ट्वा धूतपापा भविष्यसि ।" इति रा० १. ४९. २०–२१ । औतथ्यः उतथ्यपौत्रः आङ्गिरसः अङ्गिरोवंशजः । दारान् भार्यां अवस्कन्दते धर्षति दूषयतीति भावः इति दारावस्कन्दी कलत्रगामी । जारः उप-

इति निर्दिशन्ति। अथ भगवान् मन्युमाप। तस्यां धर्मोपघ्नमन्धतामिस्रमभ्यध्यायत्। *सेयमद्य रामभद्र-तेजसा तस्मादेनसो निरमुच्यत।

राजा। (52) कथमप्रमेयसहजानुपमसामर्थ्य एव वत्सो वैकर्त्तनकुमारः।

सीता। (53) सच्चेदानुरागं निर्वर्ण्य अपवार्य च। सरीर-णिम्माणसरिसो णं से अणुभावो।

राजा। निश्चयम्।

---

*सेयं सम्प्रत्यस्य रघुराजपुत्रस्य तेजसा तस्मादन्धकारान्निरमुच्यत। अ०. रा०. २.।

पतिः। मन्युम् आप चुकोप। अन्धतामिस्रं सन्तमसं स्थावरत्वमिति भावः। अभ्यध्यायत् अचिन्तयत् आदिदेश इति भावः। रामभद्रस्य रामचन्द्रस्य तेजसा अनुभावेन रामभद्रतेजसा। एनसः पापात् निर-मुच्यत मुक्तिं लेभे। निरमुच्यत इति निर्पूर्वकमुचुक्लृप्तेः कर्मणि लङि रूपम्।

(52) अप्रमेयम् अमन्तं सहजं स्वाभाविकम् अनुपमम् अप्रतिमं सामर्थ्यं शक्तिर्यस्य अप्रमेयसहजानुपमसामर्थ्यः। वैकर्त्तनकुमारः सूर्य-वंशीयराजपुत्रः रामभद्र इति शेषः।

(53) अपवार्य परावृत्य। "दृश्यं कथ्यतेऽन्यस्य परावृत्यापवा-रितम्।" इति दशरूपम्। शरीरनिर्माणसदृशः तन्वस्यानुभावः। बाह्यस्याकृतिस्तादृशस्य तेज इति भावः।

Digitized by Google

(54) रामाय पुण्यमहसे सदृशाय सीता
दत्तैव दाशरथिचन्द्रमसेऽभविष्यत्।
आरोपणेन पणमप्रतिकार्य्यमार्य्य-
स्त्रैयम्बकस्य धनुषो यदि नाकरिष्यत् ॥ २७ ॥

प्रविश्य तापसः। (55) रावणपुरोहितः सर्वमायो नाम दूतराक्षसः प्राप्तः। स किल राजकार्य्याद्धः पश्यति।

कन्ये। (56) हुं रक्खसो।

कुमा। महत्कौतुकस्थानम्।

---

(54) यदि आर्यः मम ज्येष्ठभ्राता वीरध्वजः। तौषि अम्बकानि यस्य इति त्रियम्बकः शिवः। यद्यपि केचिद्वैयाकरणिकाः भट्टोजिदीक्षितमतमवलम्ब्यैतत् पदं दूषयन्ति तथापि छन्दःसंवादात्, "त्रियम्बकं संयमिनं ददर्श" इति कालिदासप्रयोगदर्शनाच्च पादपूरणार्थमियङादेशः कविना कल्पित इति सम्भावयितुं न शक्नुमः। तस्य शिवस्य इदं त्रैयम्बकं तस्य धनुषः आरोपणेन ज्यारोपणेन पणं नाकरिष्यत्। यो ज्यारोपणेतु स मम सीतां लभेतेति प्रतिज्ञां नाकरिष्यत्। तदा पुण्यमहसे विमलतेजसे दाशरथिचन्द्रमसे चन्द्ररूपाय दशरथतनयाय सदृशाय अनुरूपाय वराय रामाय सीता दत्तैव अभविष्यत् अदास्यत एव। क्रियातिपत्तौ लृङ् पा० ३, ३, १३९। बालेन रामेण बालात् रामात् असम्भवं ज्यारोपणम्, अत एव तस्मै सीताप्रदानं न भविष्यतीत्यभिप्रायः।

(55) पश्यति द्रष्टुमिच्छति। वर्तमानसामीप्ये लट्।

(56) हुं राक्षसः। हुं इति कौतुके। "हुं कुत्सु निश्चयवितर्कसम्भावनेषु" इति वरदराजः ६, ६।

Digitized by Google

राजविश्वामित्रौ । विश्रब्धं । आः आगच्छतु ।

[तापसौ निष्क्रान्तः ।

प्रविश्य राक्षसः ।—

(57) मातामहेन प्रतिषिध्यमानः
स्वयंग्रहाख्यवता दृशास्यः ।
* अयोनिजां राजसुतां वरीतुं
मां प्राहिणोन्मैथिलराजधानीम् ॥ २८ ॥

(58) दृष्टश्च तत्र यजमानः स राजा । तद्वचनात् कौशिक-कुशध्वजावनुसृतोऽस्मि । इति परिक्रामति ।

रामलक्ष्मणौ । (59) सीतोर्म्मिले प्रति यथासंख्यम् आत्मगतम् । तत् किमियममृतवर्त्तिरिव चक्षुराप्याययति ।

---

* कन्यामयोनिजन्मानं वरीतुं प्रजिघाय माम् । अ०. रा०. ३. ४२. ।

---

(57) मातामहेन माल्यवता स्वयंग्रहात् आत्मनैव दृढाक्रान्त्या ग्रहणात् प्रतिषिध्यमानः निषिद्धः दृशास्यः दृशमुखो रावणः अयोनिजां राजसुतां सीतां वरीतुं याचितुं मां मैथिलस्य मिथिलाधिपस्य राजधानीं प्राहिणोत् प्रेरयति स्म । कविस्मृतिरियं कथा ।

(58) यजमानः यज्ञं कुर्वाणः । तद्वचनात् तस्य कथानुसारेण । अनुसृतोऽस्मि अनुगच्छामि ।

(59) यथासंख्यं यथाक्रमं सीतां प्रति रामः ऊर्मिलां प्रति लक्ष्मणः इत्यर्थः । अमृतवर्त्तिरिव सुधामयम् अञ्जनमिव चक्षुः लोचने आप्याययति प्रीणयति ।

Digitized by Google

सीतोर्मिके। (60) तथैव तौ प्रति। किमिति सज्जतेऽस्मिन् लोचनानन्दे मे दृष्टिः।

राघ। (61) उपसृत्य दृष्ट्वा च। इयं सा अयोनिजातिः सीता। स्थाने देवस्य पत्नी। ऋषे! नमस्ते। अव्यनामयं राज्ञः?

तौ। स्वागतम्। दृष्टास्यताम्।

(62) अपि प्रभोर्वः कुशलं तस्य यस्यार्चयत्यसौ।
मूर्ध्ना स्खलत्किरीटेन शासनं पाकशासनः॥२९॥

राघ। (63) उपसृत्य। कुशलं स्वामिनः। संदिष्टश्च वो महाराजेन।

---

(60) किमिति सज्जतेऽस्मिन् लोचनानन्दे मे दृष्टिः। लोचनम् आनन्दयतीति लोचनानन्दः।

(61) स्थाने देवस्य पत्नी महाराजस्य रावणस्य सदृशी भार्या। अव्यामयं कुशलं राज्ञः कुशध्वजस्य।

(62) अथो पाकस्य पाकाख्यस्य शासनः दमयिता पाकशासनो मरुतेन्द्रः यस्य रावणस्य शासनम् आज्ञां स्खलत्किरीटेन भ्रश्यत्कुटेन मूर्ध्ना अर्चयति पूजयति। अपि तस्य वो युष्माकं प्रभोः स्वामिनः कुशलम्। रावणस्येन्द्रविजय उत्तरकाण्डे द्रष्टव्यः।

(63) महाराजेन रावणेन। भवताम् अयोनिजन्मा अगर्भसम्भवं कन्यारत्नम् आस्ते वयं च अर्थिनः तां प्रार्थयामहे। कुतापि रत्नं चेत् यदि अस्ति तत् रत्नम् इन्द्रादपि अस्मासु परिणमति नो इतरम् उपगच्छति। कन्यायास्तु परार्थतैव वराय दानमेव हि मता अनुमता। तस्याः प्रदानात् प्रतिपादनात् अहं वो युष्माकं बन्धुर्भविता भविष्यामि। भविता

Digitized by Google

कन्यारत्नमयोनिजन्म भवतामास्ते, वयं चार्थिनो,
रत्नं चेत् क्वचिदस्ति तत् परिणमत्यस्मासु यत्नादपि ।
* कन्यायाश्च परार्थतैव हि मता, तस्याः प्रदानाद्वरं
बन्धुर्वो भविता, पुलस्त्यपुलहप्रष्ठाश्च सम्बन्धिनः ॥ ३० ॥

सीता । (64) हद्धी हद्धी रक्खसो मं पत्थेदि ।

अर्षि । (64) कहं एव्वं ।

राजविश्वामित्रौ । चिन्तयतः ।

लक्ष्म । (64) जनान्तिकम् । आर्य्य ! आर्य्य ! किं न पश्यसि निशाचरपतिर्दैवीमिमां प्रार्थयते ?

रामः । वत्स !

(65) साधारणाद्विरातङ्कः कन्यामन्योऽपि याचते ।
किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः ॥ ३१ ॥

---

*दातव्येयमकल्पमेव दुहिता कस्मैचित् । भ०. रा०. ३. ४४. ।

दृति भवितुः प्रथमा । पुलस्त्यपुलहप्रष्ठाः पुलस्त्यप्रमुखाः महर्षयः सम्बन्धिनः भवितारः । पुलस्त्यस्य पुत्रो विश्रवाः तस्य विश्रवसः रावणकुम्भकर्णविभीषणाः पुत्राः । पुलस्त्यपुलहादयः सप्त महर्षयः । हिन्दुधर्मानुसारेण कन्यादानमवश्यं कर्तव्यम् । यथोक्तं पराशरेण "प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति । मासि मासि रजस्तस्याः पिबन्ति पितरः स्वयम् ।"

(64) हा धिक् हा धिक् राक्षसो मां प्रार्थयते । कथमेवम् । अन्यानपवार्यान्योन्यामन्त्रणं जनान्तिकम् ।

(65) अन्योऽपि प्राकृतोऽपि साधारणात् लोकेभ्यः निरातङ्कः निर्विघ्नः कन्यां याचते । किं पुनः किमुत जगतां त्रिभुवनस्य जेता परमे

अङ्क । (66) अतिसौजन्यादार्य्यस्य तस्मिन्नपि निसर्ग-वैरिणि निशाचरे बहुमानः ।

यो नस्त्रयीपरिध्वंसात् क्षात्रं तेजोऽपकर्षति ।
ऐक्ष्वाकं यश्च राजर्षिमनरण्यं किलावधीत् ॥ ३२ ॥

राघः । (67) कामं यत्नरिति वध्यः स्यान्न पुनरप्रमेयतपसमस्तिवीरमप्राकृतं प्राकृतवद्दर्हसि व्यपदेष्टुम् ।

ब्रह्मणि तिष्ठतीति परमेष्ठी ब्रह्मा तस्य प्रपौत्रः रावणः । पुलस्त्यस्य ब्रह्मणो ब्रह्मसम्बन्धत्वात् ।

(66) अतिसौजन्यात् मधुरस्वभावात् निसर्गवैरिणि सहजशत्रौ बहुमानः समादरः । त्रयाणां वेदानाम् अभ्यञ्जःसाम्नां समाहारः त्रयी तस्याः परिध्वंसात् लोपात् यो नः अस्माकं क्षात्रं तेजः प्रतापम् अपकर्षति अभिभवति । त्रेतायां सप्तदशविंशतितमे वेदाः लुप्तप्रायाः बभूवुः तत्प्रवर्त्तनाय दत्तात्रेयः आसीत् । यथोक्तं विष्णुपुराणे "ऋतुमप्रतिकृतस्मृतिः स्मृतीर्दत्त इत्यभवदत्रिगोत्रजः ॥" १४. ७६. ॥ लुप्तप्रायेषु वेदेषु क्षत्रियाणां तेजो ह्रासमगमत् । ऐक्ष्वाकम् इक्ष्वाकुवंशीयं राजर्षिम् अनरण्यञ्च अवधीत् जघान । यथोक्तं विष्णुपुराणे "ततोऽनरण्यस्तं रावणो दिग्विजये जघान ।" ४. २. १२. । अनेन राजर्षिवधेन रावणस्य दुर्नयः सूचितः । यथोक्तं भागवते "राज्ञो मूर्द्धावसिक्तस्य वधो ब्रह्मवधाद्गुरुः ॥" इति ९. १५. ४१. ॥

(67) अप्रमेयतपसं सुदीर्घतपसम् । रावणः किल बहुवर्षतपस्यया ब्रह्मणो वरं लेभे इति रामायणप्रवादः । अप्राकृतम् असाधारणम् । व्यपदेष्टुम् उदाहर्तुम् । यद्यपि तेन वधार्हत्वेऽपि अप्राकृततपोवीर्यत्वात् रावणस्य प्राकृतमनुष्यो ऽन्याय्यः ।

Digitized by Google

वक्ष्य । (68) निरस्तवीरपुरुषाचारस्य का तस्य वीरता ?

रामः । वत्स ! मा मैवम् ।

(69) यद्विद्वानपि ताडनेऽप्यभिजने धर्मात् पथो विच्युतः,
किं ब्रूमोऽत्र, तदन्यदेव, * न वसन्त्येकत्र सर्वे गुणाः ।
स्त्रीलानिर्जितषण्मुखाद्भगवतः श्रीजामदग्न्याद्ऋते
निर्विघ्नप्रतिपन्नविश्वविजयो वीरस्य कस्यादृशः ॥ ३२ ॥

राघवः । भवतु भोः ! किमत्र चिन्त्यते ।

---

*क्व नु पुनः सर्वत्र सर्वे गुणाः । भा०. रा०. १. ३६. ।

---

(68) निरस्तः दूरीकृतः वीरपुरुषस्य आचारः व्यवहारो येन सः निरस्तवीरपुरुषाचारः तस्य रावणस्य का वीरता । रावणस्य मायावृत्तं प्रथितं तच्च वीराचारविरुद्धम् । अतः का तस्य वीर्ये श्लाघा इत्यभिप्रायः । अथवा पूर्वोक्तं राजर्षिवधं लक्ष्मीकल्पे इदं लक्ष्मणेनोक्तम् ।

(69) यत् विद्वानपि जानन्नपि ताडनेऽपि पूजनीयेऽपि अभिजने कुलभूषणे जनस्य इति भावः धर्मात् पथो धर्मपथात् विच्युतः भ्रष्टः । अत्र किं ब्रूमः । तत् अन्यत् एव दैवं न भवत्येव । यतः एकत्र एकस्मिन्नाधारे सर्वे गुणाः न वसन्ति सर्वैः सर्वगुणोपेतो न भवतीति भावः । तु किन्तु स्त्रीलया क्रीडया निर्जितः विजितः षण्मुखः कार्त्तिकेयो यः तस्मात् भगवतः श्रीजामदग्न्यात् ऋते जामदग्न्यं विहाय निर्विघ्नं प्रतिपन्नः साधितः विश्वविजयः जगज्जयः येन सः । ताडशः रावणसदृशः वीरः कः । जामदग्न्यस्य कार्त्तिकेयविजयो द्वितीयेऽङ्के दृश्यः ।

Digitized by Google

(70) द्राङ्निष्पेषविशीर्णवज्रमकलप्रत्युप्तरूढव्रण-
ग्रन्थुग्लानिनि भङ्गमोघमघवन्मातङ्गदन्तोद्यमे ।
भर्तुर्नन्दनदेवताविरचितस्रग्दाम्नि भूमेः सुता
वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥ १४ ॥

नेपथ्ये कलकलः ।

राजा। (71) भगवन् ! य एते यज्ञे उपनिमन्त्रिताः पुत्रदारैः सह दिग्भ्यो महर्षयः सम्पतन्ति । तत एवाक्रन्दकलिलः कलकलः ।

---

(70) तस्य जगतः त्रिभुवनस्य वीरः जगद्वीरः तस्य अद्वितीयवीरस्य भर्तुः स्वामिनो रावणस्य वक्षसि भूमेः सुता भूमिसम्भवा सीता वीरश्रीरिव वीरलक्ष्मीरिव विश्राम्यतु आस्ताम् । सीता तद्वक्षोभूषणं भवत्विति भावः । किम्भूते वक्षसि भङ्गेन क्षोभः निष्फलः मघवतः इन्द्रस्य मातङ्गस्य गजस्य ऐरावतस्य दन्तस्य उद्यमः प्रयत्नः यत्र तस्मिन् । पुनः किम्भूते द्राङ् झटिति निष्पेषेण संघट्टेन विशीर्णैः विच्छिन्नैः वज्रमयखण्डैः वज्रखण्डैः प्रत्युप्तानां निक्षिप्तानां रूढव्रणानां अन्तिभिः उद्गमिनि विकासिनि सजलकृते इति भावः । पुनः किम्भूते नन्दनस्य इन्द्रस्य नन्दनवनस्य अधिष्ठात्रीभिः देवताभिः विरचितं स्रजः मालस्य दाम माला यस्य तस्मिन् । अनेन श्लोकेन महेन्द्रयुद्धे तस्य गजस्य दन्तभङ्गः तद्गजस्य मकलीकरणं तद्विजयानन्तरञ्च रावणस्य वीरमालालाभः सूचिताः ।

(71) यज्ञे यज्ञार्थम् । पुत्रा दाराश्च पत्न्यश्च पुत्रदाराः । दिग्भ्यो नानादेशेभ्यः सम्पतन्ति उपसर्पन्ति । ततः तेषु । सम्पत्यां तस्मिन् । आक्रन्दकलिलः कलकलः रुदितमिश्रः कोलाहलः ।

Digitized by Google

सर्वं तिष्ठन्ति ।

कच्च । का पुनरियम्——

(72) अन्त्रप्रोतहृदृत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ ३५ ॥

---

(72) पूर्वं पीतं पश्चात् छर्दितं वान्तं यत् रक्तं तस्यैव कर्दमस्य घनेन निबिडेन प्राग्भारेण स्तोमेन घोरं दारुणम् उल्लसन्तौ प्रकाशमानौ व्यालोलौ चञ्चलौ स्तनौ पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्व्यालोलस्तनौ । तयोः भारेण भैरवं भीषणं वपुः यस्याः सा । अन्त्रैः प्रोतानि खचितानि हृदृन्ति विशालानि कपालनलकानि अस्थीनि । तान्येव क्रूरं कर्कशं क्वणन्ति रणन्ति कङ्कणानि तत्प्रायाणि तद्बहुलानि प्रेङ्खितानि चलितानि भूरीणि बहूनि भूषणानि । तेषां रवैः क्वणितैः अम्बरम् आकाशम् आघोषयन्ती नादयन्ती दर्पोद्धतं साटोपं धावति अभिद्रवति । अस्थीनि षड्विधानि । यदुक्तं भावप्रकाशे "तरुणानि कपालानि रुचकानि भवन्ति हि । वलयानीति तानि स्युर्नलकानि च कानिचित् ॥ .....जानुनितम्बांसगण्डतालुशङ्खशिरःसु कपालानि । .....हस्तपादाङ्गुलितले कूर्चे च मणिबन्धके । बाहुजङ्घाद्वये चापि जानीयान्नलकानि च ॥" इति । केचिदल्लोल्लसदिति पदमल्लसदिति दर्पोद्धतमिति पदञ्च बन्धोद्धतमिति पठन्ति । उत्तरे पाठे वपुर्बन्धेन उद्धतं धावतीत्यर्थः । सरस्वतीकण्ठाभरणे झनत्कङ्कणादि-पाठो दृश्यते तस्यार्थोऽविभिन्नः ।

Digitized by Google

विश्वा। (73) सेयं सुकेतोर्दुहिता भार्य्या सुन्दासुरस्य च।
मारीचजननी घोरा ताड़का नाम राक्षसी॥ ३६॥

कन्ये। (74) तात तात भीषया हृतास्मा।

राजा। मा भैष्टमायुष्मत्यौ।

विश्वा। रामं चिबुके कृत्वा। वत्स! हन्यतामियम्।

सीता। (75) हद्धी हद्धी। एसो एव्व एत्थ णिउत्तो।

रामः। भगवन्! स्त्री खल्वियम्।

अर्मि। (76) सुदं अज्जाए एदं।

सीता। सविस्मयानुरागम्। अय्यदीसुहो एव्व से चित्त-भेदो।

राजा। साधु सत्यमैक्ष्वाको रामभद्रः।

राम। अयं स रामो दाशरथिः। य एषः—

---

(73) मारीचस्य तस्याश्चोः राक्षसस्य जननी माता मारीच-जननी। ताड़कावधः बालादिविवरणं रा०, आ०, २८, सर्गे द्रष्टव्यम्।

(74) तात तात भीषया कृतास्मा। कृतास्मेत्यत्रोपपदः। अभैट-मिति भीधातोर्लुङि रूपम्। माङद्योगेन लुङ्। पा०, ३, ३, १७५,।

(75) हा धिक् हा धिक्! एष एवात्र नियुक्तः। अत्र ताड़कावधाय।

(76) सुतमार्यैतत्। रामस्य विचिकित्सा सीतानन्दकरीत्यो-र्भिन्नाश्रया उक्तिः। अन्यतोऽस्य एवास्य चित्तभेदः। ताड़कावधा-दन्यत्र प्रवृत्तस्य रामस्य चित्तमित्यर्थः।

Digitized by Google

(77) उत्तालताडकोत्पातदर्शनेऽप्यप्रकम्पितः ।
*नियुक्तस्तत्प्रमाथाय स्त्रीवेध विचिकित्सते ॥ २७ ॥

विश्वा । (78) त्वरतां वत्स ! किं न पश्यसि ब्राह्मणजनस्य महतः सङ्घातं बहुमयतः ?

रामः । एवं भवतो जानन्ति—

(79) सर्वदोषानभिव्याप्तादात्मावसथतां गताः ।
युक्ताक्रमभ्युपगमाः प्रमाणं पुरुषापदोः ॥ २८ ॥

[इति परिक्रम्य निष्क्रान्तः ।

---

*तत्प्रमथनार्थं राममेव नियुयुजे । वा०. रा०. १. ।
संजातस्त्रीवधविचिकित्सामुद्री रामभद्रः । वा०. रा. १. ।

---

(77) उत्तालायाः विषालायाः ताडकायाः उत्पातस्य घोरस्य दर्शनेऽपि अप्रकम्पितः स्थिरः । तस्याः प्रमाथाय वधाय नियुक्तः सम्पारितः स्त्रीवेध स्त्रीति विचिकित्सते विलम्बते । यथोक्तं सुरारिणा "कोऽयं कलङ्कनवाङ्कुरः इति हि वनिताभिमानं कर्तुं मनो विचिकित्सते" इति । तथा चोक्तं राघवेण "न च ते स्त्रीवधकृते घृणा कार्या कथञ्चन । प्रजानां हि हितं नित्यं कर्तव्यं राजकुञ्जरैः ॥"

(78) किं त्वरतः सम्भ्रमे महतः अनेकस्य ब्राह्मणजनस्य बहुं संघातं नयं न पश्यसि ।

(79) सर्वदोषस्य अनभिव्याप्तात् असम्बन्धात् आत्मावसथतां गताः नेदृशाः युक्ताक्रमाः सम्भ्युपगमाः स्वीकाराः पुरुषापदोः प्रमाणम् । भवतानुनयः पुरुषापदे निर्धारयन्नीति भावः ।

सीता। (80) अज्जो परागदो एव्व। हद्धी हद्धी क्व्वा-
दवादोली विअ हदासा महाणुभावं अभिहवइ।

राजा। धनुराकृष्य। आः पापे! तिष्ठ तिष्ठ।

अग्निः। (81) अए हाणिं सअं एव्व तादो पत्थिदो।

सर्वे। विरम। पश्यन्तु भवन्तस्ताड़कां—

(82) हृन्मर्मभेदिपतदुत्कटकङ्कपत्र-
संवेगतत्क्षणकृतक्कुरदङ्गभङ्गा।
नासाकुटीरकुहरद्वयतुल्यनिर्य्य-
दुद्बुद्ध्वनद्रक्तप्रसरा सृतैव ॥ २८ ॥

---

(80) अज्जो परागत एव। हा धिक् हा धिक्! उत्पात-वाताडिरिव हताशा महानुभावम् अभिद्रवति। परागतः आयज्जो रामः इति शेषः। उत्पाताय उपेद्रवाय वाताडिः वातचक्रम् उत्पात-वाताडिः। हताशा नष्टा। महानुभावं रामम् अभिद्रवति अभिधावति।

(81) अये इदानीं स्वयम् एव तातः प्रस्थितः ताड़कानिर्योगाय इति शेषः। तातः कुशध्वजः।

(82) हृन्मर्मभेदिनां हृदयमर्मघातिनां पततां निपतताम् उत्कटानां प्रचण्डानां कङ्कपत्राणां शराणां संवेगेन संक्षोभेण तत्क्षणं तत्-कालं कृतः स्फुरतां लसताम् अङ्गानां भङ्गः यया सा। नासा एव कुटीरः तस्य कुहरद्वयं रन्ध्रयुगलं नासाकुटीरकुहरद्वयं तेन तुल्यं समं निर्य्यतां निर्गच्छताम् उद्बुद्बुदानां बुद्बुदायितानां भवतां रक्षसाम् असृजो रक्तानां प्रसरः समूहः यस्याः सा मृतैव। असृक्प्रकरीति पाठे स एवार्थः।

राक्षसौ । (83) अच्छरिअं अच्छरिअं । पिअं णो ।

राजा । (83) अहो ! दृढप्रहारिता राजपुत्रस्य ।

राक्षः । (84) हा आर्ये ताडके ! किं हि नामैतत् ? अम्बुनि मज्जन्त्यलाबूनि, आवायः प्लवन्त इति ।

(85) नन्वद्य राक्षसपतेः खलितः प्रतापः
प्राप्तो नवः परिभवोऽद्य मनुष्यपोतात् ।
दृष्टः स्थितेन च मया खजनप्रमारे
दैन्यं जरा च निकृणद्धि कथं करोमि ॥ ४० ॥

विश्वा । (86) *एष तावदोङ्कारः ।

---

*ओङ्कारो विश्वरचाक्रमनिगमविधेः ..... । वा०. रा०. १. ७८. ।

(83) आश्चर्यम् आश्चर्यम् । प्रियं नः । दृढं प्रहरतीति दृढप्रहारी तस्य भावः दृढप्रहारिता ।

(84) अम्बुनि जले मज्जन्ति निमज्जन्ति अलाबूनि फलानि । आवायः उपलाः । यथा प्रस्तरप्लवनम् अप्लव्यं यथा वा अलाबूनिमज्जनं तथैव मनुष्यात् ताडकावध आश्चर्यः ।

(85) ननु नूनम् अद्य राक्षसपतेः रावणस्य प्रतापः महिमा खलितः नष्टः । अस्य मनुष्यपोतात् मानवकात् नवः अननुभूतपूर्वः पराभवः भङ्गः प्राप्तः अभिगतः । खजनस्य खगणस्य प्रमारे क्षयस्य स्थितेन वर्तमानेन मया दृष्टः । एवंगतो मे ताडका निकृणत्तीत्यर्थः । दैन्यं कार्पण्यं वार्धक्यं जरा च मां निकृणद्धि प्रतिकारात् पराङ्मुखीकरोति । कथं करोमि किं करोमि । 'नव' इत्यत्र 'अहुण' इति दृश्यते पाठान्तरम् ।

(86) एष तावदोङ्कारः एष रामस्य रावणवंशध्वंसस्य प्रथमारम्भः । सर्वैः अस्त्रशस्त्रादिभिः ताडकावधसहितस्य उक्तम् । न हीदं राक्षसवचनस्य प्रत्युत्तरम् ।

Digitized by Google

राज्ञ । (87) *अपि भोः ! किमज्ञात्वं वः प्रतिवचनम् ?

विद्या ।—

(88) अत्र वीरध्वजो वेत्ता, अग्निष्ठो हि कुशध्वजः ।
अस्याः पिता हि कन्यायाः, कुलज्येष्ठः प्रभुर्नः ॥४१॥

राज्ञ । सोऽप्याह कुशध्वजो जानाति किमनिमित्तमेति ।

विद्या । (89) अगतम् । अस्त्यायमवसरो दिव्यास्त्रमन्त्रलाभानां दानस्य । वर्तते च मङ्गल्यो मुहूर्तः । प्रकाश्यम् । सखे कुशध्वज ! मया हि भगवतः क्रमाप्तात् गुरुचर्याव्रतैरधिगतस्य सरहस्यजृम्भकप्रयोगसंहारस्य दिव्यास्त्रमन्त्रधारायणस्य विद्यातत्त्वबीजानि तत्प्रसादादर्थतस्य ग्रन्थतस्य रामभद्रस्य सम्प्रति प्रकाश्यन्ताम् ।

---

* भोः वीरध्वज ! किमिदमज्ञातमाकाश्यवचनं..... यदुत्तरमपि न प्रतिभाषसे । अ०. रा०. १. ४१. ।

---

(87) किं अज्ञात्वं वः प्रतिवचनम् । कन्यायाश्चाग्न्यां किमुत्तरम् ।

(88) अस्याः कन्यायाः सीतायाः पिता । कुलस्य जनकवंशस्य ज्येष्ठः अस्माकं प्रभुश्च वीरध्वज इति शेषः ।

(89) मङ्गलरूपाणां दिव्यास्त्राणां ब्रह्मास्त्रादीनां दानस्य अवसरः अवसरः । दिव्यास्त्राणां नामानि रा० बा० २० सर्गे द्रष्टव्यानि । मङ्गल्यश्च शुभश्च मुहूर्तः वर्तते । गुरुचर्याव्रतैः गुरुसेवया । अधिगतस्य प्राप्तस्य । रहस्ये गूढो जृम्भकाणां जृम्भकास्त्राणां प्रयोगः विक्षेपः संहारः निवर्तनञ्च रहस्यजृम्भकप्रयोगसंहारौ ताभ्यां सह सरहस्यजृम्भकप्रयोगसंहारं तस्य मन्त्रधारायणस्य मन्त्रसमुदायस्य सम्प्रत्यां मन्त्रोक्तामिति भावः । विद्याया तत्त्वानि स्वरूपाख्येन बीजानि विद्यातत्त्वबीजानि

(90) ब्रह्मादयो ब्रह्मर्षिताश्च तत्रा ।
परः सहस्राः परवत्सरांश्च ।
एतान्यदर्शन् मुनयः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ ४२ ॥

राजा । अनुग्रहीतं रघुकुलम् ।

रहस्यानीति भावः । तत्प्रसादात् ब्रह्मात्मप्रभावात् । अर्थवच्च यत्तच्च रामभद्रस्य प्रकाशन्तां रामचन्द्र एषां तत्त्वानि वामतः प्रयोगतश्च जानताम् । ब्रह्मात्मो देवाद्ब्राह्मणां जनकः । यदुक्तं रामायणे "ब्रह्मात्मतनया ह्येते जृम्भकाः कामरूपिणः । भास्वरा रिपुसैन्यानां तेजोद्युतिहरास्त्रया ॥" इति १. २१. १०. । यथाच विष्णुपुराणे "ब्रह्मात्मस्त्व देवर्षेः देवप्रहरणाः स्मृताः । एते युगसहस्रान्ते जायन्ते पुनरेव हि ॥" इति १. १५. १२७. । एतदेव परिहृत्य कविना विश्वामित्रस्य ब्रह्मात्मादस्त्रलाभः कथितः । रामायणे तु शक्रादेशादेव तस्य धनुर्वेदलाभो दृश्यते । यथा "यदि तुष्टोऽसि मे देव धनुर्वेदो महेश्वर । साङ्गोपाङ्गः सोपनिषत् सरहस्यं गृहीयताम् ॥ यानि देवेषु शास्त्राणि ... प्रतिभान्तु च तानि मे । ... एवमस्त्विति देवेशो वाक्यमुक्त्वा दिवं ययौ ।" १. ५६. १६–१७–१८ ।

(90) ब्रह्मादयः पुराणाः मुनयः ब्रह्मर्षयो वेदस्य स्थितार्थं प्रकाशनाय ब्रह्मर्षिताय वेदस्मरणाय इति भावः । सहस्रात् परः परसहस्राः अधिकसहस्राः परवः बहुतरान् तपांसि तत्रा चरित्वा । यथोक्तं वायुना "तपश्चचार प्रथमप्रजानां पितामहः । आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥" इति । स्वानि स्वकीयानि तपोमयानि तेजांसि यत्र एतानि ब्राह्मणि अदर्शन् । दीर्घकालतपश्चर्यया दिव्यास्त्राणां साक्षात्कृतिं लेभिरे इति भावः ।

Digitized by Google

लक्ष्म० । दिष्ट्या देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च ।

राम० । (91) आः दिवौकसोऽपि राजविद्वषमनुमोदन्ते ।

लक्ष्म० । कथम् ?

(92) झटित्येवोत्तप्तद्रुतकनकसिक्ता इव दिशः
पिशङ्गत्वात् सन्ध्यान्तरित इव निर्भाति दिवसः ।
* ज्वलत्केतुव्रातस्थगितमिव दिव्याक्षनिचयै-
र्नभो नैरन्तर्यप्रचलिततडित्पिञ्जरमिव ॥ ४२ ॥

(93) तेजोभिर्दिग्दिग्धि विसृतः प्रदीप्तै-
रादित्यद्युतिमवधीर्य विस्फुरद्भिः ।

---

* रचयति रुचां पञ्जरैः पिञ्जराणि । वा० रा० १. ४१. ।

---

(91) द्यौः ओकः आवासः येषां ते दिवौकसः देवाः । राज्ञः राव-णस्य विद्वेषम् अप्रियं दिव्याक्षदानम् इति शेषः अनुमोदन्ते अनुमन्यन्ते ।

(92) दिशः झटिति तत्क्षणम् एव उत्तप्तेन सन्तापितेन द्रुतेन विग-लितेन कनकेन स्वर्णेन सिक्ताः दृक् । पिशङ्गत्वात् पिङ्गलवर्णत्वात् दिवसः सन्ध्यया अन्तरितः पिहितः इव निर्भाति भासते । दिव्याक्षनिचयैः दिव्याक्षसमूहैः ज्वलतां दीप्यमानानां केतूनां प्रज्ञानां व्रातैः निकरैः स्थगितम् आच्छादितम् इव नभः नैरन्तर्येण अविच्छिन्नं प्रचलिताभिः चञ्चलाभिः तडिद्भिः विद्युद्भिः पिञ्जरं कपिलमिव । यथोक्तम् उत्तर-चरिते..."तमःश्यामैर्नभो भृत्यकैः...ज्वलद्दीप्तिभिरवधीर्यते" । ५. १७ ।

(93) तापयतीति तापनः दाहकः मयूखः किरणः एषां दिव्याक्षा-णामिति शेषः दिग्धि दिग्धि प्रतिदिशं विसृतः सर्वतः प्रदीप्तैः ज्वलद्भिः आदित्यद्युतिं सूर्यप्रभाम् अवधीर्य अतिक्रम्य विस्फुरद्भिः चञ्चलद्भिः

पर्य्यायत्वरितेष्टतीतविप्रयुक्तं
सामर्थ्यं रहयति तापनो मयूखः ॥ ४४ ॥

वन्धे । (94) समन्ततो ज्वलितविद्युत्पुञ्जपिञ्जरेण उल्क्रामंति विश्व लोभणात् पङ्गावणिस्यन्देन ।

राघ । (95) अहो ! दुरासदं दिव्यास्त्रतेजः । संस्तम्भायता येन रावणपुरन्दरहन्तसंरम्भ आहितोऽसि—

(96) सर्वप्राणप्रवणमघवन्मुक्तमाहत्य वज्र-
व्यत्सङ्घट्टाद्विघटितबृहत्खण्डमुज्वलरोचिः ।
एवं वेगात् कुलिशमकरोद् व्योम विद्युत्सहस्रै-
र्भर्तुर्वैक्लव्यजननकपिग्रस्ते च रोषाट्टहासः ॥ ४५ ॥

तेजोभिः पर्यायेण पर्यायक्रमेण त्वरितं शीघ्रं ऋतीतम् अतिक्रान्तं विप्रयुक्तं सामर्थ्यं शक्तिं दर्शनयन्निव इति भावः रहयति नाशयति ।

(94) समन्ततः प्रज्वलितविद्युत्पुञ्जपिञ्जरेणोत्क्रामन्तीव लोभनानि प्रभावविस्यन्देन । उत्क्रामन्ति निर्गच्छन्ति । प्रभावनिस्यन्देन शक्तिनिर्गमेन ।

(95) दुरासदं दुर्धर्षम् । संस्तम्भायता संकुचेन । हन्तसंरम्भं हन्तुमुद्यमम् ।

(96) सर्वप्राणप्रवणेन सर्वसत्ववता मघोना इन्द्रेण मुक्तं क्षिप्तं वज्रं रावणस्येति शेषः आहत्य ताडयित्वा तत्सङ्घट्टात् वज्रसंघातात् विघटितानि वियुक्तानि बृहन्ति खण्डानि यस्य तत् । उज्ज्वलं प्रखरं रोचिः प्रभा यस्य तत् कुलिशं वज्रं वेगात् वेगेन विद्युत्सहस्रैः असंख्यैस्तडिद्भिः व्योम दिवम् एवम् दैवतम् अकरोत् । वज्राख्य सत्वस्य स्ववज्रेण तेजसा कपिग्रस्ते ग्रस्तपीडिते भर्तुः रावणस्य रोषात् अट्टहासश्च उच्चहासश्च एवमुभयविधिरपि शेषः ।

विद्या । (97) अभिवन्दस्व विसृजस्व च रामभद्र ! दिव्यास्त्राणि ।

(98) ब्रह्मेन्द्रद्रविणेशवह्निवरुणप्राचीनबर्हिर्मरुत्-
कालाग्निव्रतिरेक्तिणां भगवतामाद्यावतारात्मनाम् ।
एतेषां तपसाधिकाप्रतिरथैस्तेजोभिरुत्कर्षिणा-
मेकोनाच्च जगत्प्रजनप्रजाप्राचेतसो दक्षियो व्याता ॥ ३६ ॥

---

(97) अभिवन्दस्व पूजय । विसृजस्व गमनायादिश ।

(98) द्रविणश्च धनस्य देयः द्रविणेशः कुबेरः । पृथोः पौत्रः "प्राचीनबर्हिः भगवान् महानासीत् प्रजापतिः ।" वि०. १. १३. २. । "यस्येदं देवयजनमनुयज्ञं वितन्वतः । प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥" भा०. ४. २४. १०. । ब्रह्मा च इन्द्रश्च द्रविणेशश्च वह्निश्च वरुणश्च प्राचीनबर्हिश्च मरुतश्च कालश्च अग्निश्च ब्रह्मेन्द्रद्रविणेशवह्निवरुणप्राचीनबर्हिर्मरुत्कालाग्नयः । प्राचीनबर्हिं विहायैते सर्वेऽग्नेयता रामायत्वोद्भूताः । यथा "ब्रह्मास्त्रं प्रथमं राम दिव्यमेतद्ददामि ते । कालास्त्रमपि चाग्नेयं ददामि दयितं विभो ॥ इन्द्रचक्रं च दुर्धर्षं । वज्रमस्त्रं च दुर्जयं चैव मूसलवरं तथा ॥ यमदण्डं च दीप्तास्त्रं । वारुणं पाशमेव च । शुष्कार्द्रे चाशनी राम ददामि वरमानद ॥ आग्नेयमपि चास्त्रं वायव्यं च ददामि ते । दयितं शैवमस्त्रं च ददामि ते ॥" रा०. आ०. २०. २-१६ । प्राचीनबर्हिरपि धनुर्वेदपारगानां प्रचेतसां जनकः । यथोक्तं विष्णुपुराणे "दयस्यौरस्य दक्षस्य प्राचीनबर्हिषः । सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥" १. १५. ३. । अतस्तस्यापि नामान्तरमेतदुक्तम् । ब्रह्मतिरेक्तिणां तदतिरिक्तानां (रा०. आ०. २१.) भगवतां पूज्यानामाद्यावतारात्मनां वेदमन्त्ररूपाणां

नेपथ्ये ।

(99) एष प्रह्वोऽस्मि भगवन्नेषा विज्ञापना च नः ।
दिव्यास्त्रसम्प्रदायोऽयं लक्ष्मणेन सहास्तु मे ॥ ४७ ॥

विश्वा । रामभद्र ! एवमस्तु ।

सर्व्वे । अहो ! प्रसादः ।

(100) झटित्युन्मीलितप्रज्ञमप्रतर्क्यैश्च शक्तिभिः ।
ज्योतिर्मयमिवात्मानं मन्ये विद्याप्रकाशनात् ॥ ४८ ॥

नेपथ्ये ।

(101) राम राम महाबाहो ! वयं त्वय्यायतामहे ।
विश्वामित्राभ्यनुज्ञानात् सह भ्रात्रा प्रशाधि नः ॥ ४९ ॥

तपसामिव अप्रतिरथैः अप्रतिमैः तेजोभिः उत्कर्षिष्णाम् उन्नतानाम् एतेषां दिव्यास्त्राणाम् एकैकस्य जगत्त्रयस्य त्रिभुवनस्य प्रमथनं विनाशः त्राणं रक्षणं च अवधी सीमे यस्याः सा योग्यता सामर्थ्यम् । सर्वं दिव्यास्त्रं त्रिभुवनं संहर्तुं रक्षितुं वा शक्नोतीति भावः ।

(99) भगवन् विश्वामित्र ! एषोऽहं प्रह्वोऽस्मि त्वत्प्रवणतोऽस्मि । एषा च नो विज्ञापना प्रार्थना । अयं दिव्यास्त्राणां सम्प्रदायो दानं लक्ष्मणेन सह मे ममास्तु । लक्ष्मणोऽप्येतानि लभतामिति भावः । विश्वामित्रवाक्यानन्तरं रामस्ताडकावधाय निष्क्रान्तः । न च तत्रात् प्रतिनिवृत्तः । अतस्तत्रैवयवनिकान्तरेऽपश्य इति यदेव सूचितम् ।

(100) झटिति विद्यायाः प्रकाशनात् आविर्भावात् उन्मीलिता प्रज्ञा यस्य तं शक्तिभिः अप्रतर्क्यैश्च अचिन्त्यैः अचिन्त्यशक्तिसम्पन्नम् आत्मानं ज्योतिर्मयमिव मन्ये ।

(101) विश्वामित्रस्य अभ्यनुज्ञानात् आदेशात् वयं त्वयि आयतामहे

Digitized by Google

मन्ये। (102) देवदाभो मन्त्रेन्ति। अहो अच्छरिअं अच्छरिअं।

नेपथ्ये।

(103) भगवन्तो दिव्याङ्गनिकायाः।
विश्वामित्रात् प्राप्य विघ्नस्य मित्रात्
युष्मेर्युक्तानद्य रामः कृतार्थः।
ध्यातैर्ध्यातैः संनिधेयं भवद्भिः
स्वं स्वं स्थानं यात यूयं नमो वः॥ ५०॥

अप्सरा। (104) आर्यवचनादन्तरितान्यस्मानि।

राजा। (105) भगवन्महाङ्गतनिधे कुशिकनन्दन! नमस्ते।

त्वदधीनाः। ध्याता यज्ञरक्षेण यद्वः अस्मान् प्रत्यधि आदिश किं कर्म इति शेषः।

(102) देवताः मन्त्रयन्ति अहो आश्चर्यमाश्चर्यम्। देवताः अप्सरदेवताः।

(103) दिव्याङ्गनिकायाः दिव्याङ्गसंघाः। अद्य रामः अहं युष्मैः विघ्नस्य मित्रात् विश्वामित्रात् युष्मान् प्राप्य कृतार्थः अस्मि। ध्यातैर्ध्यातैः। "मित्रे हिः" (पा०. ८. १. ४.)। स्मृतैः भवद्भिः संनिधेयम्। यदा यदाऽहं युष्मानाह्वयामि तदा तदा मत्संनिधिमागच्छत इति भावः। यथोक्तं वाल्मीकिना "मां भजध्वं स्मृतामीति सर्वाप्सरोभ्यभाषत।" यूयं स्वं स्वं स्थानं यात गच्छत वो युष्मभ्यः नमः।

(104) आर्यस्य रामस्य वचनात् अन्तरितानि तिरोहितानि।

(105) महतामङ्गानां निधिः आधारः महाङ्गतनिधिः। उज्ज्वलितानि दीप्तानि तपांसि यस्य तस्य। तेजसां राशिः चयः तेजोराशिः तस्य

ज्वलिततपसस्तेजोराशेर्जगत्यमितौजस-
स्तव निरवधौ माहाभाग्ये ह्यतस्तुतिसाहसः ।
प्रमितविषयां यक्तिं विन्दन्न वाचि न चेतसि
प्रतिहतपरिस्पन्दः स्तोता विषद्य क्षिणीयते ॥ ५१ ॥

(106) सृहयामि युष्मदनुगृहीतरामभद्रालङ्कृताय राम्ने दशरथाय । वयं पुनरार्येण वञ्चिताः यद्दैष्टेयेन जामात्रा न संयुज्यामहे ।

विश्वा । किमद्यापि सम्भावनेयमस्मासु ।

राजा । शान्तम् ।

विश्वा । तेन हि——

तेजोमयस्य । जगति त्रिभुवने अमितम् अनन्तम् ओजः अनुभावो यस्य तस्य । तव नास्ति अवधिः सीमा यस्य तस्मिन् अनन्ते माहाभाग्ये माहात्म्ये । ह्यतं स्तुतिरेव साहसम् । स्तोता तव प्रशंसकः न वाचि न चेतसि प्रमितविषयां यक्तिं विन्दन् वाक्येन मनसा वा सम्यक्तां सामर्थ्यं न दधा विषद्य विषण्णो भूत्वा क्षिणीयते खिद्यतो भवति । किम्भूतः स्तोता प्रतिहतः विनष्टः परिस्पन्दः कृत्यम्यः यस्य सः । क्षीयते इति पाठोऽस्माभ्यो न रोचते ।

(106) युष्माभिः अनुगृहीतेन प्रसादितेन रामभद्रेण अलङ्कृताय युष्माय दशरथाय सृहयामि । "सृहेरीप्सितः" पा०. १. ४. ३६. इति चतुर्थी । यत दैष्टेयेन जामात्रा न संयुज्यामहे दैष्टेयं जामातरं न लभामहे भिषधतुर्भङ्गासम्भवत्वादिति शेषः ।

Digitized by Google

(107) अनुध्यानमात्रोपस्थानदायि यः ।
रामभद्रस्य पुरतः प्रादुर्भवतु तद्धनुः ॥ ५२ ॥

राजा । एवमस्तु । ध्यात्वा प्रणमति ।

राक्ष । खगतम् । एभिरन्यदेव त्रिमपि प्रस्तुतम् । प्रकाशम् । भोः कुशध्वज ! कियच्चिरं विचार्यते ?

राजा । उक्तमेव । आर्यो जानातीति ।

राक्ष । प्रत्युक्तमेतत् सोऽप्याह कुशध्वजो जानातीति ।

राजा । एवमेतत् ।

नेपथ्ये कलकलानन्तरम् ।

(108) स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकद्दिविषदां तेजोभिरिद्धं धनुः ।

---

(107) अनुध्यानमात्रं स्मरणानन्तरमेव उपस्थानं सन्निधानं ददातीति अनुध्यानमात्रोपस्थानदायि तत् माहेश्वरं धनुः रामभद्रस्य पुरतः आविर्भवतु उपतिष्ठतु ।

(108) स्फूर्जद्भिः गर्जद्भिः विद्युद्भिरिति भावः वज्रसहस्रैः निर्मितमिव त्रिपुरस्य दुर्गस्य अन्तकृत् क्षयकरं दिवि स्वर्गे सीदन्ति तिष्ठन्तीति दिविषदो देवाः तेषां तेजोभिः दृब्धं दीप्तं धनुः रामस्य अग्रतः पुरतः प्रादुर्भवति । अनेनैव देवतेजोविवर्द्धितेन धनुषा शरं नियुज्य मयदानवस्य त्रिपुरदुर्गमधाक्षीत् हर इति ध्वनिः । यथोक्तं परशुरामेण रामाय रामायणे "इमे द्वे धनुषी राम दिव्ये लोकत्रये श्रुते । विश्वकर्मकृते सारे अप्रमेयबलप्रदानमे । तयोरेकं त्रिपुरघ्नाय दत्तं राम युयुत्सवे । त्रिपुरं जघ्नुषे देवैर्भग्नं काकुत्स्थ यत् त्वया ॥" इति १, ७७.

Digitized by Google

सीता । अपवार्य । सम्यदं संसद्दम्हि ।

विश्वा । राजानं प्रति ।

गुरुडारः कलभेन यहच्चले वल्लेन दोर्दण्डकः

तस्मिन्नाहित एव———————————

अर्मि । अवि णाम एव्वं भवे ।

राजा ।————गर्जितगुणं कृष्ट्वा———

अर्मि । हृष्टां लज्जितां सीतामालिङ्ग्य । दिट्ठिआ वड्ढामो ।

राजा । साङ्गुतं————————भग्नञ्च तत् ॥ ५३ ॥

राघ । स्वगतम् । (109) अहो ! दुरात्मनो रामहतकस्य सर्वङ्कषः प्रभावः !

११–१४ । यथा च मात्स्ये "ततो बाणं त्रिधा देव स्त्रिदैवतमयं हरः । सुमोच त्रिपुरे हर्तुं त्रिनेत्रस्त्रिदशाधिपः । सोऽपीषुः पत्रपुटवद्भग्ना तन्नगरत्रयम् ।" इति ११६, ४५,–५३, । यद्वत् यथा कलभेन गजशावेन गुरुडारः हस्तः अचले पर्वते तद्वत् वल्लेन रामभद्रेण दोः भुज एव दण्डः दोर्दण्डकः तस्मिन् धनुषि आहितः दत्त एव तत् धनुः गर्जितः गुणः ज्या यस्मिन् कर्मणि तद्यथा स्यात्तथा तत् कृष्टम् आकृष्ट्वा भग्नञ्च । रामो धनुर्भङ्गानन्तरमेव तदाकृष्य बभञ्जेत्यर्थः ।

साध्वसं संयमिताऽस्मि । अधुना सन्देहं गताऽस्मि रामो धनुर्भङ्गश्रान्तो वा न वेति । अपि नामैवं भवेत् । दिष्ट्या वर्द्धामहे । रामस्वामेन ।

(109) रामहतकस्य दग्धरामस्य सर्वं कर्षति निष्पीड़यतीति सर्वङ्कषः प्रभावः सामर्थ्यम् ।

Digitized by Google

अन्यच्च।——

(110) *दोर्लीलाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्गत-
† ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।
द्राक्पर्य्यस्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो! नाद्यापि विश्राम्यति॥५४॥

राजा। (111) सहर्षोन्मादमिव।

एह्येहि वत्स रघुनन्दन रामचन्द्र!
चुम्बामि मूर्ध्नि चिराय परिष्वजे त्वाम्।

---

* दोर्लीलादलितेन्दुशेखरधनुर्विख्यातविक्रान्तिना। अ०. रा०. ३. ५७।
† प्रारम्भार्यसभःप्रशस्तिसदृशैर्ज्याघातघोषैर्दिशः। प्र०. रा०. ३. ४२।

---

(110) अहो कथं दोर्भ्यां भुजाभ्यां लीलया खेलया अञ्चितस्य आकुञ्चितस्य चन्द्रशेखरस्य इन्दुमौलेः शिवस्य धनुर्दण्डस्य अवभङ्गात् द्वैधीकरणात् उद्गतः उत्थितः आर्यस्य रामस्य बालचरितस्य शैशवचरितस्य प्रस्तावनायाः प्रारम्भस्य डिण्डिमः पटह इव टङ्कारध्वनिः धनुष्टङ्कारनादः अद्यापि न विश्राम्यति न शाम्यति। किम्भूतो ध्वनिः द्राक् झटिति पर्यस्ताभ्यां विघटिताभ्याम् इति भावः कपालसम्पुटाभ्यां खण्डाकाराभ्याम् अवयवाभ्यां मिलतः युञ्जतः ब्रह्माण्डभाण्डस्य ब्रह्माण्डरूपस्य उदरे मध्ये भ्राम्यत् पिण्डितः पिण्डीभूतः चण्डिमा चण्डता प्राबल्यमिति यावत् यस्य सः। पुरा किल भगवान् ब्रह्मा ब्रह्माण्डं द्विधाकरोत्। यथा मनुः "स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा।" १. १२.। तयोः खण्डयोरनेन टङ्कारध्वनिना संयोगो जनित इति कवेरभिप्रायः। केचित् पर्यस्तं 'पर्याप्त' मिलत् च 'मितं' पठन्ति।

(111) सहर्षोन्मादमिव हर्षेण उन्मत्त इव। चुम्बामि चुम्बनं

आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥ ५५ ॥

प्रविश्य । रामः । (112) कथमतिवात्सल्यादतिक्रमोऽपि ?

विश्वा । गुरुर्भवान् गर्भरूपश्च ते वत्सो रामभद्रः ।

राजा । तं प्रणम्य । भगवन् !

(113) रामोपपत्त्या सीतायाः पूर्णास्ता युष्मदाशिषः ।
अस्मिन्नेवोत्सवे दत्ता लक्ष्मणाय मयोर्मिला ॥ ५६ ॥

कन्ये । (114) साधम् । अस्मद्दे दिष्टम्द्द ।

राजा । स्वागतम् । दृष्टं दृष्टव्यम् ।

विश्वा । सुष्ठु शिरसा वहु मन्यामहे । वत्स्यथेवस्त्वसि ।

राजा । नन्वाज्ञापय ।

विश्वा । दुहितरौ ते माण्डवी श्रुतकीर्त्तिश्च भरतशत्रुघ्नाभ्यामर्थये ।

करोमि चिराय त्वां परिष्वजे आलिङ्गामि वा अथवा दिवानिशं हृदि आरोप्य उद्वहामि बिभर्मि । अथवा ते तव चरणपुष्करकद्वयं पद्मकमलयुगलं वन्दे ।

(112) अतिक्रमो मर्यादालङ्घनम् । गुरुणा शिशोः चरणवन्दनं न युक्तमिति भावः ।

(113) रामस्य उपपत्त्या परिणयेन सीतायाः ताः युष्मदाशिषः युष्माकं आशीर्वादाः पूर्णाः सफलाः । अस्मिन्नेव उत्सवे सीतापरिणयमङ्गले मया ऊर्मिला लक्ष्मणाय दत्ता ।

(114) अस्मद्दे अस्मद्द दत्ते स्वः ।

Digitized by Google

राज्ञ। (115) स्वगतम्। पश्यत वनेचरस्य सतः क्षत्रिये कुटुम्बवैजात्यं ब्राह्मणस्य।

राजा। भगवन्! किमत्र किञ्चिद्विचार्यमस्ति? किन्त्वत्र वस्तुनि परवानस्मि।

विश्वा। कैन।

राजा। एकेन तावद्भगवतैव।

विश्वा। अथान्येन केन?

राजा। आर्य्यसीरध्वजेन गौतमेन शतानन्देन च।

विश्वा। (116) अपहस्य। सीरध्वजशतानन्दयोरहं विवेक्ता।

राजा। भगवानिदानीं जानाति—

(117) जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च कल्याणप्रकृतिर्भवान्॥ ५७॥

विश्वा। (118) वत्स शुनःशेफ! अयोध्यां गत्वा ब्रूहि भगवन्तमृक्षद्वचनाद्वसिष्ठम्।

---

(115) वने चरतीति वनेचरो वनी तापस इति भावः। कुटुम्बस्य क्षातैर्वैजात्यं पक्षपातः।

(116) विवेक्ता विचारकः। मम मते सीरध्वजशतानन्दौ तिरेतामिति भावः।

(117) कल्याणप्रकृतिः शिवस्वभावः। कस्य न प्रियः सर्वेषां प्रिय इत्यर्थः।

(118) "शुनःशेफो वै यूपे नियुक्तो देवतास्तुष्टाव। तस्येह देवताः

Digitized by Google

एताश्चतुर्भ्यो रघुनन्दनेभ्यो निमेर्गृहे राजसुताश्चतस्रः ।
वसिष्ठवद्गौतमवच्च भूत्वा दत्ताः प्रतीष्टाश्च समं मयैव ॥ ५८ ॥
(119) तदुपनिमन्त्र्य सर्वान्महर्षीन्महाराजदशरथस्यानुयातो वैदेहनगरमायच्छ । तदा मम मैथिलस्य च राज्ञो यज्ञसमाप्तौ विततगोदानमङ्गलाः कुमाराः परिणेष्यन्तीति ।

पार्थं विसृष्टवन्तः । तस्मात्तिज ऊर्ध्वमेवाऽयं पुत्रोऽस्तिति । तानाह न सम्मेदे । ते सम्मदयामासुरेव एव यं कामयेत तस्य पुत्रोऽस्तिति । तस्येड विश्वामित्रो होतासीत् । तस्य पुत्रत्वमियाय" इति वसिष्ठसंहिता ।

निमेर्गृहे जनकगृहे । एता चतस्रो राजसुताः सीतोर्मिलामाण्डवीश्रुतकीर्तयः । वसिष्ठवत् गौतमवत् शतानन्दवत् च भूत्वा मयैव समं युगपत् चतुर्भ्यो रघुनन्दनेभ्यो रामलक्ष्मणभरतशत्रुघ्नेभ्यो दत्ताः प्रतीष्टाश्च परिगृहीताश्च । शतानन्दवत् दत्ता वसिष्ठवच्च स्वीकृता इत्यर्थः । प्रथमस्य जनकस्य द्वितीयस्य दशरथस्य पौरोहित्यात् ।

(119) दशरथस्यानुयातः दशरथमनुगच्छन् । "लक्षणहेत्वोः क्रियायाः" (पा०. ३. ३. १३७.) इति षष्ठी । यज्ञसमाप्तौ यज्ञान्ते । विततं विस्तारितं निवर्तितमिति भावः गोदानमेव मङ्गलं येषां ते विततगोदानमङ्गलाः परिणेष्यन्ति विवाहं करिष्यन्ति । गोदानसूक्तं रामायणे यथा "पुत्राणां प्रियपुत्रः स चक्रे गोदानमुत्तमम् ॥ गवां शतसहस्रं हि ब्राह्मणेभ्यो नरेश्वरः । एकैकशो ददौ पुत्रानुद्दिश्य तान् पृथक् पृथक् ॥ पयस्विनीनां हि गवां सवत्सानां सुवर्चसाम् । ददौ शतसहस्राणि चत्वारि रघुनन्दनः ॥ ततस्तैः कृतगोदानैर्वृतः पुत्रैर्महीपतिः । लोकपालैरिव बभौ वृतः साक्षात् प्रजापतिः ॥" १. ७४. २७-३०. ।

Digitized by Google

कुमा। स्वगतम्। प्रियात् प्रियतरं नः।

कन्ये। (120) दिट्ठिआ अवि पआसो दाणिं भइणिआणं भविस्सदि।

राक्ष। (121) अद्यापि भोः! शृणुत धर्माचरम्। अनर्थ एव वो यत् कन्येयमन्यस्मै दीयत इति।

(122) *पौलस्त्योऽपि नयेन याचत इति श्लाघ्येऽपि वो नादरः
सम्बन्धे सति यत् त्रिलोकपतिना सख्यं न तत्र स्पृहा।
गन्तव्या पुनरन्यथैव नियतं लङ्काऽपि नः सीतया
तस्मा भूदिह वः पुरन्दरपुरीवन्दिप्रसक्तो विधिः॥५९॥

---

*पौलस्त्यः प्रणयेन याचत इति ..... । वा०. रा०. २. २०.।

---

(120) दिष्ट्याऽपि प्रवास इदानीं भगिन्योर्भविष्यति। भगिन्योः श्रुतकीर्तिमाण्डव्योः। अस्माभिः सह तयोरपि दशरथगृहे वासो भविष्यतीति भावः।

(121) अद्यापि सीतादानेऽपि। धर्माचरं परमार्थं तत्त्वमिति यावत्। अनर्थः अनिष्टम्। अन्यस्मै रावणादिति शेषः रामायेति भावः।

(122) पौलस्त्यः पुलस्त्यपौत्रो रावणोऽपि नयेन विनयेन याचते प्रार्थयत इति श्लाघ्ये प्रणयेऽपि विषये वो युष्माकं नादरः। त्रिलोकपतिना त्रिभुवनस्वामिना तेन सह सम्बन्धे विवाहसम्बन्धे सति यत् अतिश्लाघ्यं सख्यं तत्र तस्मिन् सौहार्दे न स्पृहा आकाङ्क्षा भवतामिति शेषः। पुनः किन्तु सीतया नियतम् अवश्यम् अन्यथैव बलेन लङ्काऽपि गन्तव्या। सीता नियतं हरिष्यत इति भावः। तत् वो युष्माकम् इह

Digitized by Google

नेपथ्ये कलकलः ।

राजा । (123) तत् कथमेतावकालपर्जन्यभीमौ द्वन्द्वेन धावतः ?

विश्वा । (124) एतौ सुबाहुमारीचौ पुत्रौ सुन्दोपसुन्दयोः ।
रावणानुचरौ घोरौ यज्ञप्रत्यूहकारिणौ ॥ ६० ॥
तद्वत्सौ रामलक्ष्मणौ हन्यतामेष यज्ञप्रत्यूहः ।

तौ । यथाज्ञापयसि इति विकटं परिक्रामतः ।

कन्ये । (125) एत्थ दाणिं कहं ।

राज्ञा । (126) हन्त साध्विव सम्पन्नं विपर्य्यस्तो विधिर्भवेत्
तद्दीक्ष्य कार्य्यपर्य्यन्तं माल्यवत्युपवेदये ॥६१॥

अस्मिन् विषये पुरन्दरस्य इन्द्रस्य पुर्याः नगर्याः अमरावत्याः वन्दिषु प्रसक्तो विधिः वन्दिग्रह इति भावः मा भूत् । यथा रावणोऽमरावत्यां सुरस्त्रियः वन्दीचकार तद्वत् सीताया वन्दिग्रहात् प्रागेव तां तस्मै समर्पयेत्यभिप्रायः ।

(123) अकालपर्जन्यवत् अकालमेघवत् भीमौ भीषणौ अकालपर्जन्यभीमौ । द्वन्द्वेन सानुचरौ ।

(124) मारीचस्ताडकागर्भजः सुन्दपुत्रः । सुबाहुरुपसुन्दपुत्रः । यज्ञप्रत्यूहकारिणौ यागविघ्नकरौ । हन्यतां निवार्यताम् ।

(125) अत्रेदानीं कथम् । किमुपस्थितमित्यर्थः ।

(126) हन्त अहो साधु इव सम्पन्नं शोभनं कृतं मारीचसुबाहुभ्यामिति शेषः । विधिः यज्ञो विपर्यस्तः उच्छिन्नो भवेत् । आशंसायां लिङ् । तत् कार्यपर्यन्तं कार्यसमाप्तिम् एतयोः कर्म इति भावः । वीक्ष्य दृष्ट्वा माल्यवति उपवेदये माल्यवन्तं रावणमन्त्रिणं निवेदयामि ।

Digitized by Google

राजा । (127) धनुरास्फालयन् । वत्स रामभद्र ! वत्स लक्ष्मण ! अप्रमत्तः प्रमत्तं विजयस्व । अयमहं परागत एव ।

विश्वा । (128) विहस्य सहस्यमाहम् ।

राजन्नितो ह्येहि सहानुजस्य रामस्य पश्याप्रतिमानमोजः ।
ब्रह्मद्विषो ह्येष हिनस्ति सर्वान्नाथर्वणस्तीव्र इवाभिचारः॥६२॥

[इति निष्क्रान्ताः सर्वे ।

(129) इति कौमारो नाम प्रथमोऽङ्कः ।

---

(127) आस्फालयन् चालयन् । अप्रमत्तः प्रमादहीनः सावधान इति यावत् । विजयस्व "विपराभ्यां जेः" (पा०. १. ३. १९) इत्यात्मनेपदम् ।

(128) सहस्यमाहं हस्यं ग्टहीत्वा । राजन् इतो अत्र एहि आगच्छ सहानुजस्य सलक्ष्मणद्वितीयस्य रामस्य अप्रतिमानम् अनुपमम् ओजः प्रभावं पश्य । एष रामो हि आथर्वणः अथर्ववेदस्य तीव्राभिचार इव सर्वान् ब्रह्मद्विषः वेदविद्वेषिणः हिनस्ति पीडयति । "इन्द्रस्य वज्रोऽपहन्तु रक्षस आरादिहेडा इषवः पतन्तु रक्षसाम्"(२. १. ४.) इत्यादयोऽभिचारमन्त्राः ।

(129) कौमारः कौमारविषयक बालचरितसम्बन्ध इति भावः ।

श्रीमदान्ध्रराजेन दुर्लभाभिधेन तुना ।
अतिक्रान्तेन कौमारं कौमारो विहितो मुदा ॥

Digitized by Google

द्वितीयोऽङ्कः ।

ततः प्रविशत्युपविष्टः सचिन्तो माल्यवान् ।

माल्य । (1) भोः *यतः प्रभृति सर्वमायात् सिद्धाश्रम-
ब्रह्मान्तमश्रौषं तत आरभ्य———

(2) दूराद्दवीयो धरणीधराभं यस्ताटकेयं लघवद्धाधूनोत् ।
हन्ता सुबाहोरपि ताडकारिः स राजपुत्रो हृदि बाधते माम् ॥१

(3) तदनुप्लवानां च भूयसां क्षणेनैकेन बध इति किमे-
तदाश्चर्यम् ।

---

*यतः प्रभृति.....पुरीधसा कथ्यमानं ककुत्स्थकुलकुमारस्य मानुष्यकातिशय—
मश्रौषं ततः प्रभृति कष्टां दशामनुभवामि । अ०. रा०. ४. ।

---

(1) सर्वमायः सीताप्रार्थनायै जनकाय प्रेरितो रावणदूतः । अश्रौषं श्रुतवान् ।

(2) यः धरणीधराभः पर्वतसदृशं ताड़केयं ताड़कानन्दनं मारीचं लघवत् दूराद्दवीयो दूरतरम् अतिदूरमित्यर्थः व्यधूनोत् विचिक्षेप । यथोक्तमध्यात्मरामायणे "रामोऽपि धनुरादाय द्वौ बाणौ सन्दधे द्रुतौ.....। तयोरेकस्तु मारीचं भ्रामयन् शतयोजनम् । पातयामास जलधौ तद्द्भुतमिवाभवत् ॥ द्वितीयोऽग्निमयो बाणः सुबाहुमजयत् क्षणात्.....॥" ६. ७–८ । स सुबाहोः अपि हन्ता विनाशकः ताड़कारिः ताड़कान्तकः राजपुत्रः रामः मां हृदि बाधते पीड़यति । तस्मिन् किं प्रतिविधेयमिति न सम्भावयामीति भावः ।

(3) भूयसां बहूनां तयोः अनुप्लवानाम् अनुचराणाम् । एकेन क्षणेन मुहूर्त्तेनैव । किमेतदाश्चर्यं महद्द्भुतमेतत् ।

Digitized by Google

(4) वीर्य्योत्कर्षैर्यदमृतभुजां निर्ममे पद्मयोनि-
स्तस्य द्वैधं व्यधित धनुषः शाम्भवीयस्य रामः ।
दिव्यामस्त्रोपनिषदमृषेर्यः क्षयाख्यस्य शिष्या-
द्विश्वामित्राद्विजयजननीमप्रमेयां प्रपेदे ॥ २ ॥

(5) प्रसह्य रावणद्विष्टमस्मदूतस्य पश्यतः ।
अस्खदानाद्भुतं काले प्रौढेन मुनिना कृतम् ॥ ३ ॥

यतः । (6) *सीतावन्द्यिग्रहपरिभवस्तस्य राज्ञो निरस्तो
नीतं चास्मान् प्रति शिथिलतामेकमुख्यं सुराणाम् ।

---

*वैदेह्या प्रसह्यापहारः । अ०. रा०. ४. ।

---

(4) पद्मयोनिः पद्मभूर्ब्रह्मा यस्य धनुः अमृतभुजाम् अमृताशिनां देवानां वीर्यस्य उत्कर्षैः परभागैर्निर्ममे चकार । रामायणे तु विश्वकर्मणा कृतमित्युक्तम् । रामः तस्य शम्भोः शिवस्य इदं शाम्भवीयं तस्य धनुषः द्वैधं व्यधित तद्धनुर्द्विधा चकार । व्यधितेति विपूर्वकधाधातोरात्मनेपदे लुङि रूपम् । यः क्षयाख्यस्य शिष्यात् ऋषेः विश्वामित्रात् अप्रमेयाम् अनन्तां विजयजननीं विजयकरीं दिव्याम् अस्त्राणाम् उपनिषदं विद्यातत्त्वं प्रपेदे लेभे । १. ८६. टीकायामेतदुव्याख्यातमस्माभिः ।

(5) अस्मदूतस्य सर्वमायस्य पश्यतः पुरतः । अनादरे षष्ठी पा० २. ३. १८. । प्रौढेन प्रगल्भेन मुनिना विश्वामित्रेण प्रसह्य हठात् काले अस्त्रदानेन अद्भुतं रावणस्य द्विष्टम् अप्रियं कृतम् ।

(6) तस्य राज्ञो जनकस्य सीतायाः सुतायाः वन्द्यिग्रहः वन्द्यित्वेन ग्रहणम् अपहरणमित्यर्थः स एव परिभवः न्यक्कारः निरस्तः दूरीकृतः । सीतायां वन्द्यिग्रहो न बभूवेति भावः । सुराणां देवानाम् ऐकमुख्यम् ऐकमाधान्यं च अस्मान् प्रति शिथिलतां नीतं शिथिलीकृतम् । न ते

Digitized by Google

नान्दीनादप्रभृति हि कृतं मङ्गलं तैस्तदानीं
सर्वं प्रायो भजति विकृतिं भिद्यमाने प्रतापे ॥ ४ ॥

कथ वत्सा शूर्पणखा प्राप्ता ।

प्रविश्य शूर्पणखा । (7) जेदु जेदु मादामहो ।

माल्य । (8) वत्से ! आस्यताम् । का राजसन्निधौ वार्त्ता ?

शूर्प । (9) णिवुत्ताइं किल तहिं पाणिग्गहणाइं । अण्णं च । अगत्थिमहेसिणा रामस्स मङ्गलोवहारिअं माहिन्दं धणुव्वरं अणुप्पेसिदम् ।

रावणं यथापूर्वं मानयन्तीति भावः । तदानीम् अस्तदानकाले तैः सुरैः हि नान्दीनादप्रभृति मङ्गलं कृतम् । यथोक्तं प्रथमेऽङ्के "दिष्ट्या देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च ।" प्रतापे भिद्यमाने सति सर्वं भृत्यादि विकृतिं भजति विक्रियते । सर्वमेतद्दानफलमित्याशयः ।

(7) जयतु जयतु मातामहः । रावणस्य सहोदरी शूर्पणखा ।

(8) आस्यताम् उपविश्यताम् । राजसन्निधौ जनकान्तिके ।

(9) निवृत्तानि किल तत्र पाणिग्रहणानि सीताया इति शेषः । अन्यच्च अगस्त्यमहर्षिणा रामस्य मङ्गलोपहारं माहेन्द्रं धनुर्वरमनुप्रेषितम् । महेन्द्रस्य इदं माहेन्द्रम् । रामायणे तु वनगमनानन्तरमगस्त्येन वैष्णवधनुर्दानं पठ्यते । "अर्चयित्वा यथान्यायं"मगस्त्य आह "राघवम् ।" धनुर्वरमिदं दिव्यं वज्रहेमपरिष्कृतम् । वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥ ...इदं धनुः सहस्रीरं... । जघान प्रतिगृह्यैव वज्रं वज्रधरो यथा । पुरा चोक्तोऽसि इन्द्रेण..... ॥ यदा राम इहागच्छेत् तवैवेदं धनुः ॥" रा०, २, १८, २७,-४१,-४२,।

Digitized by Google

माल्य। (10) यानि भुवनेष्वतर्क्यसामर्थ्यान्यायुधानि तानि रामे ब्रह्मर्षिभ्यः परिणमन्ति। सचिन्तम्।

अमोघमस्त्रं चत्रस्य ब्राह्मणानामनुग्रहः।
दुरासदं च तत्तेजः क्षात्रं च ब्रह्मसंयुतम् ॥ ५ ॥

सूर्प। (11) माणुसमेत्तए वि एत्तिए का चिन्ता ?

माल्य। वत्सो मा मैवम् —

(12) उत्पत्त्यैव हि राघवः किमपि तद्रूपो जगत्यद्भुतं,
मर्त्यत्वेन किमत्र यस्य चरितं देवासुरैर्गीयते।
वस्तुष्वादधते च शक्तिमृषयो देवाश्च तर्कोत्तरां
मर्त्यादेव वरप्रदानसमये ब्रह्मा भयं नो जगौ ॥ ६ ॥

---

(10) अतर्क्यम् अचिन्त्यम् अतिमहदिति भावः सामर्थ्यं शक्तिः येषां तानि आयुधानि अस्त्राणि। परिणमन्ति परिपाकं गच्छन्ति। रामस्तानि लभत इति भावः। ब्राह्मणानाम् अनुग्रहः क्षत्रस्य अमोघम् अव्यर्थम् अस्त्रम्। तत् च क्षात्रं ब्रह्मसंयुतं च ब्राह्मणानुग्रहदीप्तं तेजः दुरासदं दुर्धर्षम्।

(11) मानुषमात्रेऽप्येतावती का चिन्ता।

(12) तद्रूपः तादृशः राघवः रामो हि जगति पृथिव्याम् उत्पत्त्या जन्मना एव किमपि अद्भुतम् आश्चर्यम्। यस्य चरितं देवासुरैः गीयते श्रूयते। अत्र विषये मर्त्यत्वेन किं मानुषगणनासाध्वीति भावः। ऋषयो देवाश्च वस्तुषु तर्कोत्तराम् अतर्क्यां शक्तिं च आदधते न्यस्यन्ति। तर्कोत्तरामिति पाठे स एवार्थः। ब्रह्मा वरप्रदानसमये नः अस्माकं भयं मर्त्यादेव मानुषादेव जगौ उवाच। रावणो हि ब्रह्मणः सका-

Digitized by Google

अपिच

(13) निसर्गेण स धर्मस्य गोप्ता धर्मद्रुहो वयम् ।
अर्थेऽत्रा विरोधः शक्तेन जातो नः प्रतियोगिना ॥ ७ ॥

भूप (14) की सन्देहो ? जह दसमुहो इसिमउलिएहिं विंसदिट्ठीहिं ओहीअमाणलोललोअणो णमन्तवअणो वट्टदि तह जाणामि दारुणो मे हिअअवेअणावेओ ण एव्वं विरमिस्सदित्ति ।

माल्य । अहो नु खलु भोः !

मादमरत्वमनवाप्य तम् "उवाचेदं ब्रह्माङ्गिरसाग्रतः । सुपर्णनाग-यक्षाणां दैत्यदानवरक्षसाम् । अवध्योऽहं प्रजाध्यक्ष देवतानाञ्च शाश्वतम् ।" रा०, ७, १०, १६ । ब्रह्मा च तमेतं वरं ददौ । अत एवान्येभ्यो मनुष्यादिभ्यस्तस्य मरणं सूचितवानिति श्रीकण्ठस्याभिप्रायः ।

(13) स रामः निसर्गेण प्रकृत्या धर्मस्य गोप्ता । वयं राक्षसा धर्मद्रुहः धर्मद्विषः । शक्तेन समर्थेन प्रतियोगिना प्रतिद्वन्द्विना नः अस्माकम् अर्थे : उचितः विरोधः विवादः जातः ।

(14) कः सन्देहः ? यथा दशमुखः रैवन्मुकुलिताभिर्विंशतिदृष्टिभि-रपह्नियमाणलोलालोचनो नमत्वदनो वर्तते तथा जानामि दारुणोऽस्य हृदयवेदनाऽनुवेगो नैवं विरमिष्यतीति । कः सन्देहः निःसंशयमेतत् । रैवन्मुकुलिताभिः खल्पविकसिताभिः । अपह्नियमाणानि गुप्यमाणानि अस्फुटदर्शनानीति भावः लोलानि चञ्चलानि लोचनानि यस्य सः । नमन्ति अवनतानि वदनानि दशमुखानि यस्य स नमत्वदनः । हृदयस्य वेदनायाः अनुवेगः प्रसरः । एवं प्रतिकारेण विना ।

(15) वन्द्या विश्वसृजो युगादिगुरवः स्वायम्भवाः सप्त ये
वैदेहस्य वयं च ते च किमहो ! सम्बन्धिनो न प्रियाः।
तन्नामास्तु दुरासदेन तपसा दीप्तस्य दीप्तश्रियः
पौलस्त्यस्य जगत्पतेरपि कथं जाता हृदि न्यूनता ॥८॥

अथवा।

(16) अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्वेष्यान् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षं च परस्य मानयशसोर्विध्वंसनं चात्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो दृप्तः कथं स्पृशते॥९॥

---

(15) युगादौ कल्पादौ गुरवः पूज्याः युगादिगुरवः विश्वं जगत् सृजन्ति निर्मिमते इति विश्वसृजः प्रजापतयः। ते सप्त वन्द्याः स्वयम्भोः ब्रह्मणः अपत्यानि स्वायम्भवाः मनवः। "स्वायम्भुवो मनुः पूर्वो मनुः स्वारोचिषस्तथा। औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा। सप्तैते मनवोऽतीताः स्वात्मतन्तु रवेः सुतः। वैवस्वतोऽयं यस्तैतत् सप्तमं वर्ततेऽन्तरम्॥" इति वि०, २, १, ६–७। किमहो किमाश्चर्यं ते च वयं च सम्बन्धिनो वैदेहस्य न प्रियाः जनकाय न रुरुचिरे। रावणो हि पुलस्त्यस्य नप्ता। अतस्तत्सम्बन्धेन प्रजापतीनामपि सम्बन्धः। तन्नाम अस्तु तद्विषयं न किञ्चिद्ददामि। दुरासदेन दुर्धर्षेण च तपसा दीप्तस्य दीप्तश्रियः भूरिसम्पदः जगत्पतेः पौलस्त्यस्य रावणस्यापि हृदि कथं न्यूनता अवमानना जाता सीताप्रणयभङ्गादिति शेषः।

(16) अर्थित्वे प्रकटीकृतेऽपि याचितायामपि सीतायां प्रभोः स्वामिनो रावणस्य न फलप्राप्तिः न सीतालाभः। प्रत्युत तद्विपरीतमेव विरुद्धचरितो रावणद्वेष्टा दाशरथी रामः द्वेष्यान् रक्षो निघ्नन् तया

नैपथ्यार्थं प्रविष्टः प्रतीहारः । (17) यः परशुरामस्य युष्माभिर्वार्त्ताहरः प्रहितः तेनेदं तमालरसविन्यस्ताक्षरं तालीपत्रमुपनीतम् ।

[उपस्थाप्य निष्क्रान्तः ।

सूत्र । (18) गृहीत्वा वाचयति । स्वस्ति महेन्द्रद्वीपात् परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति ।

अन्यथा युक्तः । जगत्पतिः हरिः उद्धतः दृप्तसखो रावणः कथं केन प्रकारेण परस्य रामस्य उत्कर्षम् उन्नतिम् आत्मनो मानयशसोः विध्वंसनं अयं क्षीरत्वं च लभ्यते वहते । अत्र क्षीरत्वमिति पदं निराकाङ्क्षम् । क्षीरत्वस्येति पाठस्यदोषः । क्षीरत्वस्य च विध्वंसनं परदूत्वगमनं कथं लभ्यत इत्येतत्पाठार्थः ।

(17) परशुरामस्य परशुरामाय । वार्तां सन्देशं हरति नयतीति वार्ताहरो अङ्गाकरिकः । प्रहितः प्रेषितः । तमालस्य वृक्षस्य रसेन विन्यस्तानि लिखितानि अक्षराणि यत्र तत् तमालरसविन्यस्ताक्षरम् उपस्थाप्य समीपे न्यस्य ।

(18) वाचयति पठति । अभ्यर्हयति पूजयति । इयमेव संस्कृतभाषायां पत्रलिखनरीतिः । भारतवर्षविभागो महेन्द्रद्वीपः । यथोक्तं वैष्णवे "भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कशेरुमान् ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥" २. ३. ६. । कलिङ्ग एव महेन्द्र इति रघुवंशादवगम्यते "उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ।.....प्रतिजग्राह कालिङ्गस्तमस्त्रैर्जयसाधनः" रघुस्तं समरे जित्वा "प्रतिपेदे जयस्त्रियम् । .....स्त्रियं महेन्द्रनाथस्य

Digitized by Google

मूर्ख। (19) कहं पहुव्व सिरीभट्ठक्कमं लिहति।

माल्य। (20) अत्रैव परममाहेश्वरं लङ्केश्वरमभिनन्द्य ब्रवीति विदितमेतद्वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यस्तपोधनेभ्यः प्रतिज्ञातमभयम्। तत्र विराधदनुकबन्धप्रभृतयः केऽप्यभिचरन्तीति श्रुतम्। तत्तान् प्रतिषिध्य सद्वृत्तिमस्मद्वितां च माहेश्वरप्रीतिमनुरुध्यन्तां भवन्तः।

(21) ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।

जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥इति ॥१२॥

जहार मनु मेदिनीम्।" १४. २८–४१। आधुनिकविजयपत्तनसन्निहितः पूर्वघट्टोत्तरांशो मलेन्द्रपर्वत इति च कालिदासवर्णनादेवाधिगम्यते। जामदग्न्यः किल कश्यपाय मही दत्त्वा सागरात्तस्मै मलेन्द्रपर्वते तपश्चचार इति भारते श्रूयते। एतदेव लक्ष्यीकृत्य मलेन्द्रद्वीपः श्रीकण्ठेनात्रोक्तः।

(19) कथं प्रभुरिव श्रीभट्टक्कमं लिखति। कथं किम्। प्रभवो हि भृत्यान् विना श्रीयोगेन केवलैर्नामभिः सम्भावन्ते।

(20) मलेश्वरः शिवो देवोऽस्येति माहेश्वरः। परमो निरतिशयो माहेश्वरः शिवभक्तः परममाहेश्वरः। लङ्केश्वरो लङ्कापती रावणः। अस्माभिः अभयं प्रतिज्ञातमित्यन्वयः। तान् राक्षसान् प्रतिषिध्य निषिध्य भवन्तः सद्वृत्तिं साध्वाचारम् अस्मद्वितां च माहेश्वराणां शैवानां प्रीतिम् अनुरागम् अनुरुध्यन्ताम् अनुसरत। अनेन प्रतिषेधेन शैवोऽहं प्रीतो भवामीति भावः।

(21) ब्राह्मणानाम् अतिक्रमस्य उल्लङ्घनस्य परामर्शस्येति भावः

मूर्धः । (22) इत्थंसिद्धावष्टम्भगम्भीरगुरूपन्यासो उवस्थासो ।

भाख्य । अहो किमुच्यते ? जामदग्न्यः खल्वसौ ।

(23) अभिजनतपोविद्यावीर्य्यक्रियातिशयैर्निजै-
रुपचितशमः सर्वत्यागाद्विरोहतया स्थितः ।
व्यपदिशति नः श्रेयप्रीत्या कथञ्चिदनाख्यया
प्रभुरिव पुनः कार्यं कार्यं भवत्यतिकर्कशः ॥ ११ ॥

[इति चिन्तयति ।

भाख्य । वत्से !

त्यागः तस्मादु निवृत्तिः भवतां राक्षसानाम् एव भूतये श्रेयसे । अनर्थकरो ब्राह्मणातिक्रम इत्याशयः । अन्यथा इतरथा वो मित्रं जामदग्न्यश्च दुर्मनायते संक्षुभ्यति । "सुखादिभ्यः कर्तृवेदनायाम्" इति क्यङ् । पा०. ३. १. १८ ।

(22) इत्थंसिद्धावष्टम्भगम्भीरगुरूपन्यासः । इत्थंसिद्धेन श्लोकश्लिष्टेन अवष्टम्भेन अवसेदेन गम्भीरश्च गुरुश्च उपन्यासः उपक्रमः ।

(23) इत आरभ्य द्वितीयतृतीयाङ्कौ जामदग्न्यचरिततारकितौ । अतस्तदुद्भासाय शिक्षाक्षुब्धो वीरचरितसङ्कृतं जामदग्न्यचरितं भारतादिकमवलम्ब्य संक्षेपेण विव्रियते ।

(क) आसीन्नगधेषु भागीरथ्या जह्नुदार्थां शाखानद्यां कौशिक्यां भोजकटं नाम नगरम् । तत्र विश्रुतविश्वामित्रजनको गाधिर्नृपतिर्बभूव । स्कां०. ना०. । महर्षिर्भृगुनन्दनश्च्यवनसोदरः रुचिकस्तत्तनयां रूपवतीं सत्यवतीं परिणीय तस्यां जमदग्निमजीजनत् । स किल सर्वेषु वेदेषु

समये च धनुर्वेदे परं प्रावीण्यं लब्ध्वा प्रसेनजितं नरपतिमधिगम्य तन्नन्दिनीं रेणुकां परिजग्राह। सोऽपि रामकनिष्ठानु पञ्च तनयान् प्रसूय भर्तुरानन्दं वर्धयामास। अथ रामजननी कदाचित् फलाहारार्थं गतेषु सर्वेषु पुत्रेषु स्नातुं गत्वा जायाभिः सह जले विहरन्तं चित्ररथं दृष्ट्वा मनसाविद्धचेता उदीरिताभिलाषा चिरेण दृष्टं निहन्ता। जमदग्निस्तु तपोबलेन तद्दिग्यायानीतफलमूलेभ्यः सुतेभ्यो मातुर्वधमादिशत्। ज्यायांसश्चत्वारो न येनुस्तदाज्ञायां स्थातुम्। रामस्तु गुरुवचनं शिरसि कृत्वा परशुना मातुर्मूर्धानमाच्छिनत्। ततः पिता पितृभक्तये रामकामं मातुरुत्थानञ्च समादिशत्।" म०. २. ११५—११६—१२२. अ०।

(ख) एवमेव कालेषु हैहयाधिपतिः सहस्रार्जुनः कार्त्तवीर्यः सप्तसागरां पृथिवीं भुजबलमानीतवान्। मात्स्य०. ४३ अ०। कदाचिद्वायुवेगेन सह योद्धुमागत्य गदानिहतसहस्रभटमगमत्। सोऽपि रावणं बद्ध्वा निजपुरीं माहिष्मतीं नीत्वा कारागारिणं चकार। परेद्यु महर्षिणा पुलस्त्येन याच्यमानो राजसेन्द्रं बन्धनान्मोचयामास।" रा०. ७. २१—२२—२३ अ०।

(ग) अथ कदाचिद्भुजबलोन्मत्तः कार्त्तवीर्यो मुनेर्जमदग्नेराश्रमं गत्वा कामदां कामधेनुं दृष्ट्वा लोभाक्रान्तचेतास्तान्तां ययाचे न तु लेभे। ततः क्रोधपरीतो हत्वा जमदग्निं सप्तैकविंशतिप्रहारैर्जीवितावशेषां रेणुकां विनाश्य कानने हृत्वा सुनिधनं धेनुं स्वपुरं प्रतिनिवृत्तः। अस्मिन्नन्तरे सभ्रातको रामः फलाहरणाद्विवृत्तः सर्वं वृत्तान्तं विज्ञाय मातुः प्रहारसंख्यया सर्वक्षत्रियाणां निधनं प्रतिज्ञातवान्। प्रथमं सपुत्रं सबान्धवं कार्त्तवीर्यं यमसदनं प्रेरयामास। ततः सबालवृद्धानां सगर्भस्त्रीणां क्षत्रियाणामेकविंशतिवारान् निधनं चकार। स्कां०. मा०.।

(घ) तदनन्तरं तद्रक्तैः समन्तपञ्चके पञ्च रक्तह्रदांस्त्र्यधत्त। पितरञ्च हयमेधेन तर्पयामास। ऋचिकस्यवनादयस्तत्र दर्शनं दत्त्वा

Digitized by Google

कदनात्तं निवारयामास । ततः सकलां विजितां महीं कश्यपाय दत्त्वा तपस्यायै प्रस्थितः । म० । रा० १. ७७. ६–१० ।

(च) सागरश्च शरैर्भीषयित्वा तपःस्थानं ययाचे । सोऽभ्यसारं कृत्वा तस्याभिवाञ्छितं पूरयामास । स्का० ना० । ततो महेन्द्रशैलेन्द्रे तपः कर्तुं प्रचक्रमे । म० ।

(छ) अथ गतेषु कालेषु शिवधनुर्भङ्गं श्रुत्वा रामचन्द्रं द्रष्टुमागत्य वैष्णवधनुः सन्धातुं नोदयामास । रामोऽपि धनुरादाय शरेण तस्य जितान् लोकान् नाशयामास । रा० १. ७७ ।

(ज) किं पुराणं पुरस्कृत्यवलम्ब्य भार्गवस्य कार्त्तिकेयविजयादिकं चरितं श्रीकण्ठेनोदाहृतं न वयं जानीमहे । बालरामायणे चतुर्थेऽङ्के च दशरथमातलिसंवादे विस्तरेणैतद्वर्णितम् । यथा

"देवस्त्र्यम्बक एष वन्द्यचरणो वन्द्यैः सुधाभोजिना-
मत्राक्षे स शरासनोपनिषदं दातुं धृताचार्यकः ।
दूरावर्जितमौर्व्यः शरभसाः सद्यः प्रतीच्छन्त्यमी
हेरम्बेन च षण्मुखेन च समं रामादयः सुव्रताः ॥१४॥
उपदिशति समानं कर्म्म कृत्तं पिनाकी
समममि च यतन्ते कर्तुमभ्यासमेते ।
तदपि भृगुकुलेन्दुः कामतस्तत्क्रमेऽसौ
नहु भवति निषीतं द्रव्यमेव क्रियाभिः ॥१५॥
इन्द्रारण्यविजृम्भितभ्रुकुटिना भालेन रामे सुतौ
कोदण्डं निविडाकृतौ परिगमादाकाशयत्यग्रतः ।
ज्यानिर्घोषकषायितोदरजुषां गीर्वाणसेनापतेः
सद्यःक्रौञ्चवधां करोति न करद्वन्द्वं पिधानक्रियाम् ॥१७॥
अत्रैते प्रमथाः सरन्ति सभियः कैलासशैलान्तरं
नन्दी भङ्गिरिटिश्च भूतधनुषावस्मे धृषी सुव्रतः ।

Digitized by Google

(24) यदि प्रपद्येत धनुःप्रमाथः
शिष्याय शम्भोर्न तितिक्षते सः ।

केरम्बस्य च सुक्षत्रमत्र मधुपैङ्गासादमाद्यन्मुखं
क्रौञ्चारिः परमेष तिष्ठति कृसनु संख्ये परैः पुंखितैः ॥२२॥
किञ्चित्क्रोपकषायितेन मनसा यावत्क्षतीक्षूनवे
लैयत्तं भृगुनन्दनो निजधनुर्यन्त्रे निधत्ते शरम् ।
क्षेलाचञ्चलडुक्कसंहतमती विघ्नंसिकाङ्क्षीचता
तावद्भ्याकुलनूपुरं भगवती मध्ये स्खडानी स्थिता ॥२५॥
येनात्र खण्डपरशुः परमुत्तमेन
शम्भुः सुमेरुतटताडनखण्डितेन ।
रामाय निर्जितवते तमसौ कुठार-
मक्षौ समर्पयति साङ्गविसंपुटाय ॥२८॥
यः शङ्खगौरैः शरणिमदत्यत् क्रौञ्चशैलः सहेलं
यातुः शम्भोर्धनुरुपनिषत्प्राप्तये पादमूलम् ।
सोऽयं कोपाद्वहति विहितं मार्गणैर्मार्गणस्य
छिद्रद्वारं तिदिवसरसीहंसयातापवित्रम् ॥"२९॥

निजैः स्वकीयैः अभिजनेन कुलेन तपसा विद्यया वीर्येण च क्रियातिशयैश्च अतिरेकिभिः कर्मभिश्च उपचितः वर्द्धितः शम्भो येन सः । सर्वस्य भूमण्डलस्य त्यागात् दानात् निरीहतया औदासीन्येन स्थितः । कथञ्चित् केनाऽपि कारणेन अनास्थया अविश्वासात् शैवप्रीत्या शिवभक्त्यनुरागेण च नः अस्मान् व्यपदिशति निर्दिशति । पुनः कार्ये कार्ये कार्यविशेषे प्रभुरिव अतिकर्कशः तीक्ष्णो भवति । कर्कशोऽपि परशुरामसन्देशः प्रणयमूलमिति भावः ।

(24) यदि धनुषः प्रमाथः भङ्गः शम्भोः शिष्याय जामदग्न्याय प्रपद्येत यदि स रामश्च हरधनुर्भङ्गं शृणुयात् । स न तितिक्षते

Digitized by Google

आयोधने चेदुभयोर्निघातः
संरम्भयोगादति हि प्रियं नः ॥ १२ ॥

25) अन्यतरविजयेऽपि तु क्षत्रियान्तकरश्चेद्राजपुत्रं विजयते, नैनमनभिहत्य रोषणो विरमेत् । एवञ्च सिद्धं नः समीहितं रामनिधनम्। ऐक्ष्वाकस्तु विजयमानो ब्राह्मण्यो न ब्रह्मर्षिमभिहन्यात्, निःश्रेयसापन्ने अपस्कृतमपि शस्त्रं प्रणिदध्यात्। एवञ्च दुष्टतरं स्यात् ।

मूर्ण । (26) को विशेसो ?

भाष्य । (27) यदि जामदग्न्यस्तावदरण्यव्रतो हन्याद्राघवं, हत्वाऽपि पुनस्तादृग्य एव । संधार्यस्तु राजपुत्रः

स्मृति । संरम्भयोगात् कोपवशात् आयोधने युद्धे उभयोः परशुरामरामयोः निघातः वधः चेत् यदि भवति । अति हि नः अस्माकं प्रियम् एतदिति शेषः ।

(25) तु किन्तु अन्यतरस्य एतयोरेकस्य विजयेऽपि क्षत्रियान्तकरः भार्गवश्चेत् यदि राजपुत्रं विजयते । रोषणः उग्रः स भार्गवः एनं रामम् अनभिहत्य अस्य वधम् अकृत्वा न विरमेत् न शाम्येत् । एवञ्च नः अस्माकं समीहितम् अर्थः रामस्य निधनं वधः सिद्धं निष्पन्नम् । ब्राह्मण्यः ब्राह्मणभक्तः ऐक्ष्वाकः रामस्तु विजयमानः परशुरामभिति शेषः न ब्रह्मर्षिम् अभिहन्यात् तस्य वधं न कुर्यात् । निःश्रेयसं मोक्षम् आपन्ने प्राप्ते भार्गवे अपस्कृतं उक्तम् अपि शस्त्रं प्रणिदध्यात् प्रणिधानेन संहरेत् । एवञ्च दुष्टतरं स्यात् अस्माकं बहुनिष्टकरमिति भावः ।

(26) को विशेषः ? अस्माकमिति शेषः ।

(27) अरण्ये व्रतं यस्य सोऽरण्यव्रतः वनीत्यर्थः । पुनस्तादृग्य एव

Digitized by Google

पुनरुत्थातुकामः । तच्चेत् प्रहृष्टतमसुत्साहयन्निसम्मदा धर्म्म-विजयिनं विजयेत, सर्वे तं विजयिनमनुजानीयुः । तदैव हठाक्रान्त्या निष्टतक्रुद्धा देवाः प्रसह्येनमधिकुर्य्युः । नित्या-ऽनुषक्तो ह्यसुरविजयिनामवसादावमानतः प्रकृतिकोपः ।

(28) पौलस्त्यापचयप्रचण्डचरिते यः कार्त्तवीर्य्ये मुनिः
सर्वक्षत्रकथासमापनविधेः प्राक्सङ्गरं प्राकरोत् ।
तस्मिन्नप्युपनीतयुक्तदमनः स्यादूर्जिता सत्क्रिये
सामर्थ्ये सति धर्म्मसौम्यचरितो विघ्नस्य रामः पतिः ॥१३॥

पूर्वरूप एव न राक्षसानभियुङ्क्षेदिति भावः । सञ्जार्यः अवगन्तव्यः उत्थातुम् उद्यमनाय कामयति अभिलषतीति उत्थातुकामः । उत्साह-यन्निसम्मदा उत्साहसामर्थ्याभ्यां रामो यदि प्रहृष्टतमं धर्मविजयिनं भार्गवं विजयेत सर्वे देवादयस्तं रामम् अनुजानीयुः अनुमन्येरन् । हठाक्रान्त्या रावणस्य कर्कशेन अभियोगेन निष्टतक्रुद्धाः अन्तःक्रोध-युक्ताः देवाः प्रसह्य बलात् एनं रामम् अधिकुर्युः अक्षद्विनायायेति शेषः । अवसादात् च अवमानात् च असुरविजयिनां देवानां कोपः नित्यं सततम् अनुषक्तः आसक्तः अदूर इति यावत् ।

(28) पौलस्त्यस्य रावणस्य अपचयेन विजयेन (२१. ख. टीका.) प्रचण्डं चरितं यस्य तस्मिन् कार्त्तवीर्ये यो मुनिः भार्गवः सर्वेषां क्षत्रियाणां क्षत्रियायाः कथायाः वार्त्तायाः समापनविधेः अन्तकरणकर्मणः सर्वक्षत्र-विध्वंसादिति भावः । (२१. ग. टीका) । प्राक् पूर्वं सङ्गरं प्राकरोत् निष्टतवानित्यर्थः । ब्रह्मर्षिकल्पे युद्धे मरणं सङ्गरमित्याशयः । तस्मिन्नपि उपनीतं कृतं युक्तम् उचितं दमनं येन सः चेत् यदि रामस्तमपि विजयेत । ऊर्जिताः बलवत्यः असत्क्रियाः यस्य तस्मिन् सामर्थ्ये सति

Digitized by Google

सूर्पः। (29) ततो एत्थ किं दाणिं चिन्तिदं।

माल्य। (30) परशुरामोत्तेजनं कर्त्तव्यमिति।

सूर्पः। (31) पक्षान्तरे महादोसो।

माल्य। (32) तत्रापि शक्तितः प्रतिविधास्यते। किन्तु

तान्येव यदि भूतानि, ता एव यदि शक्तयः।

ततः परशुरामस्य न प्रतीमः पराभवम्॥ १४॥

तदुत्तिष्ठ मिथिलाप्रस्थानाय जामदग्न्यमुत्तेजयितुं महेन्द्र-

द्वीपमेव गच्छावः। द्रष्टव्यश्च तत्र भगवान् भार्गवः।

(33) गभीरो माहात्म्यात्, प्रथमशुचिरत्यन्तसुजनः

प्रसन्नः पुण्यानां प्रचय इव सर्वस्य सुखदः।

प्रभुत्वस्योत्कर्षात् परिणतिविशुद्धेश्च तपसा-

मसौ दृष्टः सत्त्वं प्रबलयति पापञ्च नुदति॥ १५॥

धर्म्यं सौम्यं प्रियं च चरितं यस्य स रामः विश्वस्य पतिः भवेदिति शेषः।

(29) ततोऽत्र किमिदानीं चिन्तितम्। त्वयेति शेषः।

(30) परशुरामस्य उत्तेजनम् उत्कोपनं धनुर्भङ्ग्यात्तदानेनेति शेषः।

(31) पक्षान्तरे महादोषः। पक्षान्तरे परशुरामभङ्गे।

(32) शक्तितः सामर्थ्यानुसारेण। प्रतीमः सम्भावयामः।

(33) माहात्म्यात् महानुभावत्वात् गभीरः दुष्परिग्रहः। प्रथमेन शान्त्या शुचिः शुद्धचरितः। प्रथमशुचिरिति पाठे प्रथमः शुचीनाम्। अत्यन्तम् अतिशयं सुजनः उदारः। पुण्यानां प्रसन्नः विमलः प्रचयः

[उत्थाय परिक्रम्य निष्क्रान्तौ।

(34) [विष्कम्भकः।

नेपथ्ये। (35) भो भो विदेहनगरीगताः कुलचारिणः!
कथयन्तु भवन्तः कन्यान्तःपुरगताय रामभद्राय।
कैलासोद्धारसारत्रिभुवनविजयौर्जित्यनिष्णातदोष्णः
पौलस्त्यस्यापि हेलोपहतरणमदो दुर्दमः कार्तवीर्य्यः।
यस्य क्रोधात् * कुठारप्रविघटितमहास्कन्धबन्धस्थवीयो-
दोःशाखादण्डमुण्डस्तरुरिव विहितः कुक्षकन्दः पुराऽभूत्॥६॥

---

* सोऽपि स्कन्धबन्धच्युतिभुजतरुभार्गवेशेन रोषात्
कीर्तिस्तम्भोपमश्रीः परशुविकृतिमिर्द्रांकृतः कार्तवीर्यः। वा०. रा०. ४. ३८.।

राशिः इव सर्वस्व हरं ददातीति हरदः। प्रभुत्वस्य अनुभावस्य उत्कर्षात् महत्त्वात्, तपसां परिणतेः परिपाकात् विशुद्धेश्च वैमल्याच्च असौ भार्गवः हरः खलु सत्त्वं तेजः प्रबलयति वर्द्धयति पापञ्च हृदति दूरीकरोति।

(34) "इतिवृत्तैकदेशानां कथांशानां निदर्शकः। संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥" इति दशरूप०। विष्कम्भाति प्रतिबध्नाति कथागतिमिति विष्कम्भः।

(35) कुलं गृहं राजभवनमित्यर्थः चरन्ति गच्छन्तीति कुलचारिणः। कैलासस्य पर्वतस्य उद्धारस्य उत्तोलनस्य सारः बलं येषां ते। तथा त्रिभुवनस्य जगत्त्रयस्य विजयस्य और्जित्यस्य महत्त्वस्य निष्णाताः अभिज्ञाः दोषः बाहवः यस्य तस्य पौलस्त्यस्य रावणस्य अपि हेलया उपहृतः विनष्टः रणस्य युद्धस्य मदः व्यसनं येन सः दुर्दमः कार्तवीर्य्यः

(36) सोऽयं त्रिःसप्तवारानविकलविहतक्षत्रतन्त्रप्रसारो
वीरः क्रौञ्चस्य भेदात् कृतधरणितलापूर्वहंसावतारः ।
जेता हेरम्बभृङ्गिप्रमुखगणचमूचक्रिणस्तारकारे-
स्त्वां पृच्छन् जामदग्न्यः स्वगुरुहरधनुर्भङ्गरोषादुपैति ॥१७॥

तरुः वृक्ष इव यस्य क्रोधात् कुठारेण प्रविघटिताः वियोजिताः महाक्षत्रबन्धवः स्वदीयांसः अतिक्रूराः दोष एव शाखादण्डा सुखानि शिरांसि च यस्य स विहितः कृतः पुरा कुल्यानि अस्थीनि एव कन्दानि मूलानि यस्य स तादृशः अभूत् । यथा वृक्षः कर्त्तनेन कन्दावशिष्टो भवति तथा कार्त्तवीर्योऽप्यस्थिशेषोऽभूत् । विनाशमगमदित्यर्थः । रावणस्य कैलासोद्धारत्रिभुवनविजयौ रा० ७. काण्डे वर्णितौ । कार्त्तवीर्यवधविषया २२. ग. टीका ।

(36) त्रिःसप्तवारान् एकविंशतिवारान् अविकलं सम्पूर्णं विहतः नष्टः क्षत्रतन्त्रस्य क्षत्रियजातेः प्रसारो विसर्पणं येन सः । एतद्विषया २२. घ. टीका । विहितक्षत्रतन्त्रप्रसार इति पाठे विहितः कृतः क्षत्रतन्त्रस्य प्रसारो वधो येन सः । क्रौञ्चस्य भेदात् विदारणात् कृतः धरणीतले भूमौ अपूर्वाणां हंसानाम् अवतारः आगमनं येन सः । हेरम्बभृङ्गिप्रमुखा गणेशप्रभृतयः गणाः चमूचक्रं सेनामण्डलम् यस्य यस्मीति हेरम्बभृङ्गिप्रमुखगणचमूचक्री तस्य तारकारेः कार्त्तिकेयस्य जेता विजेता । एतद्विषया २२. ज. टीका । सोऽयं वीरः जामदग्न्यः स्वगुरोः हरस्य धनुर्भङ्गेन रोषात् क्रोधात् त्वां पृच्छन् उपैति (२२. छ. टीका) । भृङ्गिप्रभृतयः शिवानुचराः । अतस्तत्सुतचमूत्वेन निर्दिष्टाः । कार्त्तिकेयस्य तारकवधो मात्स्ये १५९ अ०. द्रष्टव्यः । "काश्मीरमण्डलं चैतत् सर्वपुण्यमरिन्दम । महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह ॥..... एतद्वारं महाराज मानसस्य प्रकाशते । वर्षमस्य गिरे-

Digitized by Google

ततः प्रविशति सधैर्यसंभ्रमो रामः सीता लक्ष्मणश्च ।

रामः । * दिष्ट्या—

(37) महाभाग्यमहानिधिर्भगवतो दिव्यस्य दग्धुः पुरा-
मान्नायेन विशुद्धसर्वचरितः शिष्यो, भृगूणां पतिः ।
द्रष्टव्यः स च, मां दिदृक्षुरपि च, त्यक्त्वा क्रियं मुग्धया
संत्रासाच्चिज आभिजात्यनिभृतः स्नेहो मयि द्योतते ॥ १८ ॥

---

* निखिलवैखानसवन्द्यो वीर्यार्णवः.....भगवान् भार्गवो दिष्ट्या द्रष्टव्यः । वा०. रा०. ४. ।

र्मध्ये रामेण श्रीमता जितम् ॥" इति (म०. ३. ११०. १०–१२) श्लोक-पाठात् क्रौञ्चः काश्मीरेषु मानससरोवरसन्निहितः पर्वत इति तर्क-यामः । "प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान् हंसद्वारं भृगु-पतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्" इत्यादिकालिदासवर्णनाऽपि मतमिदं दृढयति । देवीभागवते पौराणिकमताद्धुसारेण "क्षीरोदेनावृतो भाति यस्मिन् क्रौञ्चाद्रिरस्ति च । नामनिवर्तकः सोऽयं द्वीपस्य परिवर्तते ॥ योऽसौ गुहस्य शक्त्या च भिन्नकुक्षिः पुराभवत् । क्षीरोदेन सिच्यमानो यत्नेन च रक्षितः ॥" इति लिखितम् ।

(37) महाभाग्यस्य सौभाग्यस्य महानिधिः महानाधारः । भग-वतः पुरां दग्धुः त्रिपुरदाहिनः । १. १०८ टीका । हरस्य आम्नायेन वेदेन वेदाभ्यासेन विशुद्धानि सर्वाणि चरितानि यस्य तादृशः शिष्यः । २. २३. ज. टीका । भृगूणां भृगुवंशस्य पतिः प्रधानः । स च द्रष्टव्यः । अपिच मां दिदृक्षुः द्रष्टुमिच्छुः । क्रियं लज्जां त्यक्त्वा परित्यज्य मुग्धया मुग्धमनसा सीतया सन्त्रासात् साध्वसात् निजः स्वीयः आभिजात्यात्

सीता । (38) हला सहीओ कहं दाणिं पदं ।

सख्यः । (38) कुमार अलं दाव तुवराए ।

रामः । (39) नोत्साहः परिधारणावैरस्यमर्हति ।

सख्यः । (40) वारं वारं णिक्खत्तीकिदसमत्तजीअलोओ णिव्वड्डिदविसमव्ववसाअसाहसो अ परसुरामो सुणीअदि ।

रामः । (41) किमेकदेशेन महाज्ञाननिधेर्माहात्म्यमुपसंक्रियते ? य एषः—

शालीनतया निभृतः सङ्कुचितः स्नेहो मयि द्योतते दृश्यते । सीता मां न सहतीति भावः ।

(38) अयि सख्यः ! कथमिदानीमेतत् । कुमार ! अलं तावत्त्वरया ।

(39) परिधारणायाः पर्यवेक्षणस्य वैरस्यं रसहीनता अरुचितेति यावत् । अहं भार्गवं द्रष्टुमुत्सुकः । धारणया कालहरणं न मे रोचत इति भावः ।

(40) वारं वारं निःक्षत्रीकृतसमस्तजीवलोकः निर्वर्तितविषमव्यवसायसाहसश्च परशुरामः श्रूयते । जीवानां प्राणिनां लोकः जीवलोको जगत् । निर्वर्तितं समाप्तं विषमः व्यवसाय आरम्भ एव साहसं येन सः पूर्णप्रतिज्ञ इति भावः ।

(41) एकदेशेन अंशेन । उपसंक्रियते समाप्यते । विस्तृतस्य विख्यातस्य कार्तिकेयस्य विजयेन स्वाध्यस्य बाहोः बलात् यः निःक्षत्रत्वः एकविंशतिवारान् दिशः उत्खातानि उत्पाटितानि क्षितिपालानां भूभुजां क्षत्रियाणां वंशा एव गहनानि वनानि याभ्यः ताः कृत्वा । अथ अनन्तरम् अश्वमेधे यज्ञे सहीयां महीं गुरवे कश्यपाय दत्त्वा अस्तैः व्यस्तेन अपसारितेन सत्त्वरेण शस्त्रे त्यक्ते विषये स्थाने अवस्था स्थितिः यस्य

उत्खातक्षितिपालवंशगहनान्निःसप्तकृत्वो दिशः
कृत्वा विश्रुतकार्त्तिकेयविजयश्लाघ्यस्य बाहोर्बलात्।
सद्वीपामथ कश्यपाय गुरवे दत्त्वाऽश्वमेधे मही
*मस्तव्यस्तसमुद्रमुक्तविषयावस्थस्तपस्तप्यते ॥ १९ ॥

नेपथ्ये।

(42) सत्त्वभ्रंशविषादिभिः कथमपि त्रस्तेक्षणं वेत्रिभि-
र्दृष्टो दृष्टिविघातजिह्मितमुखैरव्याहृतप्रक्रमः।
रामान्वेषणतत्परः परिजनैरुन्मुक्तहाहारवं
कन्यान्तःपुरमेव हा! प्रविशति क्रुद्धो मुनिर्भार्गवः ॥२०॥

रामः। (43) नन्वेत एव शिष्टाचारपद्धतेः प्रणेतारः।

---

*अस्तव्यस्तः सदनसुदधिः। वा०. रा०. २. ३७.।

अरविहितिभिः सिन्धुमुक्ते परान्ते

शिष्यः शश्वोर्विहितवसतिस्तप्यतेऽसौ तपांसि। वा०. रा०. ४. ४१.।

स सन् तपः तप्यते चरति। २१. ध. च. टीके। प्रायेण सप्तद्वापसरस्वजा पूर्वषट्पूर्वा वेत्ता। अतोऽयं प्रवादः समजनीत्यस्माकं मतम्।

(42) हा सत्त्वस्य तेजसो भ्रंशात् नाशात् विषादिभिः विषण्णैः। दृष्टेः अवलोकनस्य विघातेन अवनमनेन जिह्मितानि वक्राणि मुखानि येषां तैः। वेत्रिभिः दण्डधारिभिः प्रतिहारिभिः कथमपि कष्टेन त्रस्तानि उद्विग्नानि ईक्षणानि नेत्राणि यस्मिन् कर्मणि तत् यथा तथा दृष्टः। रामस्य अन्वेषणे मार्गणे तत्परः व्यग्रः क्रुद्धो भार्गवो जामदग्न्यो मुनिः परिजनैः अन्तर्वंशिकैः पुरुषैः उन्मुक्तः उत्थापितः हाहारवः यस्मिन् कर्मणि तत् यथा तथा कन्यान्तःपुरम् अवरोधमेव प्रविशति।

(43) शिष्टाचारस्य साधुव्यवहारस्य पद्धतेः पथः प्रणेतारः प्रव-

Digitized by Google

तत् कथमयं विहान् प्रमाद्यति ? भवतूपसर्पामि । सघैर्यं विकटं परिक्रामति ।

सख्यः । (44) अम्मो समन्तदो हाहा देव चन्दमुह रामचन्द हा जामाउअ त्ति परिदेवणासुहरकादरुव्विग्ग-समत्थपरिअणपलविदं अन्तेउरं वट्टदि । ता भट्टिदारिए सअं एव्व विण्णवेहि भट्टिदारअं ।

सीता । (45) तेण तुवरन्तीओ सम्भावेम्ह वेअपसरिअं अज्जउत्तं । इति परिक्रामति ।

सख्यः । (46) कुमार कुमार अवेक्ख दाव तुवराविसं-खलमाणविहलिदुब्भन्तगमणं भट्टिदारिअं ।

र्तकाः । प्रमाद्यति भ्रमं करोति निश्चिद्रमन्तःपुरप्रवेशं करोति । उप-सर्पामि भागैवमिति शेषः । विकटं सदर्पम् ।

(44) अहो समन्ततो "हाहा देव चन्द्रमुख रामचन्द्र हा जामातः" इति परिदेवनासुखरकातरोद्विग्नसमस्तपरिजनप्रलपितमन्तः-पुरं वर्तते । तत् भर्तृदारिके स्वयमेव विज्ञापय भर्तृदारकम् । सम-न्ततः सर्वतः । परिदेवना विलापः । अन्तःपुरे सर्वे एव परिजना दैन्यं विज्ञपन्तीति भावः । भर्तुः स्वामिनः दारिका कन्या भर्तृदारिका सीता । भर्तृदारकं रामम् । प्रियसम्भाषणमेतत् ।

(45) तेन त्वरमाणाः सम्भावयामो वेगप्रहृतमार्यपुत्रम् । आर्यस्य श्वशुरस्य पुत्रं रामम् । पत्नीभिः पतय "आर्यपुत्र" शब्देन सम्भाष्यन्ते ।

(46) कुमार, कुमार ! अवेक्षस्व तावत्त्वराविसंस्खलद्विह्वलितोद्भ्रान्तगमनां भर्तृदारिकाम् । त्वरया विसंस्खलत् विह्वलं उद्भ्रान्तञ्च गमनं यस्याः ताम् ।

Digitized by Google

रामः। (47) सप्रेमानुकम्पं प्रतिनिदिश्य। ननु कातरेयमत्र-भवतीभिरेव पर्य्यवस्थापनीया।

सख्यः। (48) सहि सहि सुरासुरमहणसामत्थं तेल्लोक्कमङ्गलं तुङ्गजअलच्छीलच्छणमिमं सविब्भमविअसन्तेत्तकन्दभसोहा-भरन्तमुहपुण्डरीअवित्थारिदसिणेहसम्भमा सव्वदा अम्ह पुरदो वण्णेसि ता किन्ति विजआभिमुहे कुमारे उवब्भन्तासि।

सीता। (49) सव्वक्खत्तिअसन्तापआरी परसुरामो त्ति।

रामः। प्रिये! स्वस्था सती निवर्त्तस्व।

(50) आतङ्कश्रमसाहसव्यतिकरोत्कम्पः क्षणं सङ्गता-मङ्गैर्मुग्धमधूकपुष्परुचिभिर्लावण्यसारैरयम्।

---

(47) कातरा भीरुः इयं सीता। पर्यवस्थापनीया आश्वसनीया।

(48) सखि, सखि! सुरासुरमथनसामर्थ्यं त्रैलोक्यमङ्गलं तुङ्गजय-लक्ष्मीलक्षणमिमं सविभ्रमविकसन्नेत्रकन्दटशोभाबिभ्रन्मुखपुण्डरीक-विस्तारितस्नेहसंभ्रमा सर्वदास्माकं पुरतो वर्णयसि तत् किमिति विजयाभिमुखे कुमारे उद्भ्रान्तासि। सुरासुराणां देवदानवानां मथ-नस्य अभिभवस्य सामर्थ्यं शक्तिर्यस्य तम्। तुङ्गस्य महतः जयस्य विजयस्य लक्ष्मीः श्रीः लक्षणं यस्य तम्। इमं रामभद्रमस्माकमग्र इदं वर्णयसि। सविभ्रमं सविलासं विकसतोः उन्मीलतोः नेत्रकन्द-टयोः नयनोत्पलयोः शोभां बिभ्रति धारयति सुखपुण्डरीके विस्तारितः स्नेहस्य संभ्रमो यस्याः सा। स्नेहसंभ्रममीदृशं वर्णयन्त्या त्वया विज-याभिमुखः कुमारो नानुगन्तव्य इति भावः।

(49) सर्वक्षत्रियसन्तापकारी परशुराम इति। इति हेतोः।

(50) मुग्धस्य मनोहरस्य मधूकपुष्पस्य पीतपुष्पप्रभेदस्य रुचिः कान्ति-

Digitized by Google

उन्नद्धस्तनकुम्भकुड्मलगुरूच्छ्वासावभुग्नस्य ते
मध्यस्य त्रिवलीतरङ्गकजुषो भङ्गः प्रिये! मा च भूत् ॥२१॥

नेपथ्ये । (51) भोः भोः परिस्खन्नाः ! क्व रामो दाशरथिः ?

स्त्रियः । (52) हद्धी हद्धी । एणं एव्व एसो वाहरदि ।

रामः । (53) तस्यायमनरालसाहसप्रचण्डकर्म्मणः प्रतिभिन्नपुष्करावर्त्तकस्तनितमांसलो वाङ्निर्घोषः कर्णविवरमाप्याययति । इति परिक्रामति ।

यैर्यां तैः । लावण्यं सौन्दर्यं सारः येषां तैः अङ्गैः अयं आतङ्कस्य भार्गवागमनजनितस्योद्वेगस्य श्रमस्य मदनुसरणजस्यायासस्य साहसस्य मदनुसरणरूपस्य प्रागल्भ्यस्य व्यतिकरेण सम्भेदेन उत्कम्पः संभ्रमः क्षणं मुहूर्तं सह्यताम् । यावदहं भार्गवं दृष्ट्वा न निवर्तिष्ये तावत्त्वं स्वस्था सती प्रतीक्षस्वेति भावः । प्रिये जानकि ! उन्नद्धयोः पीनयोः अथवा उन्नद्धयोः स्तनयोः एव कुम्भयोः कुड्मलयोः अग्रभागयोः गुरुभिः गम्भीरैः उच्छ्वासैः स्पन्दनैः अवगुनस्य आवर्जितस्य तिस्रः वल्य एव तरङ्गाः तज्जुषः तद्बिभ्रतः ते तव मध्यस्य मध्यभागस्य भङ्गः च मा भूत् । वलित्रययुता नारी सौभाग्यवतीति सामुद्रिका ब्रुवन्ति ।

(51) परितः स्खन्दन्ति चरन्तीति परिस्खन्नाः परिचारकाः ।

(52) हा धिक्, हा धिक्! एनमेवैष व्याहरति । एनं रामम् । एष भार्गवः ।

(53) अनरालेन अवक्रेण विशृङ्खलेनेति भावः साहसेन प्रचण्डानि कर्म्माणि यस्य तस्य । प्रतिभिन्नानां विदीर्णानां पुष्करावर्त्तानां मेघानां स्तनितं शब्द इव मांसलः स्फीतः वाचां निर्घोषः आप्याय-

Digitized by Google

सीता। (54) का गदी? धणुमि धारयन्ती। अज्जउत्त ण दाव तुम्हेहिं गन्तव्वं जाव तादो णागच्छदि।

सख्यः। (55) उव्वत्तिदं दाणिं पिअसहीए रसन्तरेण लज्जालुत्तणं।

रामः! (56) स्वगतम्। जितं जितं स्नेहेन! प्रकाशम्। तर्हि मुक्त्वा धनुर्गच्छामि।

नेपथ्ये। "भोः भोः परिक्षत्त्राः!" इत्यादि पुनः पठति।

सीता। (57) तदो बलादेव धारइस्सं।

राम। हन्त हन्त!

(58) उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोन्मादश्च मां कर्षतः।

यति प्रीणयति। पुष्कारावर्त्तका मेघश्रेष्ठाः। यथा मेघदूते "जातं वंशे भुवनविदिते पुष्कारावर्तकानाम्" १. ६.।

(54) का गतिः? आर्यपुत्र न तावदुद्यानाभिर्गन्तव्यं यावत्तातो नागच्छति। का गतिः किं कुर्मः। न गन्तव्यं भागवसकाशमिति शेषः। ततो जनकः।

(55) उद्वर्तितमिदानीं प्रियसख्या रसान्तरेण लज्जालुत्वम्। उद्वर्तितम् अतिक्रान्तम्। रसान्तरेण साहसेन स्नेहेन वा। भर्तुर्धनुर्धारणेन स्नेहेन शालीनतातिक्रान्तेति भावः।

(56) जितं जितं स्नेहेन विजयोदानीं स्नेहः। धनुर्मुक्त्वा परित्यज्य

(57) ततो बलादेव धारयिष्यामि त्वामिति शेषः।

(58) एकतः एकस्मिन् पक्षे उत्सिक्तस्य अवलिप्तस्य तपसः पराक्रमस्य

Digitized by Google

वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दो हरिचन्दनेन्दुगिरिस्निग्धो रणद्व्रन्यतः ॥२२॥

सञ्जयः । (59) एसो दिप्पन्तदिणअरालोअपेच्छणिज्ज-देहपहापरिक्खेवभासुरं जलन्तं सुणिसितं परसुं धारअन्तो विसंखलुव्वेल्लहुदवहसिहासहस्ससंहिदजटाभरो सुदूरविक्खेवाविद्धविअडोरुदण्डणिब्भराभिघादविहलाविद्धसुन्धरो परागदो जेव्व सो सअलक्खत्तिअमहारक्खसो ।

च निधेः आगतस्य अभ्यागमात् सतां साधूनां सङ्गस्य प्रियता अनुरागः च वीराणां रभसोन्नादः हर्षोन्नादश्च मां कर्षतः आकर्षतः । अन्यतः आनन्दयतीति आनन्दी संज्ञादौ हरेः चन्दनं हरिचन्दनं चन्दनभेदः इन्दुः चन्द्रश्च तद्वत् गिरिवत् शीतलः स्निग्धः मसृणश्च एष वैदेह्याः सीतायाः परिरम्भः आलिङ्गनं सुखः चैतन्यम् आमीलयन् हरन् कथञ्चित् मामिति शेषः । भार्गवं दृष्ट्वा तत्सुखोऽपि, प्रियालिङ्गनन्तु मां निश्चेष्टीकरोतीत्यर्थः ।

(59) एष दीप्यमानदिनकरालोकप्रेक्षणीयदेहप्रभापरिक्षेपभासुरं ज्वलन्तं सुनिशितं परशुं धारयन् विघट्टनोद्वेष्टनवहज्ज्वालासहस्रसंहितजटाभरः सुदूरविक्षेपाविद्धविकटोरुदण्डनिर्भराभिघातविह्वलितवसुन्धरः परागत एव स सकलक्षत्रियमहाराक्षसः । दीप्यमानस्य दिनकरस्य सूर्यस्य आलोक इव प्रेक्षणीयस्य दर्शनीयस्य ज्वलत इति भावः देहस्य प्रभायाः परिक्षेपेण विसर्पणेन भासुरं ज्वलन्तं दीप्यमानं सुनिशितं धारोज्ज्वलं परशुं धारयन् वहतः विघट्टनस्य उद्वेष्टस्य उद्वेलस्य वहतः अग्नेः ज्वालासहस्रमिव संहितः जटाभरः जटाजूटो यस्य सः । सुदूरविक्षेपैः अतिदूरपातन्यासैः आविद्धयोः आकृष्टितयोः विक-

रामः ।—

(60) अयं स भृगुनन्दनस्त्रिभुवनैकवीरो मुनि-
र्यं एष निचयो महानिव दुरासदस्तेजसाम् ।
प्रतापतपसोरिव व्यतिकरः स्फुरन् मूर्त्तिमान्
प्रचण्ड इव पिण्डतामुपगतश्च वीरो रसः ॥ २३ ॥

सविष्कम्भकम् ।

(61) पुण्योऽपि भीमकर्म्मा निधिर्व्रतानां चकास्त्यमितशक्तिः ।
मूर्त्तिमभिरामघोरां बिभ्रदिवाथर्व्वणो निगमः ॥२४॥

अयं हि ।

टयोः विशालयोः उरुदण्डयोः निर्भराभिघातैः अत्यन्ताडनैः विच्छ-
लिता विच्छलीकृता वसुन्धरा पृथिवी येन सः । पादविक्षेपणैरस्य कम्प-
माना वसुन्धरेति भावः । परागत एव आसन्न एव । स प्रसिद्धः सक-
लानां क्षत्रियाणां महाराक्षसः उच्छेदकः ।

(60) अयं स त्रिभुवने एकः अद्वितीयः वीरः भृगुनन्दनो मुनिः । य एष तेजसां महान् निचयो राशिरिव दुरासदः दुर्धर्षः । प्रतापस्य तेजसः तपसश्च स्फुरन् स्फूर्तिमान् मूर्तिमान् सविष्कम्भः व्यतिकरः सङ्घट्ट इव । तथा प्रचण्डो वीरो रसः पिण्डतामुपगतः पिण्डीभूत इव ।

(61) पुण्योऽपि भीमानि भीषणानि कर्माणि यस्य स अमितशक्तिः अनन्तसामर्थ्यः व्रतानां निधिः आधारः भार्गवः अभिरामा प्रिया घोरा भीषणा च अभिरामघोरा तां मूर्तिं बिभ्रत् धारयन् निगच्छन्ति विदन्ति अनेनेति निगम आथर्वणो निगमः अथर्ववेद इव चकास्ति दीप्यते । अभिचारमन्त्रबाहुल्यात् प्रियोऽपि घोरोऽथर्ववेदः ।

Digitized by Google

(62) कल्पापायप्रणयि दधतः कालरुद्रानलत्वं
संरब्धस्य त्रिपुरजयिनो देवदेवस्य तिग्मः ।
ब्रह्मच्छद्मा निखिलभुवनस्तोमनिर्मन्थयोग्यो
राशीभूतः पृथगिव समुत्थाय सामर्थ्यसारः ॥ २५ ॥

(63) *अहो ! स्वाच्छन्द्यवैचित्र्यमत्रभवतः ।
ज्योतिर्ज्वालाप्रचयजटिलः सन्निधत्ते कुठार-
स्तूणीरोऽसे वपुषि च जटाचापचीराजिनानि ।

---

*अहो !.....गम्भीरमधुरोऽयमस्याभोगः । अ०. रा०. ४. ।

---

(62) "कृतं त्रेता द्वापरञ्च कलिश्चैव चतुर्युगम् । प्रोच्यते तत्सहस्रञ्च ब्रह्मणो दिवसं शुने ॥" इति वि०. १. ३. १४. । तदेव मनुष्याणां कल्पः । तस्य अपायस्य अपगमस्य प्रलयस्य इति भावः प्रणयि अर्थिं कालरुद्रस्य जगत्संहर्तुः शिवस्य अनलत्वं दधतः प्रलयकालीनाग्निरूपिण इति भावः । कल्पान्ते जगतां दाहो विष्णुपुराणादिषु श्रूयते । यथा "तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम् ।" वि०. १. ३. २१. । तथा भारते "सदेवासुरगन्धर्वं सयक्षोरगराक्षसम् । ततो दहति दीप्तः स सर्वमेव जगद्विभुः ॥" इति ३. १८७. ७३. । संरब्धस्य कुपितस्य त्रिपुरजयिनो (१. १०८ टीका) देवानां देवस्य महादेवस्य तिग्मः प्रखरः ब्रह्मा द्विजः भार्गव इति शेषः छद्म व्यपदेशो यस्य स निखिलानां समस्तानां भुवनानां स्तोमस्य निचयस्य निर्मन्थस्य उच्छेदस्य योग्यो राशीभूतः सामर्थ्यस्य सारः पृथगिव सत्तत्याय उद्गम्य स्थित इति शेषः । भार्गवरूपेणाऽयं महादेवस्य वीर्यसार इति भावः ।

(63) स्वाच्छन्द्यं स्वातन्त्र्यं वैचित्र्यं चमत्कारिता च स्वाच्छन्द्यवैचित्र्यम् । ज्योतिषः तेजसः ज्वालानां प्रचयेन निचयेन जटिलः

पाणौ बाणः स्फुरति वलयीभूतलीलाचसूत्रे
वेषः शोभां व्यतिकरवतीमुग्रशान्तस्तनोति ॥ २६ ॥
प्रिये ! गुरुरयं तदपसृत्य क्षतावगुण्ठना भव ।

सीता । (64) हद्धी हद्धी परागदो एव्व । अज्जउत्त ! परित्ताअसु मं । पिअसाहसिअं पसीद ।

रामः । अयि प्रिये !

(65) मुनिरयमथ वीरस्तादृगस्तत् प्रियं मे
विरमतु परिकम्मः कातरे ! क्षत्रियाऽसि ।
जगति विततकीर्त्तेर्दर्पकण्डूलदोष्णः-
परिसरणसमर्थो राघवः क्षत्रियोऽहम् ॥ २७ ॥

संभिन्नः कुठारः सन्निधत्ते सन्निहित इत्यर्थः । अंसे स्कन्धे तूणीरः । वपुषि च जटा चापः धनुः चीरं वल्कम् अजिनं चर्म च । वलयीभूतः लोलः चञ्चलः अक्षसूत्रः यस्मिन् तस्मिन् अक्षसूत्रालङ्कारे पाणौ हस्ते बाणः स्फुरति । उग्रश्च शान्तश्च उग्रशान्तो वेषः व्यतिकरवतीं संभिन्नां शोभां तनोति विस्तारयति । अक्षाजिनादिको वेषो मुनिजनोचितः शान्तः । धनुरादिग्रहणन्तु रौद्रम् । तदुभयं मिलितमपूर्वां शोभां जनयतीति भावः । क्षतम् अवगुण्ठनं यया सा भव सुखमवगुण्ठयेत्यर्थः ।

(64) हा धिक् ! हा धिक् ! परागत एव । आर्यपुत्र ! परित्रायस्व माम् । प्रियसाहसिकं प्रसीद । मार्गदर्शनाद्विरमेति भावः ।

(65) अयं मुनिः । अथ तादृशो वीरः । मे मम तत् वीरसंदर्शनं प्रियम् । परिकम्मः विरमतु त्वं कम्पाद्विरम । कातरे ! क्षत्रिया असि । अतस्ते कम्पः नोचितः । अहं जगति विततकीर्तेः विस्तृतयशसः दर्पेण कण्डूलौ कण्डूयुक्तौ दोषौ बाहू यस्य तस्य रघुप्रियस्य

Digitized by Google

ततः प्रविशति क्रुद्धो जामदग्न्यः ।

जाम । (66) *अहो दुरात्मनः क्षत्रियबटोरनात्मज्ञता ?
न त्वस्तं यदि नाम भूतकरुणासन्तानशान्तात्मन-
स्तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकबधादिश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इवं प्रियोऽहमथवा शिष्यः कथं न श्रुतः ॥२८॥

(67) एष मे प्रशमस्य कर्कशः परिणामः—

यत् क्षत्रियेष्वपि पुनः स्थितमाधिपत्यं
तेरेव सम्प्रति धृतानि पुनर्धनूंषि ।

---

*कष्टं ! अमरखड्जस्य क्षत्रियबटोरनात्मवेदिता । अ०. रा०. ३. ।

परिस्खलनसमर्थः परिगमयितुः क्षत्रियो राघवः । न भेतव्यं मद्धेतोरित्याशयः ।

(66) न आत्मानं जानातीति अनात्मज्ञः तस्य भावः अनात्मज्ञता बालिशता । यदि नाम । सम्भावनायां नाम । धनुः व्यारुजता भञ्जता रामेण भूतेभ्यः प्राणिभ्यः करुणायाः सन्तानेन प्रवाहेण शान्तः आत्मा यस्य तस्य भगवतो पूज्यात् देवात् भवानीपतेः शिवात् न त्वस्तम् । मदान्धस्य तारकस्य बधात् । विश्वस्य दत्तोत्सवः आनन्दयिता तत्पुत्रस्तु स्कन्दः कार्त्तिकेयः । अथवा स्कन्द इव अहं प्रियः शिष्यः कथं न श्रुतः । कथं विस्मृत इति काव्यप्रकाशसम्मतः पाठः । कुमारसम्भवे सप्तदशे सर्गे तारकबधो वर्णितः ।

(67) परिणामः फलम् । यद्यहं तपो नाशैषिषं गुरुधनुरनेन नाभंक्ष्यतेति भावः । यत् आधिपत्यं पृथिवीपालनं पुनरपि क्षत्रियेषु

Digitized by Google

उन्माद्यता भुजबलेन मयापि कष्ट-
मुच्छृङ्खलानि चरितानि पुनः श्रुतानि ॥ २९ ॥

रामः ।—

(68) अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
वविततथमदाध्माते रोषान्मुनावभिधावति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात् पाणिः पादोपसंग्रहणाय च ॥ ३० ॥

किन्त्वविषयस्तावदाचारस्य ।

जाम । भो भोः परिक्षत्राः ! क्व रामो दाशरथिः ?

रामः । अयमहं भोः । इत इतो भवान् ।

जाम । साधु राजपुत्र ! साधु सत्यमैक्ष्वाकः खल्वसि ।

स्थितम् । मया तु तेषां हस्तादाच्छिद्य कश्यपाय मही दत्तेत्याशयः । यज्ञति तैरेव पुनः धनूंषि धृतानि । मया तु निःशेषीकृतास्त इत्याशयः । कष्टं मयाऽपि पुनः भुजबलेन उन्माद्यतां व्यभिचारिणां क्षत्रियाणां उच्छृङ्खलानि चरितानि श्रुतानि ।

(68) अकलितानाम् अमितानां तपसां तेजसां वीर्यस्य प्रथिम्नि महत्त्वे तत्तत्प्रशालिनीत्यर्थः । यशोनिधौ प्रथितयशसि अविततेन यथार्थेन मदेन गर्वेण आध्माते स्फीते सुनौ भार्गवे रोषात् क्रोधात् अभिधावति सति । "यस्य च भावेन भावलक्षणम्" पा०. २. ३. ३७. इति सप्तमी । मम पाणिः रभसात् हर्षात् अभिनवे नूतने धनुर्विद्यादर्पे क्षमाय क्षपणाय कर्मणे च युद्धायेति भावः, पादयोः सुनेरिति शेषः उपसंग्रहणाय च धारणाय च स्फुरति ।

Digitized by Google

(69) अन्विष्यतः प्रमथनाय ममापि दर्पा-
दात्मानमर्पयसि जातिविशुद्धसत्त्वः ।
*गन्धद्विपेन्द्रकलभः करिकुम्भकूट-
कुट्टाकपाणिकुलिशस्य यथा मृगारेः ॥ ३१ ॥

स्त्रियः । (70) सन्तं पावं पडिहदममङ्गलं ।

जाम । निर्वर्ण्य खगतम् । रमणीयः क्षत्रियकुमार आसीत् ।

(71) चञ्चत्पञ्चशिखण्डमण्डलमसौ मुग्धप्रगल्भः शिशु-
र्गम्भीरश्च मनोहरश्च सहजश्रीलक्ष्म रूपं दधत् ।

---

*हरिमिव करिकुम्भकोटि—
प्रकटकठोरनखाङ्कुरं कुरङ्गः । अ०. रा०. । ४. १८. ।

---

(69) प्रमथनाय पीडनाय अन्विष्यतः मम अन्विष्यते मत्तं ज्ञात्वा विशुद्धं विमलं सत्त्वं तेजो यस्य स त्वम् आत्मानम् अर्पयसि यथा गन्धद्विपेन्द्रस्य गन्धगजवर्यस्य कलभः शिशुः करिणां हस्तिनां कुम्भ-कूटानां कुम्भकुहराणां कुट्टाकः छेदकः पाणिः कर एव कुलिशं वज्रं यस्य तस्य मृगाणां पशूनाम् अरेः शत्रोः नाथकस्य सिंहस्य अर्पयतीति शेषः । अत्र चतुर्थीस्थाने षष्ठीप्रयोगः स्वं व्याकरणविरुद्धः ।

(70) शान्तं पापं प्रतिहतमङ्गलम् । दैन्यं रामविरुद्धं मा वादी-रित्यर्थः ।

(71) अयमसौ सुग्धश्च मनोहरश्च प्रगल्भश्च शिशुः रामः गम्भीरश्च मनोहरश्च चञ्चत् स्फुरत् पञ्च शिखण्डमण्डलं काकपक्षचक्रं यस्य तत् । तथा सहजायाः स्वाभाविकायाः श्रियः लक्ष्म्याः लक्ष्म चिह्न

द्राग्दृष्टोऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रूरताम् ॥२२॥

प्रकाशम्।

(72) प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाक्रियाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्।
सज्वालः परशुर्भवत्वभिलषत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥२३॥

स्त्रियः। (73) हद्धी हद्धी पज्जलिदो खु एसो।

यस्य तत् रूपं दधत् बिभ्रत् द्राक् शीघ्रं दृष्टोऽपि नतु मनसि निविष्ट इति भावः सौन्दर्यस्य कान्तेः सारस्य श्रिया शोभया मम मनो हरति। किन्तु तथापि नाम निश्चितं हन्तव्यो मयेति शेषः। अहो वीरस्य व्रतस्य क्रूरतां नैष्ठुर्यं धिक्। यदीदृशोऽपि सुन्दरः शिशुर्हन्तव्य इत्याशयः।

(72) प्राक् पूर्वम् अप्राप्तः अनधिगतः निशुम्भः भङ्गः येन तस्य शाम्भवधनुषः हरकार्मुकस्य द्वेधाक्रियया द्विधाकरणेन आविर्भवता उद्भूतेन क्रोधेन प्रेरितेन उत्तेजितेन भीमेन भीषणेन भार्गवस्य भुजस्तम्भेन दोर्दण्डेन अपविद्धः निक्षिप्तः सज्वालः उद्दीप्तः परशुः क्षणात् सद्यः-तेन अभिलषितः निविष्टः त्वत्कण्ठपीठस्य अतिथिः भवतु तव कण्ठस्य रुधिरं पिबत्विति भावः। येन अनेन परशुना देवो हरः खण्डपरशुः ख्याप्यते निगद्यते। "खण्डयतीति खण्डः सर्वच्छेदकः परशुर्यस्य स खण्डपरशुः" इति लिङ्गपुराणव्याख्या।

(73) हा धिक्, हा धिक् प्रज्वलितः खल्वेषः। प्रज्वलितः क्रोधोद्दीप्तः।

Digitized by Google

रामः । (74) सपरिवारस्य सानुचरस्य कार्त्तिकेयस्य विजयेन आवर्जितेन प्रसादीकृतः परशुः ।

सख्यः । (75) भट्टिदारिए पेक्ख हिअअभरिअउव्वमन्तबहुमानो णिक्कम्पधीरगरुत्तणेण ओहसइ भअवदो भग्गवस्स आउहलम्भं भट्टिदारओ ।

सीता । सविस्मयास्मं पश्यति ।

जाम । (76) स्वगतम् । आश्चर्यमाश्चर्यम् । अन्य एवायमप्रकारः । किमपि चैतदसंविज्ञातपदनिबन्धनमाहात्म्यं सौजन्यञ्च । संरम्भगम्भीरधीरस्य पौरुषावष्टम्भः । प्रकाशम् । राम दाशरथे ! स एवायमाचार्यपादानां प्रियः परशुः ।

---

(74) सपरिवारस्य सानुचरस्य कार्तिकेयस्य विजयेन आवर्जितेन प्रसादीकृतेन "नीलः कण्ठे लोहितः केशेषु" इति नीललोहितः शिवः तेन वर्षसहस्रम् अन्ते समीपे वसतीति अन्तेवासी शिष्यः तस्मै वर्षसहस्रकृतगुरुचर्याव्रताय तुभ्यं परशुः प्रसादीकृतः दत्त इति भावः । २३ ज टीका ।

(75) भर्तृदारिके ! प्रेक्षस्व हृदयभृतोद्गमवद्बहुमानो निष्कम्पधीरगुरुत्वेनावहसति भगवतो भार्गवस्यायुधलाभं भर्तृदारकः । भगवतः शिवात् । हृदये भृतम् जठम् उद्गमनं विसर्जयन् बहुमानो यस्य स रामः ।

(76) असंविज्ञातं पदनिबन्धनस्य वाक्यरचनायाः माहात्म्यं महत्त्वं यत्र तत् दर्शितोतिवाक्पाटवमित्यर्थः । संरम्भेण उत्साहेन गम्भीरस्य

Digitized by Google

वस्यः। (77) क्षणं ज सन्तस्स विअ आआवो।

आम।—

(78) अल्पप्रयोगखुरली कलहे गणानां
सैन्यैर्हतोऽपि जित एव मया कुमारः।
एतावताऽपि परिरभ्य धृतप्रसादः
प्रादादिमं प्रियगुणो भगवान् गुरुर्मे॥ ३४॥

रामः। (79) खगतम्। कथमेतावताऽपीत्याह। अहो! गर्वगौरवस्याभोगः। प्रकाशम्। अतश्च भगवन्! द्यावापृथिव्योर्विततस्ते वीरवादः।

(80) येनैव खण्डपरशुर्भगवान् प्रचण्ड-
श्चण्डीपतिस्त्रिभुवनेषु गुरुः प्ररूढः।

धीरस्य पौरुषस्य विक्रमस्य अवष्टम्भः अतिशयः। आचार्यपादानां पूज्यस्य गुरोर्भगवतो शिवस्य।

(77) क्षणम् ज अहो शान्तस्येव भार्गवस्यालापः।

(78) कलहे युद्धे अल्पप्रयोगखुरली धनुर्विद्याकुशलः गणानां सैन्यैः हतोऽपि परिहतोऽपि न त्वेक इति भावः कुमारः कार्तिकेयः मया जित एव। एतावताऽपि स्वल्पेनाऽपि वीर्यप्रदर्शनेन धृतप्रसादः सन्तोषितः प्रियाः गुणाः यस्य स मे मम गुरुः भगवान् शिवः मां परिरभ्य आश्लिष्य इमं परशुं प्रादात् प्रदत्तवान्।

(79) आभोगः परिपूर्णता। एतावतेति वाक्येन कुमारविजयोऽपि न मे कश्चिदिति सूचितवता जामदग्न्येन निजस्य महानवक्षेपः प्रकटित इति भावः। द्यौश्च स्वर्गश्च पृथिवी च द्यावापृथिवी।

(80) येनैव परशुना भगवान् प्रचण्डः चण्डीपतिः भवानीनाथः

Digitized by Google

तेनैव तारकरिपोर्विजयार्जितेन
दीप्तिं गता परशुराम इति श्रुतिस्ते ॥ ३५ ॥

किञ्च ।

(81) उत्पत्तिर्जमदग्निनः *स भगवान् देवः पिनाकी गुरुः
वीर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत् कर्म्मभिः ।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः
सत्यं ब्रह्मतपोनिधेर्भगवतः किं वा न लोकोत्तरम् ॥ ३६ ॥

अन्वयः । (82) जानाति महाभागो गुरुकरमणीयं मन्त्रयितुं ।

---

*देवी धूर्जटिरस्त्रकर्म्मणि गुरुर्वीर्यञ्च दूरे गिरां सप्तद्वीपवतीं ददद्भुवं...। भ०.रा०.४.२९.

खण्डपरशुः त्रिभुवनेषु गुरुः प्रूढः जातः । तारकरिपोः कुमारस्य विजयेन अर्जितेन लब्धेन तेनैव परशुना ते तव परशुरामः इति श्रुतिः आख्या दीप्तिं गता उज्ज्वलिता ।

(81) जमदग्निनः जमदग्नेः उत्पत्तिः जन्म । स भगवान् देवः पिनाकी शिवः गुरुः । यत् तु वीर्यं तत् गिरां वाचां पथि विषये न वर्तते इति शेषः वर्णयितुमशक्यम् इति भावः । ननु कर्म्मभिः क्रौञ्च-विदारणादिभिः तत् व्यक्तम् । सप्तसमुद्रैः सुद्रितायाः अङ्कितायाः महाः पृथिव्याः निर्व्याजं निष्कपटं दानम् अवधिः अन्तः यस्य सः त्यागः विसर्गः । कश्यपाय सर्वभूमण्डलदानं प्रागेवोक्तम् । सत्यं यथार्थतः ब्रह्मणः वेदस्य तपसश्च निधेः भगवतः भार्गवस्य किं वा न लोकोत्तरम् अतिमानुषं सर्वमेवास्त्वर्यमित्यर्थः । सत्यब्रह्मतपोनिधेरिति पाठे सत्यस्य च ब्रह्मणश्च तपसश्च निधेरित्यर्थः ।

(82) जानाति महाभागो गुरुकरमणीयं मन्त्रयितुम् । गुरुकर-मणीयं गम्भीरमनोहरं मन्त्रयितुं वक्तुम् । महाभागो रामः ।

Digitized by Google

जाम।—

(83) राम! राम! नयनाभिरामता-
माशयस्य सदृशीं समुद्वहन्।
अप्रतर्क्यगुणरामणीयकः
सर्वथैव हृदयङ्गमोऽसि मे ॥ ३७ ॥

अपिच।

(84) हेरम्बदन्तमुसलोल्लिखितैकभित्ति
वक्षो विशाखविशिखव्रणलाञ्छितं मे।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभात्
सत्यं ब्रवीमि परिरब्धुमिवेच्छति त्वाम् ॥३८॥

सख्यः। (85) भट्टिदारिए पेक्ख भट्टिणो सोहग्गं। तुमं क्खु णिच्चपरम्मुही अत्ताणअं वञ्चसि।

---

(83) आशयस्य मनसः सदृशीम् अनुरूपां नयनयोः अभिरामतां संजातां सदृशं वहन् बिभ्रत् अप्रतर्क्यम् अचिन्त्यं गुणानां रामणीयकं मनोहरता यस्य स त्वं सर्वथैव मे हृदयं गच्छतीति हृदयङ्गमः प्रियोऽसि।

(84) सत्यं ब्रवीमि हेरम्बस्य गजाननस्य गणेशस्य दन्ताभ्यामेव मुसलाभ्यां दण्डाभ्याम् उल्लिखितम् ईषद्विदारितम् एका भित्तिः पार्श्वं यस्य तत् विशाखस्य कुमारस्य विशिखैः (२१. ज. टीका) बाणैः उत्पादितैः व्रणैः लाञ्छितं चिह्नितं रोमाञ्चेन कञ्चुकितम् आवृतं जातरोमहर्षं मे मम वक्षः त्वाम् परिरब्धुम् आलिङ्गितुमिव इच्छति।

(85) भर्तृदारिके प्रेक्षस्व भर्तुः सौभाग्यम्। त्वं खलु नित्यपराङ्मुखात्मानं वञ्चयसे।

Digitized by Google

सीता । सार्द्धं निश्चिनोति ।

रामः । (86) भगवन् ! परिरम्भणमिति प्रस्तुतप्रतीपमेतत् ।

लक्ष्मणः । (87) धीरमसिणो अत्तणो माहप्पसोहिदो से विणओ ।

जाम । (88) स्वगतम् । अहो स्वगुणपरगुणोत्कर्षपरिणामं-ग्राहि सौजन्यपूतमन्तःकरणमस्य राजन्यपोतस्य । पारमार्थिकविनयदुर्विभावस्त्वतिनिपुणबुद्धिग्राह्यो महानहङ्कारः ।

(89) अप्राकृतस्य चरितातिशयस्य भावै-
रत्यद्भुतैर्मम हृतस्य तथाप्यनार्या ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
माहात्म्यसारसमुदायमयः पदार्थः ॥ ३९ ॥

आश्चर्यम् ।

---

(86) परिरम्भनम् आलिङ्गनम् । प्रस्तुतस्य वृत्तस्य प्रतीपं विपरीतम् ।

(87) धीरमस्य आत्मनो माहात्म्यशोभितोऽस्य विनयः ।

(88) स्वगुणस्य परगुणस्य च उत्कर्षं महत्त्वं परिणामं विकारञ्च गृह्णाति अवगच्छतीति स्वगुणपरगुणोत्कर्षपरिणामग्राहि गुणागुण-वित् । राजन्यपोतस्य क्षत्रियशिशोः रामस्य । पारमार्थिकेन सत्येव विनयेन दुर्विभावः दुर्लक्ष्यः निपुणबुद्धिना ग्राह्यः परिग्राह्यः महानहङ्कारः । विनयाद्भुततया दुर्लक्ष्योऽपि रामस्याऽहङ्कारो निपुणमतिभि-रनुभूयत इति भावः ।

(89) अप्राकृतस्य असाधारणस्य चरितातिशयस्य महच्चरितस्य अत्यद्भुतैः भावैः सौजन्यपूतादिभिर्वृत्तिभिः हृतस्य आकृष्टस्य मम तथा-

Digitized by Google

(90) सम्भाव्यमिष्टभुवनाभयदानयुक्त-
सम्भारसञ्चयवपुश्च हि विस्फुरन्ति ।
लक्ष्मीश्च सात्त्विकगुणोज्ज्वलितश्च तेजो
धर्मश्च मानविजयौ च पराक्रमश्च ॥ ४० ॥

अयं हि—

(91) त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
प्राप्तो धर्मः स्थित इव तनुं ब्रह्मकोशस्य गुप्त्रै ।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
मा विर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥४१॥

प्रकाशम् । हे भवत्यः ! प्रविशतेयं वधूरभ्यन्तरमेव ।

राघः । खगतम् । एवमेव ।

नेपथ्ये । सौरध्वजो धनुषाऽनेनेति एवाभिवर्त्तते ।

गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ ४२ ॥

ऽपि अनास्था अश्रद्धा अस्मिन् राम इति शेषः । वीरमिश्रकाक्षतिः एष-कोऽपि अप्रमेयगाढालङ्कारसन्दोहमयः अचिन्त्यमहत्त्वस्य समुपसारान्वितः पदार्थः ।

(90) अस्य वपुः दृष्टः दैवेप्सितः भुवनानाम् अभयदानस्यैव पुण्यस्य सम्भारः सञ्चयो यस्य तत् लोकरक्षकरणित्यर्थः सम्भाव्यं तर्क्यम् । हि यतः अत्र वपुषि लक्ष्मीश्च सौन्दर्यञ्च सात्त्विकगुणेन उज्ज्वलितम् उद्भासितञ्च तेजः धर्मश्च मानविजयौ च पराक्रमश्च विस्फुरन्ति प्रकाशीभवन्ति ।

(91) लोकान् भुवनानि त्रातुं परिणतः आविर्भूत इव कायवान् मूर्त्तिमान् अस्त्रवेदः धनुर्वेदः । ब्रह्मकोशस्य वेदरूपस्य भाण्डारस्य गुप्त्रै रक्षायै तनुं देहं श्रितः गृहीत इव प्राप्तो धर्मः क्षत्रियधर्मः ।

Digitized by Google

वक्षः । (92) भट्टिदारिए परागदो एव्व तादो । एहि अब्भन्तरं पविसम्ह ।

सीता । (93) सगतम् । भअवदि सङ्गामसिरि एसो दे अञ्जली ।

[इति निष्क्रान्ताः स्त्रियः ।

जाम । (94) स एष राजा जनको मनीषी
पुरोहितेनाङ्गिरसेन गुप्तः ।
आदित्यशिष्यः किल याज्ञवल्क्यो
यस्मै मुनिर्ब्रह्म परं विवव्रे ॥ ४२ ॥

सामर्थ्यानां समुदयः समन्याः यज्ञस्य इव अवयवा गुणानां सङ्घः इव राशिः आविर्भूय स्थित इव जगतां गुणानां निर्मीयतेऽनेनेति निर्माणं सारः तस्य राशिः ।

(92) भर्तृदारिके परागत एव तातः । एहि अभ्यन्तरं प्रविशावः ।

(93) भगवति संग्रामश्रीरेष ते अञ्जलिः । रामविजयावेति भावः ।

(94) पुरोहितेनाङ्गिरसेन यतानन्तेन गुप्तः रक्षितः स एष मनीषी पण्डितो राजा जनकः यस्मै किल आदित्यशिष्यः याज्ञवल्क्यो मुनिः परं ब्रह्म वेदानां विवव्रे व्याख्यातवान् । श्रूयते हि पुरा किल याज्ञवल्क्यः सूर्यमाराध्य यजुर्वेदं लेभे । यथोक्तं भट्टीधरेण "व्यासशिष्यो वैशम्पायनः याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत् । तत्र दैवात्केन हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति । स योगसामर्थ्यान्मूर्तां विद्यां विधायोद्ववाम । वान्तानि यजूंषि अग्रहीतेति शुक्लका अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन् । तानि यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि । ततो दुःखितो याज्ञवल्क्यः सूर्यमाराध्यान्यानि शुक्लानि यजूंषि प्राप्तवान् । तानि

सदृत्त एष तथापि तु क्षत्रिय इति शिरःशूलमुत्क्षोपयति ।

ततः प्रविशतः संभ्रान्तौ जनकदशरथानन्दौ ।

दश० । राजन्! किमत्र युक्तम् ?

जन० । भगवन्!

(95) ऋषिरयमतिथिश्चेद्विष्टरः पाद्यमर्घ्यं
तदनु च मधुपर्कः कल्पतां श्रोत्रियाय ।
अथ नु रिपुरकस्माद् ईहते नः *पुत्रभाण्डे
तर्हि इह नयविहीने कार्मुकस्याधिकारः ॥ ४४ ॥

[इति परिक्रामतः ।

राम० । (96) तत् किमित्यतिवाह्यायितं भवता ?

---

*क्वं भगीः पुत्रभाण्डम् । वा०. रा०. २. ६२. ।

जाबालगौभेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशयिभ्येभ्यः पाठितवान् । तथा च स्मृतिः 'आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येन आख्यायन्त इति' ।" एतदेव स्पष्टयति वि०. तृतीयेऽंशे पञ्चमाध्याये । सत् दृत्तं चरितं यस्य स सदृत्तः । शिरसः शूलं वेदनां उत्क्षोपयति उत्तेजयति ।

(95) अयम् ऋषिः जामदग्न्यः चेत् यदि अतिथिः अस्माकमिति शेषः तदा विष्टरः कुशासनं पाद्यं पादोदकम् अर्घ्यं पूजार्थं जलम् अस्मै दीयन्ताम् इति शेषः । तदनु तदनन्तरं मधुपर्कश्च श्रोत्रियाय कल्पतां । (२. २ टीका) । अथ नु पुनः यदि रिपुः शत्रुः खलु नः अस्माकं पुत्र एव भाण्डं मूलधनं तस्मिन् पुत्रभाण्डे जामातरि रामे अकस्मात् अकारणं ईहते तत् तदा इह नयविहीने जामदग्न्ये कार्मुकस्य अधिकारः स्यादिति शेषः । तदा वयं तस्योपरि धनुर्धारिणः स्याम इति भावः ।

(96) किमिति कस्माद्धेतोः । अतिवाह्यायितं करुणया स्पृष्टमिति भावः ।

Digitized by Google

जाम। न किञ्चित्।

(97) सम्भूयेव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः।
स त्वं नूतन एव कङ्कणधरः श्रीमान् प्रियश्चेतसो
हन्तव्यः परिभूतवान् गुरुमिति प्रागेव दूयामहे ॥४५॥

राम। भार्गव! ज्ञायते मामनुकम्पस इति।

जाम। अरे! किमुत त्रातोऽसि?

(98) अम्भताघ्मातजीमूतस्निग्धसंहननस्य ते।
कुठारः कम्बुकण्ठस्य कण्ठे कण्ठे पतिष्यति ॥ ४६ ॥

रामः। सत्यमेव करुणया प्रतिचिन्तोऽसि।

---

(97) सुखानि संभूय मिलित्वा एव चेतसि परं परमं भूमानं बहुत्वम् आतन्वते अधिगच्छन्ति बहुलीभवन्तीत्यर्थः। यत्र आलोकपथावतारिणि दर्शनविषयगते चेतसि नेत्रोत्सवः नयनानन्दकरः पदार्थः रतिं प्रस्तौति स्तवति। तदर्थं च भारविः "श्रेयः परिस्तौति तनोति कीर्त्तिम्।" २. ७.। स त्वं नूतन एव कङ्कणधरः क्षतनवपरिग्रह एव श्रीमान् चेतसः प्रियः गुरुं शिवं तद्भक्तेन परिभूतवान् अवज्ञातवान् अतः हन्तव्य इति प्रागेव पूर्वमेव दूयामहे विषादम् अनुभवामः। "हस्तसूत्रेऽपि कङ्कणम्" इति त्रिकाण्डशेषः। अद्याऽपि भारते विवाहदिवसे वरस्य कङ्कणधारणस्य तत्पादप्रक्षालनानन्तरं कङ्कणमोचनस्य च रीतिः प्रचलितास्ति। "विवाहकौतुकं ललितं बिभ्रत एव" रघु०. ८. १. इत्यत्र 'एव' पदेन कालिदासोऽपीमां कङ्कणमोचनरीतिं सूचयति।

(98) अम्भतेन जलेन आघ्मातः स्फीतः जीमूतः मेघ इव स्निग्धं संहननं शरीरनिर्माणं यस्य। "जीवनस्य उदकस्य मूतः पटबन्धो

जाम। (99) आः मय्येव भ्रूकुटीधरः संहृतः। अरे! क्षत्रियडिम्भ! त्वं किल शिशुर्नवधूटिकापरिग्रह इत्यपूर्व-मुपतप्यतेऽस्माभिः।

सुप्रसिद्धः प्रवादोऽयमितिहेति च गीयते।
जामदग्न्यः स्वयं रामो मातुर्मूर्धानमाच्छिनत् ॥ ४७ ॥

अपिच रे मूढ!

(100) उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसन्तानरोषा-दुद्दामस्यैकविंशत्यवधि विधमतः सर्वतो राजवंश्यान्।
पित्रं *तद्रक्तपूर्णं ह्रद मवनमहानन्दमन्दायमान-

---

*राजन्यरुधिराम्भोधिकृतस्नसवनो मुनिः। भ०. रा०. ४. १७।

जोभूतः" इति मल्लिनाथः। तस्य कम्बुकण्ठस्य शङ्खसदृशकण्ठस्य ते कण्ठे कृत्तम् अहह कुठारः पतिष्यति।

(99) नवः नवधूटिकायाः अनुढायाः बध्वाः परिग्रहः परिणयो यस्य स नवबधूटिकापरिग्रहः। अपूर्वम् उपतप्यते अस्माभिः वयम् अकस्मात् विषादम् अनुभवामः। काकाक्षिन्यायेनैतत्। अयं प्रवादः इतिह कर्णपरम्परया सुप्रसिद्धः। इति इत्थं च गीयते। जामदग्न्यः जमदग्नितनयः रामः परशुरामः स्वयं मातुः मूर्धानं शिरः आच्छिनत् छिनवान्। २१. क. टीकां पश्य।

(100) क्षत्रस्य क्षत्रियजातेः सन्तानेन प्रवरेण रोषात् क्रोधात् उद्दामस्य उच्छृङ्खलस्य। गर्भानपि गर्भस्थानपि क्षत्रियशिशून् उत्कृत्य उत्कृत्य छित्त्वा छित्त्वा शकलयतः खण्डं खण्डं कुर्वतः। सर्वतः एकविंशत्यवधि एकविंशतिवारान् राजवंश्यान् क्षत्रियान् विधमतः उन्मूलयतः। तेषां रक्तपूर्णे ह्रदे सवनेन स्नानेन महानन्देन मन्दायमानः

क्रोधाग्निं कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः॥४८॥

रामः। (101) नृशंसता हि नाम पुरुषदोषः, का तत्र विकत्थना?

जाम। आः क्षत्रियवटो! अति नाम प्रगल्भसे।

(102) प्रहर नमय चापं प्राक्प्रहारप्रियोऽहं
मयि तु कृतनिघाते किं विदध्याः परेण।
धगितिविततबक्षुत्प्रारभास्वत्कुठार-
प्रविघटितकठोरस्कन्धबन्धः कबन्धः॥४९॥

जनक-यतानन्दौ। वत्स रामभद्र! विस्रब्धं तावदास्व।

रामः। कष्टमनुज्ञानापेक्षः संवृत्तोऽस्मि।

जाम। अपि सुखमाङ्गिरसस्य?

यता। विश्रेषतस्त्वदर्थनात्। अपिच—

सर्वभूतैः क्रोधाग्निः यस्य तत् यथा तथा पितरं पितृतर्पणं कुर्वतो मे स्वभावः सर्वप्राणिभिः न खलु न विदितः विदित एव। २१. ग.-घ. टीके पश्य। विधमत इत्यत्र विधयत इति क्रोधाग्निमित्यत्र च क्रोधाग्नेरिति पाठो दृश्यरूपे दृश्येते। तयोः प्रथमस्य निम्नत इत्यर्थः। द्वितीयस्य कुर्वतो मे इति परेण सम्बन्धः।

(101) क्षत्रियवधरूपा नृशंसता। विकत्थना श्लाघा।

(102) प्रहर। चापं नमय आकर्ष। अहं प्राक् प्रहारस्य पूर्वघातस्य प्रियः। मयि तु कृतनिघाते कृतप्रहारे परेण यस्मात् 'धक्' 'धक् धक्' इति शब्देन विततस्य विस्तृतस्य वक्षेः उद्गारेण निष्क्रमेण भास्वता दीप्तिमता कुठारेण प्रविघटितः विश्लेषितः स्कन्धबन्धः कण्ठः यस्य स कबन्धः शिरःशून्यदेहः सन् किं विदध्याः कुर्याः। मम प्रहारानन्तरं

(103) त्वं नः पूज्यतमोऽतिथिर्यदि ततः *सज्जातिथेया वयम्,

जाम । पुरोधः ! सुचरितव्रतः श्रोतियो गृहमेधी याज्ञवल्क्यग्रण्यिः । तत्र सर्वं युज्यते । किन्तु नाहमातिथ्यकामः ।

शता ।—

कन्यान्तःपुरमक्रमात् प्रविशता संदूषिता नः स्थितिः

जाम । (104) आरण्यवासी ब्राह्मणोऽहमनभिज्ञः परमेश्वरगृहाचारस्य ।

रामः । स्वगतम् । (104) शोभत एव दत्तभुवनैकदक्षिणस्य सामन्तेष्वहङ्कारोत्प्रासः ।

जन ।—

(105) पापं वाञ्छसि कर्म राघवग्रिण्यावज्ञत्सनाथे कथम् ?

---

*सज्जातिथेयो भव भार्गवोऽतिथिर्भवति । बा०. रा०. ४. ।

तव प्रहारावसरो न भवितेति भावः । नमयेत्यत्र नमत्विति घगित्यत्र घिगिति केचित् पठन्ति । सदोषौ तौ पाठौ ।

(103) सज्जम् उपस्थितम् आतिथेयम् अतिथिनिमित्तकं भोजनादि येषां ते सज्जातिथेयाः ।

(104) परमेश्वराणां राजेन्द्राणां गृहाणाम् आचारः परमेश्वरगृहाचारः । दत्ता भुवनमेव एका दक्षिणा दानं येन सः । २२. ब. टीका । तस्य परशुरामस्य अहङ्कारस्य गर्वस्य उत्प्रासः कटाक्षेणोद्गारः सामन्तेषु अनन्तरन्ध्रेषु शोभते । न त्वेतेषां भुवनदक्षिणादानक्षमः प्रभाव इति भावः ।

(105) कथम् अज्ञत्सनाथे अज्ञत्वहाये राघवग्रिण्यौ रामे पापं कर्म वधं वाञ्छसि ।

Digitized by Google

प्रविश्य कञ्चुकी ।

*देव्यः कङ्कणमोचणाय मिलिता, राजन् ! वरः प्रेष्यताम्॥५०

जनक-शतानन्दौ । वत्स रामभद्र ! श्वश्रूजनस्त्वामाह्वयति तद्गम्यताम् ।

रामः । भगवन् जामदग्न्य ! एवमादिशन्ति गुरवः ।

जाम । (106) को दोषः क्रियतां लोकधर्मः । पश्यन्तु च त्वां ज्ञातयः । †किन्तु न चिरं जनपदेष्वारण्यकास्तिष्ठन्ति । गन्तुकामोऽस्मि । अतो न कालः परिक्षेप्तव्यः ।

रामः । (107) एवम् ।

प्रविश्य सुमन्त्रः । भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः ।

इतरे । क्व भगवन्तौ ?

सुम । महाराजदशरथस्यान्तिके ।

रामः । गुरुवचनान्नेच्छामः ।

इतरे । तत्रैव गच्छामः । [इति निष्क्रान्ताः सर्वे ।

इति परशुरामसंवादो नाम द्वितीयोऽङ्कः ।

---

* कृतकौतुकागारमङ्गलोपचारः श्वशुरकुललोकस्त्वां प्रतीक्षते । अ० रा० ४ ।

† अप्रशस्ताः खल्वारण्यकानामस्माकं जनपदेषु चिरप्रचारः । अ० रा० ४ ।

---

(106) लोकधर्मः लोकाचारः । जनपदेषु लोकवासेषु नगरादिषु । आरण्यकाः वनवासिनः । परिक्षेप्तव्यः उद्वा नेतव्यः ।

(107) अस्य मम्मटभट्टेनाकाण्डच्छेदो दोष उक्तः । गुरुवचनानुरोधेन क्षणकालमन्तःपुरगमनं वीररसविरुद्धम् इति न वयं सम्भावयामः ।

भ्राता परशुरामस्य लौकित्यसटजन्मनः ।
परशुरामसंवादो दृत्तेनाऽयं स्फुटीकृतः ॥

Digitized by Google

अथ तृतीयोऽङ्कः ।

ततः प्रविशतो वसिष्ठविश्वामित्रौ जनकशतानन्दौ च ।

वसिष्ठविश्वामित्रौ । जामदग्न्य !

(1) इष्टापूर्त्तविधेः सपत्नशमनात् प्रेयान् मघोनः सखा,
येन द्यौरिव वज्रिणा वसुमती वीरेण राजन्वती ।
यस्यैते वयमग्रतः, किमपरं विश्वस्य वैवस्वतः,
सोऽयं त्वां तनयप्रियः परिणतो राजाऽभयं याचते ॥१॥

---

(1) "अग्निहोत्रं तपः सत्यं वेदानाञ्चैव पालनम् । आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥ वापीकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामाः पूर्तमित्यभिधीयते ॥ ..... इष्टेन लभते स्वर्गं पूर्तेन मोक्षमाप्नुयात् ॥" इत्यत्रिः । इष्टं च पूर्तञ्च इष्टापूर्तं तस्य विधेः कर्म्मणः सपत्नानां शत्रूणां शमनात् दमनात् मघोनः इन्द्रस्य प्रेयान् प्रियतमः सखा, य इति शेषः । यथोक्तं रामायणे "पुरा देवासुरे युद्धे युद्धसज्जः पतिस्तव । याचितो देवराजेन युद्धं कर्तुमितो गतः ॥" २.८.११. । यज्रिणा वज्रधरेण पुरन्दरेण द्यौः स्वर्ग इव येन वीरेण वसुमती पृथिवी राजन्वती सनाथा । एते वयं महर्षय इति भावः यस्य अग्रतः पुरतः वर्तामह इति शेषः । किम् अपरं किमन्यत् किं बहुनेति भावः यो विश्वस्य त्रिभुवनस्य विवस्वतः सूर्यस्य अपत्यं वैवस्वतः धर्म्मशासक इति भावः । अथवा वैवस्वतो मनुरिव यो विश्वं शास्ति । "एवमिक्ष्वाकुनाथेन पालिता साऽभवत् पुरी । यथा पुरस्तान्मनुना मानवेन्द्रेण भूरियम् ॥" इति रा० १. ६. २२. । सोऽयं तनयप्रियः रामप्रियः परिणतः वृद्धो राजा दशरथः त्वाम् अभयं याचते प्रार्थयते ।

Digitized by Google

(2) तद्विरम शुष्ककलहात्। इदं त्वसु—
संज्ञप्यते वत्सतरी सर्पिष्यन्नं च पच्यते।
श्रोत्रियः श्रोत्रियगृहानागतोऽसि जुषस्व नः ॥ २ ॥
जाम। (3) अत्र वो विज्ञापयामि किन्तु चमे यदि रामः प्रकृष्टवीर्य्यो न स्यात्। पश्यन्तु भवन्तः—
(4) रामः कर्म्मभिरद्भुतैः शिशुरपि ख्यातस्ततो भार्गवः
कस्मात्प्राप्य तिरस्क्रियामसहनोऽप्यस्थादिति प्रस्तुते।

---

(2) शुष्ककलहात् निष्फलयुद्धात्। वत्सतरी संज्ञप्यते विशस्यते। यथोक्तं मनुना "मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि। अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥ एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः। आत्मानञ्च पशुञ्चैव गमयत्युत्तमां गतिम् ॥" इति ५, ४१–४२। यथा चोक्तमुत्तरचरिते चतुर्थेऽङ्के "श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः" इति। प्रायेण वशिष्ठसंहितायाश्चतुर्थमध्यायं लक्षीकृत्येदमुक्तम्। सुद्रितायान्तु संहितायां केवलं "ब्राह्मणाय राजन्याय वाभ्यागताय वा महोक्षं वा महाजं वा पचेत्। एवम् अस्य आतिथ्यं कुर्वन्ति" इति पाठो दृश्यते। वत्सतरीमित्यंश इदानीन्तनहिन्दुधर्मविरोधाद्वा लिपिकराणां प्रमादाद्वा परित्यक्त इति प्रतीमः। सर्पिषि घृते अन्नं च पच्यते साध्यते त्वदर्थमिति शेषः। श्रोत्रियाणां वेदविदाम् अस्माकं गृहान् आगतोऽसि नः अस्मान् जुषस्व मोदय।

(3) चमे आतिथ्यं महोत्सं शक्नोमि। प्रकृष्टम् उच्चतं वीर्य्यं यस्य स प्रकृष्टवीर्यः।

(4) शिशुरपि रामः अद्भुतैः कर्मभिः ख्यातः। ततः रामात् तिरस्क्रियां गुरुधनुर्भङ्गरूपाम् अवमाननां प्राप्य असहनोऽपि असहनोऽपि

Digitized by Google

को विद्याद्गुरुगौरवादिति, भवेज्ज्ञाताऽपि वक्ता पुन-
र्नत्वेवास्ति यथास्थितस्य, सुलभद्वेषं हि वीरव्रतम् ॥ ३ ॥

अपिच।

(5) यशसि निरवकाशं विश्वतश्चीयमाने
कथमपि वचनीयं प्राप्य यत्किञ्चिदेव।
क्षतविततिरकस्मात् प्राकृतैरुत्तमानां
विरमति न कथञ्चित् कश्मला किंवदन्ती ॥ ४ ॥

वसिष्ठः। (6) अयि वत्स! *किमनया यावज्जीवमायुधपिशा-
चिकया? श्रोत्रियोऽसि जामदग्न्य! पूतं भजस्व पन्थान-

---

*कियच्चिरमियमतिनाटयिष्यति भवन्तमायुधपिशाची। अ०. रा०. ४.।
तस्य खल्वियं.....यावज्जीवमायुधपिशाची न हृदयादपक्रामति। बा०. रा०. ४.।

भार्गवः कस्मात् केन हेतुना अस्यात् तितिक्षाञ्चक्रे इति प्रस्तुते इति विषये उद्यते गुरुगौरवादिति को विद्यात् भवतामादरात् युद्धाद्विरराम इति को जानीयात् न कोऽपीति भावः। ज्ञाताऽपि भवेत् यद्यस्य विषयस्य कोऽपि ज्ञाता भवेत् यथास्थितस्य यथाभूतस्य भूतार्थस्येति यावत् वक्ता पुनर्नास्त्येव। हि यतः वीरव्रतं सुलभः द्वेषः यस्मिन् तत् वीराणां हि बहवो विद्वेषिण इति भावः।

(5) विश्वतः सर्वतः निरवकाशं निरवच्छिन्नं चीयमाने उपचीयमाने यशसि महतामिति शेषः। कथमपि कष्टेन यत्किञ्चिदेव अल्पमपि वचनीयं वक्तव्यं छिद्रमिति भावः प्राप्य प्राकृतैः नीचजनैः अकस्मात् क्षता विततिः प्रसर्पणं यस्याः सा बद्धमूलतेत्यर्थः उत्तमानां जनानां सम्बन्धिनीति शेषः कश्मला कलुषा सापवादा इति भावः किंवदन्ती प्रवादः न कथञ्चित् न जातु विरमति उपशाम्यति।

(6) यावज्जीवं यावदायुः। आयुधान्येव पिशाचिका डाकिनी

मारण्यकश्वासि। तत् प्रचिनु चित्तप्रसादनीश्चतस्रो मैत्र्यादिभावनाः। प्रसीदतु हि ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः। समापद्यतु परशुं च। तत्प्रसादजमृतम्भराभिधानमवहिःसाधनोपाधेयसर्वार्थसामर्थ्यमपविद्धविघ्नबोपरागमूर्जस्वलमन्तर्ज्योतिषो दर्शनं प्रज्ञानमभिसंभवति। तद्व्याचरितव्यं ब्राह्मणेन। तरति येन मृत्युं पाप्मानम्। अन्यत्रं चाभिनिविष्टोऽसि। पश्य—

आयुधपिशाचिका। आयुधरूपेण भूतावेशेन अलम् इत्यर्थः। श्रोत्रियोऽसि आरण्यकः वनवासी च असि पूतं पवित्रं पन्थानं भजस्व अनुवर्तस्व। प्रचिनु अनुशीलय चित्तं प्रसादयन्ति विमलीकुर्वन्तीति चित्तप्रसादनीः। मैत्रीकरुणामुदितोपेक्षाः चित्तप्रसादनीः भावनाः। पात०१,३३। यथोक्तं वाचस्पतिमिश्रैः "सुखितेषु मैत्रीं सौहार्दं भावयतः ईर्ष्याकालुष्यं निवर्तते चित्तस्य। दुःखितेषु च करुणामात्मनीव परस्यापि दुःखप्रहानेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसो निवर्तते। पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्तते। अपुण्यशीलेषु चोपेक्षां माध्यस्थं भावयतोऽमर्षकालुष्यं चेतसो निवर्तते। ततश्चास्य राजसतामसधर्मनिवृत्तौ सात्विकः शुक्लो धर्म उपजायते।" इति। "विशोका विगतशोका दुःखरहिता। ज्योतिरस्यास्तीति ज्योतिष्मती प्रकाशरूपा हृदयपुण्डरीके" इति च तद्व्याख्या। प्रसीदतु विमला भवतु। परशुञ्च समापद्यतु त्यजतु। तस्याः चित्तवृत्त्याः प्रसादेन कालुष्यविगमेन जातं तत्प्रसादजम्। "ऋतं सत्यं बिभर्त्ति कदाचिदपि न विपर्ययेण आच्छाद्यते" इति ऋतम्भरम्। तदभिधानं संज्ञाऽस्येति ऋतम्भराभिधानं ऊर्जस्वलं बलान्वितम् अन्तर्ज्योतिषः द्यावापृथिव्योरन्तरालचारिणां दृश्यते अनेन इति दर्शनं प्रज्ञानं विज्ञानम् अभिसम्भवति

Digitized by Google

(7) *परिषदियमृषीणामेष वृद्धो युधाजित्
सह नृपतिरमात्यैर्लोमपादश्च वृद्धः।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामङ्ग! भो! याचकस्ते ॥ ५ ॥

जाम। एवमेतत्। किन्तु—

* परिषदियमृषीणामेष वृद्धो नरेन्द्रः। बा० रा० १. ६०.।

आविर्भवति। किंभूतं प्रज्ञानं न वह्निःसाधने वाह्यकरणे उपायेयं नियोज्यं सर्वार्थसामर्थ्यं सर्वशक्तित्वं यस्य तत्। यदुक्तं पातञ्जलभाष्यकारेण भगवता व्यासेन "भावनातः समाधिर्यः स संयमः। ततो बलान्यवन्त्यप्रवीर्याणि जायन्ते" इति। "चतुष्टयात् खल्वियं कर्मजातिः—कृष्णा, शुक्लकृष्णा, शुक्ला, अशुक्लाऽकृष्णा चेति। तत्र कृष्णा दुरात्मनाम्। शुक्लकृष्णा बहिःसाधनसाध्या, तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयः। शुक्ला तपःस्वाध्यायध्यानवतां सा हि केवले मनस्यायत्तत्वाद्बहिःसाधनाधीनानपरान् पीडयित्वा भवति। अशुक्लाऽकृष्णा संन्यासिनां क्षीणक्लेशानां चरमदेहानामिति" इति च। ते "हि न क्वचिद्बहिःसाधनसाध्ये कर्मणि प्रवृत्ताः" इति व्याख्या। पुनः किम्भूतम् अपविद्धः निरस्तः विप्लवः विषयासङ्गानमेव उपरागः मलावरणं येन तत्। येन आचरणेन मृत्युं पाप्मानं पापं तरति अतिक्रामति। अन्यत्र तपस्यायाम्।

(7) इयम् ऋषीणां परिषत् सभा। एष वृद्धो युधाजित् कैकेयीभ्राता। रा०. १. ७६. २...। अमात्यैः सह वृद्धो नृपतिः लोमपादश्च अङ्गराजश्च यस्मै दशरथः शान्तां कन्यां दत्तवान्। रा०. १. ८-१० अ०। विवाहार्थं सर्वे दशरथसम्बन्धिनो मिलिता इति ध्वनिः। अविरतम् अवच्छिन्नं यज्ञं यस्य सोऽयं ब्रह्मवादी वेदवित् पुराणः वृद्धः जनकानां जनकवंश्यानां प्रभुरपि ते याचकः। "अङ्ग भो" इति सम्बोधने।

Digitized by Google

(8) यत्नमूलमनुत्खाय न पुनर्द्रष्टुमुत्सहे ।
त्र्यम्बकं देवमाचार्य्यमाचार्य्यानीं च पार्वतीम् ॥ ६ ॥

विश्वा । (9) यदि गुरुष्वनुरुध्यसे चिन्तयस्व मामपि ततः । किञ्च ।

(10) हिरण्यगर्भादृषयो बभूवुर्वसिष्ठभृग्वङ्गिरसस्त्रयो ये ।
सोऽयं वसिष्ठो भृगुनन्दनस्त्वमयं हि तस्याङ्गिरसः प्रपौत्रः ॥७॥

जाम । (11) प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
नत्वेवं दूषयिष्यामि यत्नग्रहमहाव्रतम् ॥ ८ ॥

तथाहि ।

(12) यतो विमुक्तेरपि मानरक्षणम्

---

(8) यत्नोः रामस्य मूलम् अनुत्खाय अनुत्पाट्य अकृत्वा रामनिधनमित्यर्थः आचार्यं गुरुं देवं त्र्यम्बकं शिवम् आचार्यानीं तद्भार्यां पार्वतीं च पुनः द्रष्टुं न उत्सहे । २. २२. ज. टीका ।

(9) यदि गुरुभक्तस्त्वं तदा मम वचनेऽपि स्थातव्यं यतोऽहमपि ते गुरुः । विश्वामित्रो हि जमदग्नेर्मातामहीगर्भजः । वि०. ४. ७. १६. ।

(10) हिरण्यं हैममण्डं गर्भः सम्भवो यस्य स हिरण्यगर्भो ब्रह्मा । "तदण्डमभवद्धैमं..... । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इति मनुः १. ६. । तस्मात् ये त्रयः ऋषयः वसिष्ठः भृगुः अङ्गिराः(१.८.टीका) बभूवुः । सः अयं वसिष्ठः । त्वं भृगुनन्दनः भृगुवंशजः (२. २२. क. टीका) । अयं यतानन्दो हि तस्य अङ्गिरसः प्रपौत्रः (१.५१–२८. टीके)

(11) पूज्यानां वो व्यतिक्रमात् आदेशलङ्घनात् प्रायश्चित्तं चरिष्यामि । तु किन्तु यत्नस्य यत्नः यत्नरूपम् एव महाव्रतं तत् एवं विना युद्धेन न दूषयिष्यामि भनज्मि ।

(12) यतो मानरक्षणं विमुक्तेः मोक्षात् अपि निसर्गेण स्वभावतः

Digitized by Google

प्रियं निसर्गेण, तथाच पश्य मे।
सनाभयो यूयमयञ्च कर्कशः
शरासनज्याकिणलाञ्छनो भुजः ॥ ९ ॥

विश्वा। खगतम्।

(13) संपूजितं हि माहात्म्यमुद्भिरन्त्यः पदे पदे।
अपि मर्माविधो वाचः सत्यं विस्रापयन्ति माम् ॥१०॥

जाम। अपिच भगवन् कुशिकनन्दन!

(14) ब्रह्मैकतानमनसो हि वसिष्ठमिश्रा-
स्त्वं ब्रूहि वीरचरितेषु गुरुः पुराणः।
वंशे विशुद्धिमति येन भृगोर्जनित्वा
यज्ञं गृहीतमथ तस्य यदत्र युक्तम् ॥ ११ ॥

वसि। खगतम्।

प्रियम्। तथा च पश्य यूयं मे सनाभयः ज्ञातयः। अयं च कर्कशः कठिनः भुजः शरासनस्य धनुषः ज्यायाः मौर्व्याः किणानि शुष्कव्रणानि लाञ्छनानि यस्य सः। वीरेण मया न युद्धाद्विरन्तव्यमिति भावः।

(13) पदे पदे संपूजितं माहात्म्यम् उद्भिरन्त्यः अनुवाद्याः मर्म आविध्यन्ति विदारयन्तीति मर्माविधो वाचः मां सत्यं विस्रापयन्ति। अवधारणे हि। अपि निश्चयार्थे।

(14) ब्रह्मणि परमेश्वरे एकतानम् एकाग्रं मनो येषां ते हि वसिष्ठ-मिश्राः। पूज्यार्थे बहुवचनम्। वीरचरितेषु पुराणो गुरुः धनुर्वेदाभिज्ञः त्वं ब्रूहि। विशुद्धिमति निष्कलङ्के भृगोः वंशे जनित्वा जातेन येन यज्ञं गृहीतम् अथ तस्य अत्र विषये यत् युक्तं समुचितम्।

Digitized by Google

(15) कामं गुणैर्महानेष, प्रकृत्या पुनरासुरः ।
उत्कर्षात् सर्वतो वृत्तेः सर्वाकारो हि दृश्यति ॥ १२ ॥

विश्वा । वत्स ! एतदुब्रवीमि—

(16) एकस्याक्रूरापराधकोपविकृतस्त्वं क्षत्रजातेरपि
प्रागाधाननिरन्वयप्रमथनादुच्छेदमेवाकरोः ।
निःसप्तावधि विप्रशुक्रजमपि क्षत्रं तदेवोद्वरन्
*वृद्धैः स्वैश्च्यवनादिभिर्नियमितः क्रोधाद्व्यरंसीरिति ॥ १३ ॥

जाम । (17) व्यरंसिषमेव पितृबधप्रयुक्तात् क्षत्रबध-महाधिकारात् किमत्र निष्क्रयः ।

---

*च्यवनादिवृद्धवाक्यगौरवनिगृहीतक्रियासमभिहारस्य । भ० रा० ४ ।

(15) पुनः किन्तु प्रकृत्या स्वभावेन आसुरः दैत्याचः । सर्वतः सर्वथा वृत्तेः चरितस्य उत्कर्षात् सर्वाकारः समग्राकृतिः हि दृश्यति उल्लिखः ।

(16) एकस्य अक्रूरस्य वृद्धस्य अर्जुनस्य अपराधात् कोपेन विकृतः संक्षोभितः प्राक् प्रथमम् आधानेन समाधानेन अभियोगेनेति यावत् निरन्वयात् अवस्थानात् अन्यायात् इति भावः प्रमथनात् विमर्दनात् क्षत्र-जातेरपि समस्तानां क्षत्रियाणामपि उच्छेदम् उन्मूलनम् एव अकरोः कृतवानसि । तदा तदनन्तरम् एव निःसप्तावधि एकविंशतिवारान् विप्र-शुक्रजं ब्राह्मणरेतोजातम् अपि क्षत्रं क्षत्रियागर्भजम् उद्वरन् उन्मूलयन् स्वैः वृद्धैः स्वकीयपितृभिः च्यवनादिभिः नियमितः नियन्त्रितः क्रोधात् व्यरंसीः विरतवान् इति । व्यरंसीः विपूर्वकरमेर्लुङि रूपम् । २,२१, ग. घ. टीके पश्य ।

(17) क्षत्राणां क्षत्रियाणां बध एव महानधिकारः व्यापारः । निष्क्रयः अपलापः ।

Digitized by Google

(18) परशुरयनिखण्डः अत्रघातं विहाय
प्रियमपि समिदिध्मस्रवनः किं न जातः ।
निश्चतविशिखदंष्ट्रश्चापदग्धोऽपि धत्ते
विगलितविषवह्निः साम्यमाशीविषस्य ॥ १४ ॥

(19) एवं मया नियमितश्रवनादिवाक्यैः
कोपानलस्य परशुस्य, पुनर्यथा तैः ।
कालेन पार्थिवकुलैः ककुभो महद्भि-
र्दग्धोत्थितैरिव वनगहनाः क्रियन्ते ॥ १५ ॥

---

(18) अयनेः वज्रस्य खण्डः वज्रनिभ इति भावः परशुः प्रियमपि अत्रघातं अत्रिछायां वधं विहाय त्यक्त्वा समिधां होमकाष्ठानाम् । इध्मानां ज्वलनकाष्ठानां स्रवनः छेदकः किं न जातः ? अधुना काष्ठाहरत्वादेव निवृत्तो मे परशुरिति भावः । निश्चिताः शाताः विशिखाः बाणा एव दंष्ट्राः दन्ताः यस्य स चापदग्धः धनुर्दग्धः अपि विगलितः निर्गतः विष एव वह्निः यस्य तस्य आशीविषस्य सर्पस्य साम्यं साडश्यं धत्ते ।

(19) एवं मया श्रवनादिवाक्यैः कोपानलस्य नियमितः शमितः परशुश्च शमितः । अत्र चह्नेरनलपरश्वोर्विशेषसंयोगात्, "यस्त्रिन्त्रिधिश्च मद्नश्च ज्ञताभियोगः" "येषां कुलेषु सविता च गुरुर्वसुश्च" इत्यादुदाहरणदर्शनेऽपि, 'नियमितः' इत्येकवचनप्रयोगो विरुद्धः इत्याक्षेपवादः । "न मां त्रातुं तातः प्रभवति, न चाम्बा न भवती" इत्यादिस्थलेष्वेकवचनप्रयोगस्तु तातादीनां विशेषसंयोगाभावाददोषः । किन्तु कालेन वाक्यशेषे पूर्ववत् तैः महद्भिः पार्थिवकुलैः राजन्यवंशैः पूर्वं दग्धैः पश्चादुत्थितैः वनैः इव ककुभः दिशः गहनाः दुर्गमाः क्रियन्ते ।

Digitized by Google

(20) निमित्तान्तरात्तु शीर्षच्छेदो राम इति। अथेदानीम्

(21) एतस्य राघवगिरोः क्षतचापलस्य
लूत्वा शिरो मयि वनाय पुनः प्रयाते।
स्वस्त्यस्तिराय रघवो जनकाय सन्तु
मा भूत् पुनर्वत कथञ्चिदतिप्रसङ्गः॥ १६॥

यता। (22) यत्किरस्ति कस्यचिद्विदेहराजस्य राजर्षेर्याज्यस्य मे प्रेयसश्चायामप्यवस्कन्दितुम्! किमङ्ग! जामातरम्।

(23) वयमिह यथा गृह्यो वह्निस्तथैव चिरं स्थिताः
सुचरितगुरुस्तस्याधारे गृहे गृहमेधिनः।

---

(20) निमित्तान्तरात् अन्धकारत्वात् धनुर्भङ्गात्। शीर्षच्छेदः शिरश्छेदार्हः।

(21) क्षतं चापलम् अविनीतं कर्म येन तस्य एतस्य राघवगिरोः रामस्य शिरो लूत्वा छित्त्वा वनाय पुनः प्रयाते प्रतिनिवृत्ते मयि रघवः रघुवंश्याः जनकाः जनकवंश्याः च चिराय चिरकालं स्वस्त्याः सन्तु। पुनः कथञ्चित् केनाऽपि प्रकारेण। अतिप्रसङ्गः अत्याग्रहः औद्धत्यमिति यावत्। 'वत' अनुकम्पायाम्।

(22) प्रेयसः अतिप्रियस्य याज्यस्य यजमानस्य आयामपि अवस्कन्दितुम् आक्रमितुं किं कस्याऽपि यत्किरस्ति। न कस्याऽपीत्यर्थः। किमङ्ग किमुत जामातरम् अवस्कन्दितुम्।

(23) गार्हपत्याग्निरिव वयम् इह गृहमेधिनः जनकस्य गृहे सुचरितः बहुशः गुरुरेव स्तम्भः तस्य आधारे चिरं स्थिताः। वयं तस्य पुरो-

Digitized by Google

यदि परिभवस्तत्रान्यस्मादुपैति धिगस्तु नः
प्रियमपि ततो धिग् ब्राह्मण्यं धिगङ्गिरसः कुलम् ॥१७॥

विश्वा। साधु वत्स गौतम! साधु। कृतकृत्य एष राजा सीरध्वजस्त्वया पुरोहितेन।

(24) न तस्य राज्यं व्यथते न भ्रश्यति न जीर्यति।
त्वं विद्वान् ब्राह्मणो यस्य राष्ट्रगोपः पुरोहितः ॥१८॥

जाम। (25) गौतम! त्वयैव बहुभिः क्षत्रियपुरोहितैः ब्रह्मतेजसा प्रस्फुरितमासीत्। किन्तु प्राकृतानि तेजांस्य-प्राकृते ज्योतिषि प्रशाम्यन्ति।

अता। सक्रोधम्। (26) अरे अनड्वन्! निरपराधराजकुल-कदन! महापातकिन्! अश्लिष्टविकृतचेष्ट! बीभत्सकर्मन्? अपूर्वपाषण्ड! काण्डीर! काण्डपृष्ठ! कथमस्यामपि दिशि

हिता इति भावः। तत्र जनकगृहे यदि अन्यस्मात् परिभवः अवमानना उपैति आगच्छति। धिक् नः अस्मान् अस्तु। ततः प्रियमपि ब्राह्मण्यं ब्राह्मणत्वं धिक्। अङ्गिरसः कुलं धिक्। धिक्शब्दयोगेन द्वितीया।

(24) राष्ट्रं राज्यं गोपायति रक्षतीति राष्ट्रगोपः।

(25) क्षत्रियस्य पुरोहितः क्षत्रियपुरोहितः। प्राकृतानि सामान्यानि तेजांसि त्वादृशानि अप्राकृते महति ज्योतिषि मयि प्रशाम्यन्ति विरमन्ति। नाऽहं तवाभिभवस्थानम्।

(26) अनः शकटं वहतीति अनड्वान् पशुः। निरपराधराजकुल-कदन निर्दोषक्षत्रियाणाम् अन्तक। अश्लिष्टाः गर्हिताः विकृता बीभत्साः

प्रगल्भसे ? ननु च रे ! त्वमसि किं ब्राह्मण एव ? अहो ! महाब्राह्मणस्याचारः ।

(27) मातुरेव शिरश्छेदो गर्भाणां चापकर्त्तनम् ।
राज्ञां च सवनस्थानां ब्रह्महत्यासमो वधः ॥ १९ ॥

जाम । (28) आः स्वस्तिवाचनिक ! दुष्ट ! दुष्ट ! सामन्त-पुरोहित ! अपि च रे ! अहल्यायाः पुत्र ! अहं तव काण्ड-पृष्ठः ?

भता । (29) आः दुष्ट दुर्मुख भृगुप्रसवपांसन !
राजानो गुरवस्ते महिम्नैव महाक्षमाः ।
क्षमन्तां नाम, नत्वेवं भृतानन्दः क्षमिष्यते ॥ २० ॥

[इति कमण्डलूदकेनोपस्पृशति ।

चेष्टाः व्यवसायाः यस्य स अशिष्टविज्ञतचेष्टः । अपूर्वः अश्रुतः पाषण्डः वेदविरुद्धाचारः । काण्डः बाणः अस्यतीति काण्डीरः धानुष्कः । काण्डात् पृष्ठे यस्य स काण्डपृष्ठः त्यक्तनिजधर्म्म इत्यर्थः, ब्राह्मणानां धनुर्धारणनिषेधात् । महाब्राह्मणस्य द्विजेन्द्रस्य ।

(27) गर्भाणां गर्भस्थानां बालानाम् अपकर्तनं छेदनम् । सवनस्थानां यज्ञं कुर्वतां राज्ञां ब्राह्मणवधतुल्या हत्या ।

(28) स्वस्तिवाचनिक स्वस्तीति वक्तुं प्रवीण न तु वेदज्ञ इति भावः । सामन्तस्य नृपतेः जनकस्य पुरोहित । अहल्यायाः व्यभिचारिण्या इति भावः (१. ५१. टीका) ।

(29) भृगुप्रसवपांसन भृगुकुलाङ्गार ! महिम्नैव महत्त्वादेतोः महाक्षमाः बहुसहनशीलाः एते राजानो गुरवश्च क्षमन्तां नाम । किन्तु

Digitized by Google

वसि । (30) कः कोऽत्र भोः ! प्रसाद्यतां प्रसाद्यताम् । अयं धविव्रनिर्धूत हुताग्निः प्रणीतपृषदाज्याभिघारघोरस्तनूनपात्समिध्यमानदारुणब्रह्मवर्चसज्योतिराङ्गिरसः ।

यता । वसंरब्धं शापोदकं गृहीत्वा । भो भो ! सभासदः ! पश्यन्त भवन्तः ।

(31) सक्रोधः प्रसभमहं पराभिघाता-
दुद्भूय द्रुततरमाततायिनं वः ।
उत्पातक्षुभितमरुद्विघट्टमानो
वज्राग्निर्द्रुममिव भस्मसात् करोमि ॥ २१ ॥

नेपथ्ये । (32) प्रसीद भगवन् ! गृहानुपगते प्रशाम्यतु दुरासदं तपस्तेजः ।

एवम् कृत्वं यतानन्दः न अभिधत्ते अधेयिष्यति । उपसृपति शापदानायेति भावः ।

(30) धविव्रेण व्यजनेन निर्धूतः संधुक्षितः प्रणीतस्य मन्त्रपूतस्य पृषदाज्यस्य दधिविक्षेपस्य हुतस्य अभिघारेण सेचनेन घोरः अग्निः यागाग्निः इव । "पृषदाज्येनानुयाजान् यजति" इति श्रुतेः । तनूनपादाद्यविर्भुजा क्रोधाग्निनेति भावः समिध्यमानं प्रज्वलितं दारुणं घोरं ब्रह्मवर्चसं ब्राह्मणतेजः एव ज्योतिः यस्य स आङ्गिरसः यतानन्दः ।

(31) सक्रोधः कुपितः अहं प्रसभं प्रसह्य पराभिघातात् शत्रुप्रहारात् उद्भूय उद्गत्य द्रुततरं वः युष्माकम् आततायिनं वधोद्यतं भार्गवं उत्पातक्षुभितमरुद्विघट्टमानः औत्पातिकवायुवियुक्तः वज्रस्य अग्निः द्रुमं वृक्षम् इव भस्मसात् करोमि निर्दहामि ।

(32) गृहान् उपगते अतिथौ भार्गवे । तस्मिन् एतत् शापदानं किं

Digitized by Google

श्लाघ्यो गुणैर्हिजवरस्य, निजस्य बन्धु-
स्तस्मिन् गृहानुपगते सदृशं किमेतत्।
विद्वानपि प्रचलितस्तु यदेष मार्गात्
त्वं हि तत्र विजयाय श्रमं भज त्वम् ॥ २२ ॥

वसि। यागोदकमपहरन्। वत्स श्रुतानन्द! यथाह सम्बन्धी महाराजदशरथः। अन्यत्र—

(33) यत् कल्याणं किमपि मनसा तदयं वर्त्तयाम-
स्त्वं जाबालिप्रभृतिसहितः शान्तिमध्यग्नि कुर्याः।

सदृशम् उचितम्। यत् तु एष विद्वान् अपि मार्गात् धर्मपथात् प्रचलितः भ्रष्टः। तत्र त्वं हि विजयाय विजेतुम् इत्यर्थः। त्वं श्रमं भज श्रान्तो भव।

(33) यत् किमपि कल्याणं तत् वयं मनसा वर्तयामः चिन्तयामः। त्वं जाबालिप्रभृतिभिः सप्तभिः सह अध्यग्नि अग्नौ। हृयीयासप्तम्योर्बहुलं पा०. २, ४, ८४, इति सप्तम्यर्थेऽव्ययीभावः। शान्तिम् अनर्थनिवृत्तिं कुर्याः। तथा हि रघुः "शान्तिमधिजग्मुषस्तमृषिप्रः दशरथजन्मने वाजिमेधे क्रोतासीदिति रामायणे पठ्यते। यथा "स राजवचनं श्रुत्वा सुमन्त्रस्वरितस्तदा। आनयामास क्रोतुं तान् वेदवेदाङ्गपारगान्॥ सयज्ञं वामदेवञ्च जाबालिमथ काश्यपम्। ....."१, ११, ८-९। अथ खलु जेतुं विजयाय अस्माकं ऋषेभ्यः सप्तर्षि विश्रुतो भगवान् वामदेवः जैत्रान् जयशीलान् ऋक्साम्नि ऋग्वेदस्तोत्राणि सामानि सामवेदगीतानि अनुवाकान् अथर्ववेदमन्त्रान् जपन् ऋचाञ्च पठन्। यद्यप्यृग्वेदस्यानुवाकाः सन्ति, तथापि सामवेदस्यानुवाकाभावात्, ऋक्षेनानुवाकस्य सम्बन्धो नास्

जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाका-
नस्मच्छिष्यैः सह स भगवान् वामदेवो गृणातु ॥ २३ ॥

[परिष्वज्य निष्क्रामयति ।

जाम । (34) पश्यत वटोः क्षत्रियावष्टब्धस्य गर्जितानि । तत् किमनेन ? भोः भोः ! कोशलेश्वरविदेहप्रसादोपजीविनो ब्राह्मणाः ! सप्तकुलपर्वतद्वीपगोचराश्च सर्वक्षत्रियाः ! वदामः—

गतिः । जैत्रमन्त्राभावादृग्यजुर्वेदोऽत्र न लक्षितः । यत्र नियताक्षराणि नियताश्च पादाः नियतानि चावसानानि सा ऋक् । ऋक्समुदायः सूक्तम् । ऋगतिरिक्तं प्रगीतं मन्त्रवाक्यं साम । एतद्विस्तरेण व्याख्यातं श्रौतसूत्रभाष्यकारेण । वामदेवो दशरथमन्त्री । यथोक्तं रामायणे "मन्त्रिणाष्टौ तथैवात्र तस्यात्यन्तर्धिसम्मतौ । वसिष्ठो वामदेवश्च षडङ्गवेदपारगौ ॥" १. ७. १. । रामादीनां विवाहानुष्ठानायैते मिथिलामागता इति ध्वनिः । गृणात्वित्यत्र गृणोत्विति लिपेनष्टकृतः पाठः ।

(34) क्षत्रियैः अवष्टब्धस्य रक्षितस्य वसिष्ठस्य । कोशलस्य देशस्य ईश्वरस्य नाथस्य दशरथस्य विदेहस्य विदेहनाथस्य जनकस्य प्रसादेन अनुग्रहेण उपजीविनः लब्धजीविकाः । पौराणिकमतानुसारेण सप्त कुलपर्वताः सप्त च द्वीपाः । यथोक्तं वैष्णवे "महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तात्र (भारते) कुलपर्वताः ॥" २. २. २. । "जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥" २. २. ५. । तेषां निवासिनः ।

Digitized by Google

(35) तपो वा शस्त्रं वा व्यपदिशति यः कश्चिदिह वः
स दर्पादुद्दामद्विषमसहमानः कलयतु ।
अरामां निःसीरध्वजदशरथौकृत्य जगती-
मद्यस्तत्कुल्यानपि परशुरामः शमयति ॥ २४ ॥

नेपथ्ये। (36) भार्गव ! भार्गवः ! अति हि नामावलिप्यसे !

आम । असूयति नामायमस्मदवलेपाय जनकः संरब्धश्च ।

प्रविश्य जनकः ।

(37) शत्रुध्वंसात् परिणतिवशाद्गच्छतन्त्रप्रधाने
नैरन्तर्यादथ च परमब्रह्मतत्त्वोपलम्भात् ।
त्वाष्ट्रं तेजो विजयि सहजं यद्धनुरंसीदिदं तत्
प्रत्युद्भूय त्वरयति पुनः कर्मणि कार्मुकं नः ॥ २५ ॥

---

(35) यः युष्माकं मध्ये यः कश्चित् तपो वा शस्त्रं वा व्यपदिशति तपोबलं शस्त्रबलं वा बिभर्मीत्यहङ्कारं करोति स उद्दामद्विषं संयुध्यं मत्तुं माम् असहमानः कलयतु तत् क्षमतु । पृथिव्याः रामं सीरध्वजं दशरथञ्च दूरीकृत्य निहत्येत्यर्थः अद्यतनः परशुरामः तेषां कुल्यान् वंश्यान् अपि शमयति नाशयति ।

(36) अवलिप्यसे अगर्वभसे। अयं जनकः अस्माकम् अवलेपाय गर्वाय असूयति संरब्धः क्रुद्धश्च । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः पा० १. ४. ३७. इति वचनात्सम्प्रदानं ।

(37) शत्रूणां ध्वंसात् नाशात् परिणतिवशात् वार्धक्यात् अथच नैरन्तर्यात् अविच्छिन्नं परमब्रह्मणः ईश्वरस्य तत्त्वस्य याथार्थ्यस्य उपलम्भात्

Digitized by Google

जाम । भो जनक !

(38) त्वं ब्रह्मण्यः किल परिचतस्यासि धर्मेण युक्त-
स्त्वां वेदान्तेष्वचरम ऋषिः सूर्यशिष्यः यशास ।
इत्याचारादसि यदि मया प्रश्रयेणोपजुष्ट-
स्तत् किं रोषादविदितभयं कर्कशानि ब्रवीषि ॥२६॥

जन । (39) अन्वभेदनं क्रियते, प्रश्रयेति शृणुत भोः सभासदः !

भृगोर्वंशे जातस्तपसि च किलायं स्थित इति
द्विषत्यप्यस्माभिश्चिरमिह तितिक्षैव हि कृता ।
यदा भूयोभूयस्तृषवदवधूनोत्यनिभृत-
स्तदा विप्रेऽप्यस्मिन् नमतु धनुरन्यास्ति न गतिः ॥२७॥

परिचयात् स्वहृतत्वप्रधाने स्वकधर्मव्याप्तते मयि यत् सहजं क्षत्रियसाधारणं विजयि जयशीलं तेजः व्यरंसीत् । तत् इदं तेजः पुनः प्रत्युज्जृम्भ्य आविर्भूय कर्मणे युद्धाय नः कार्मुकं स्मरयति ।

(38) त्वं ब्रह्मण्यः श्रोत्रियः परिचतः हृतः धर्मेण युक्तः धार्मिकश्च असि । न चरमः अचरमः प्रधानः ऋषिः सूर्यशिष्यः (२, ६४, टीका) याज्ञवल्क्यः त्वां वेदान्तेषु यशास वेदान्तानध्यजीगपत् । इति हेतोः आचारात् आचारानुसारेण यदि प्रश्रयेण विनयेन उपजुष्टः सन्तोषितः असि । तत् किं किमर्थं रोषात् क्रोधात् अविदितभयं निर्भयं कर्कशानि कटूनि वाक्यानि ब्रवीषि ।

(39) अन्वाया भेदनम् अन्वभेदनं सभाविधो वाचः । ता हि विनयेन सह न सम्भवन्ति । 'अयं परशुरामः भृगोः वंशे जातः तपसि च किल

Digitized by Google

आम । सरोषहासाक्षेपम् । किमाह्य भोः ! किमाह्य धनुरिति ? आश्चर्यम् !

(40) चलालोकक्षुभितहुतभुक्प्रस्फुलिङ्गाट्टहासं
हास्यं पश्यन्नपि रिपुशिरःग्राणघातं कुठारम् ।
दत्तोत्सेकः प्रलपति मया याज्ञवल्क्यानुरोधा-
न्मिथ्याघातः किमपि जरसा जर्जरः क्षत्रबन्धुः ॥ २८ ॥

आम । सावेगम् । किमत्र बहुना—

(41) ज्याजिह्मया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारि घोरघनघर्घरघोषमेतत् ।

स्थितः' इति द्विषति शत्रौ अपि अस्मिन् चिरम् दृढ अस्माभिः तितिक्षा क्षमा एव कृता । यदा अनिष्टतः चपलः भूयोभूयः वारं वारं हस्तक्षेपं अवधूनोति अवजानाति अक्षानिति शेषः, तदा विप्रेऽपि आयासे आत्मक्षेऽपि अस्मिन् आमदग्न्ये धनुः नमतु आरुह्यताम् । अन्या गतिः उपायः नास्ति ।

(40) आज्ञवल्क्यानुरोधात् याज्ञवल्क्यशिष्य इति विनयवाक्येन दत्तः उत्सेकः गर्वः यस्य स किमपि अत्यन्तं मिथ्याघातः वृथावलिप्तः जरसा जर्जरः अतिपरिचयतः क्षत्रबन्धुः किं क्षत्रियः जनकः चलालोकेन चलियदर्शनेन क्षुभितस्य संक्षुब्धितस्य हुतभुजः वह्नेः प्रस्फुलिङ्गा एव अट्टहासाः यस्य तं रिपुशिरांसि शत्रूणां मूर्द्धान एव ग्राणं ग्राणयन्त्रं तेन घातं तीक्ष्णीकृतं कुठारं पश्यन्नपि प्रलपति जल्पति । हास्यं हासकारम् एतत् । सात्त्विकः परशुरामकुठार इति कवेरभिप्रायः ।

(41) ज्यया मौर्व्या एव जिह्मया वलयिते वलयाकारेण संवृत्ते

आसप्रसक्तहसदन्तकवल्गयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ २९ ॥

[इति धनुरारोपयति ।

नेपथ्ये । (42) विरम नरपते ! कथं द्विजेऽस्मि-
न्नविरतयज्ञवितीर्णगोसहस्रः ।
तव पलितनिरन्तरः पृषत्कं
स्पृशति पुराणधनुर्द्धरस्य पाणिः ॥ ३० ॥

जन । सखे महाराज दशरथ !

उत्कटे भीषणे कोटी एव दंष्ट्रे दन्तौ यस्य तत् । घोरं घनस्य मेघस्य इव घर्घरघोषं 'घर्घर' नादं उद्गारि जनयत् एतत् चापम् आसाय प्रस-क्तस्य निरतस्य हसतः अन्तकस्य यमस्य वल्गायन्त्रस्य मुखरूपयन्त्रस्य जृम्भायाः व्यादानस्य विडम्बि अनुकारि विकटं विशालम् उदरं मध्यं यस्य तत् अस्तु । आकर्षणेन धनुषः मध्यभागो विकटो भवतीति भावः । उदरस्य मध्यार्थे भट्टिः "समध्यासिसिषाङ्के विरूपाक्षः पुरोदरम्" १४. १२. । यद्यपि वैजयन्तीकोऽभिधाने तारानाथोऽपि च शब्द-रत्नसमन्वयाभिधौ चापस्य केवलपुंल्लिङ्गत्वनिर्देशोऽस्ति, तथापि "मुख-नयनशोफवनमांसरुधिरकार्मुकविवरजलदघनगात्राभिधानानि" इति रुद्रेण पाणिनिनाऽस्य नपुंसकत्वमुक्तम् । धनञ्जयेनाऽपि "कार्मुकं धन्व चापञ्च" इति वाक्येनाऽस्य केवलनपुंसकत्वं निर्दिष्टम् । अमरेण तूभयलिङ्गत्वं कथितम् ।

(42) नरपते जनक विरम । तव पुराणधनुर्द्धरस्य वृद्धधानुष्कस्य अविरतेषु सततेषु यज्ञेषु वितीर्णं दत्तं गोसहस्रं येन स पलितनिरन्तरः

(43) अज्ञानधिक्षिपतु नाम, न किञ्चिदेतत्,
कस्य द्विजे परुषवादिनि चित्तभेदः ।
वत्सस्य मङ्गलविरुद्धमयं तु पापः
कर्णे रटन् कटु कथं नु वटुर्विषह्यः ॥ ३१ ॥

जाम । आः दुरात्मन् क्षत्रियापसद ! वटुरित्यधिक्षिपसि ?

(44) उत्तिष्ठोत्तिष्ठ यावद्विगलितयकृत्क्लोमवक्षोरुहाभ्यां
स्रायुग्रन्थ्यस्थिशुक्रव्यतिकरितजरत्कन्धराद्यन्तकण्ठः ।
मूर्ध्नश्छेदादुदञ्चल्लघमनिशिरारक्तडिण्डीरपिण्डः
प्रायः प्राग्भारघोरः पशुमिव परशुः पर्वशस्त्वां शृणातु ॥३२॥

प्रविश्यान्तरे दशरथः । भो भार्गव ! भो भार्गव !

वलिपरीतः पाणिः करः कथं अस्मिन् द्विजे भार्गवे पृथक्कं वाक्यं ब्रूयति कथयतीत्यर्थः ।

(43) अज्ञानं अधिक्षिपतु अपवदतु नाम । एतत् न किञ्चित् न गणनीयम् । परुषवादिनि कटुभाषिणि द्विजे भार्गवे कस्य चित्तभेदः क्रोधः । किन्तु अयं पापः दुर्वृत्तः वटुः ब्राह्मणब्रुवः वत्सस्य रामस्य मङ्गलविरुद्धम् अमङ्गलं कटु परुषं वाक्यं कर्णे रटन् भाषमाणः कथं नु विषह्यः क्षन्तव्यः ।

(44) उत्तिष्ठ, उत्तिष्ठ, यावत् विगलिताः स्वस्थतयः कृताः यकृता क्लोम्ना मूत्राशयेन वक्षोरुहाभ्यां स्तनाभ्याम् स्नायुभिः अन्त्रैः अस्थिभिः सन्धिभिः अक्षिभिः शुक्रेण रेतसा च व्यतिकरिताः संभिन्नाः जरत्यः परिक्षीणाः कन्धरा ग्रीवा दत्ताः कण्ठस्य येन सः । "सकले काये शुक्रं तिष्ठति देहिनाम्" इति भावप्रकाशः । मूर्ध्नः शिरसः छेदात्

(45) एष नो नरपतिर्यथा स्थितः स्वं शरीरमपि न स्थितं तथा तत्र वाक्परिभवैः कृतैर्वयं सर्वथैव ननु दुःखमाप्ताः ॥३३॥

जाम । ततः किम् ?

दश । ततश्च न क्षम्यते ।

जाम । (46) त्वमप्यपरः प्रभविष्णुरिव मामवस्कन्दयसि । चेतयस्व नित्यनिरवग्रहः प्रकृत्यैव रामोऽस्मि जामदग्न्यः । क्षत्रियश्च भवान् ।

दश । (47) अतः खलु नोपेक्ष्यसे ।

दुर्दान्तानां दमनविधयः क्षत्रियेष्वायतन्ते,
दुर्दान्तस्त्वं, वयमपि च ते क्षत्रियाः शासितारः ।

कर्त्तनात् उद्वृतः निर्गच्छतः गलस्य कण्ठस्य धमनीनां शिराणाञ्च रक्तस्य फेनस्य डिण्डीरस्य पिण्डः यत्र च मे प्रायः प्रावेष प्राग्भारेण रक्तादि-स्रोतेन घोरः परशुः पशुम् इव त्वां पर्वतः तव सन्धेः सन्धिं मर्म्माणि छिनत्तु छनत्तिति भावः । "सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः" इति, "धमन्यो नाभितो जाताश्चतुर्विंशतिसंख्यया । दशोर्द्ध्वा दशाधोगा ग्रेषास्तिर्यग्गताः स्मृताः ॥" इति च भावप्रकाशः । प्राग्-भारघोरमिति त्रिषेनष्टहीतः पाठः ।

(45) यथा जनकः स्थितः तथा शरीरमपि ते न नियन्त्रितम् । अत अधिक्षेपेणाऽलम् । सर्वप्रकारेण वयं विफलाः ।

(46) प्रभविष्णुः प्रभुरिव माम् अवस्कन्दयसि शास्सि । अहं स्वभा-वतः सर्वदा निर्बन्धोऽस्मीति चेतयस्व जानीहि ।

(47) अतः निरवग्रहोऽसीति हेतोः क्षत्रियेण मया न उपेक्ष्यसे

शश्वत् शान्तो भव, किमपरं दश्यसे सोऽधुनैव ।
क्व ब्रह्माणः प्रशमनपराः क्षत्रधार्य्यं क्व चास्त्रम् ॥ ३४ ॥

जाम । विहस्य । (48) चिरस्य खलु कालस्य जामदग्न्यः सनाथो वर्त्तते यस्य यूयं क्षत्रिया राजानो विनेतारः ।

दश । अरे ! किमत्र काचिद्भ्रान्तिः ?

49) अज्ञो वा, यदि वा विपर्य्ययगतो ज्ञानेऽथ सन्देहभृद्-
दृष्टादृष्टविरोधि कर्म्म कुरुते यस्तस्य गोप्ता गुरुः ।

दश्यसे । दुर्दान्तानां दमनविषयः क्षत्रियेषु आयत्तो दुर्दान्ताः क्षत्रियैः शासितव्याः । यथोक्तं मनुना "स राजा पुरुषो दण्डः स नेता शासिता च सः । चतुर्णामाश्रमाणान्तु धर्मस्य प्रतिभूः स्मृतः ॥" ७. १७. क्षत्रिया वयं ते तव शासितारः दण्डप्रणेतारः । शश्वत् सपदि शान्तो भव । किम् अपरं किम् अन्यत्, अधुना इदानीमेव स त्वं दश्यसे शास्यसे । क्व प्रशमनपराः शान्तिपरायणाः ब्रह्माणः ब्राह्मणाः । क्व क्षत्रियैः धारणीयम् अस्त्रञ्च । यथोक्तं वशिष्ठेन "षट् कर्माणि ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च । तीणि राजन्यस्याध्ययनं यजनं दानम् । शस्त्रेण च प्रजापालनं स्वधर्मः । तेन जीवेत्" इति ।

(48) चिरस्य कालस्य दीर्घकालानन्तरम् । नाथेन स्वामिना सह सनाथो नाथवान् ।

(49) अज्ञो वा, यदि वा ज्ञाने विपर्ययगतः विभ्रान्तः अथ सन्देहभृत् सन्दिग्धः सन् यः दृष्टादृष्टविरोधि कर्म कुरुते अदृष्टस्य न सम्यक् परिच्छेत्तेति भावः कार्यस्य विरुद्धं करोति । तस्य गोप्ता

निःसन्देहविपर्य्यये सति पुनर्ज्ञाने विरुद्धक्रियं
राजा चेत् पुरुषं न शास्ति तदयं प्रायः प्रजाविप्लवः ॥३५॥

विश्वा। युक्तमाह भोः! महाराजः।

(50) अनुत्पन्नं ज्ञानं यदि यदि च सन्देहविधुरं
विपर्य्यस्तं वा स्यात् परिचर वसिष्ठस्य चरणौ।
ध्रुवं ज्ञाने दोषः कथमपरथा दुर्व्यवहृति-
र्विशुद्धौ चेत् पापं चरसि न सहन्ते नृपतयः ॥३६॥

जाम।—

(51) धर्मे ब्रह्मणि कार्मुके च भगवानीशो हि मे शासिता,

भ्रमसंशोधको गुरुः। पुनः किन्तु ज्ञाने निःसन्देहविपर्यये निश्चयेन विपर्यस्ते सति विरुद्धक्रियम् आचारलङ्घिनं पुरुषं राजा यदि न शास्ति दण्डयति, तत् अयं प्रजानां विप्लवः संक्षोभः प्रायः। यथोक्तं मनुना "यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः। शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः। दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः। सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥" इति ७. २०.—२४.।

(50) यदि ज्ञानम् अनुत्पन्नं न जातं स्यात्। यदि च सन्देहविधुरं संशयाकुलितं विपर्यस्तं विभ्रान्तं वा स्यात्। वसिष्ठस्य गुरोः चरणौ पादौ परिचर भज। ध्रुवं निःसन्देहं ज्ञाने दोषः विपर्यस्तं ज्ञानम्, अपरथा दुर्व्यवहृतिः दुराचारः कथं सम्भवतीति शेषः। यदि विशुद्धौ निष्पापे पापं चरसि करोषि नृपतयः राजानः न सहन्ते मर्षयिष्यन्ति।

(51) धर्मे ब्रह्मणि वेदे कार्मुके धनुर्वेदे च भगवान् ईशः शिवः

Digitized by Google

सर्वक्षत्रनिवर्हणस्य विनयं कुर्य्युः कथं क्षत्रियाः ।
सम्बन्धस्तु वसिष्ठमित्रविषये मान्यो जरायां, न तु
स्पर्द्धायामधिकः समश्च तपसा ज्ञानेन चान्योऽस्ति मे ॥३७॥

वयि । (52) भृगुप्रसवात् पराजय इति प्रियं नः । किन्तु खलु

अस्माभिरेव पाल्यस्य प्रथस्तत्वात् प्रियस्य नः ।
अस्मद्दृष्टे पुराणस्य पश्याचारस्य विप्लवम् ॥ ३८ ॥

जनक दशरथ-विश्वामित्राः । अनार्य्ये निर्मर्य्यादे !

(53) जगत्सनातनगुरौ वसिष्ठेऽपि निरङ्कुशः ।
व्यालद्विप इवास्माभिरतिक्रम्यैव दृश्यसे ॥ ३९ ॥

मे शासिता उपदेष्टा । कथं क्षत्रियाः सर्वक्षत्रियान्तकस्य मम विनयं दमनं कुर्युः । वसिष्ठमित्रविषये एष सम्बन्धः यत् स जरायां वार्धक्ये विषये मान्यः । किन्तु स स्पर्द्धायां मत्तः नाधिकः तपसा च न मम समः समानः । ज्ञानेन च अन्यः विशिष्टोऽस्ति न मत्तुल्यज्ञानीत्यर्थः ।

(52) भृगुप्रसवात् भृगुनन्दनात् । प्रथस्तत्वात् जगत्त्वात् नः अस्माकं प्रियस्य पुराणस्य आचारस्य विप्लवं संक्षोभम् अस्मद्दृष्टे पश्य ।

(53) जगतः सनातने पुराणे गुरौ वसिष्ठेऽपि । अङ्कुशा प्रथमदृष्टत्वात् (१. ८. टीका) । निरङ्कुशः निर्बन्धनः परवशमीति भावः । गजपक्षे अङ्कुशावमानी व्यालद्वीपः दुष्टगज इव अतिक्रम्य अस्माभिः दृश्यसे विनीयसे ।

Digitized by Google

जाम। (54) एवमवधूतोऽस्मि।

अन्तर्धैर्यभरेण हृदयवचनात् संपीड्य पिण्डीकृतो
दुष्कर्मास्त्रितशल्यवत् परिदहन् मन्युश्चिरं यः स्थितः।
स्फूर्जत्येव स एष सम्प्रति मम न्यक्कारभिन्नस्थितेः
कल्पापायमरुत्प्रकीर्णपयसः सिन्धोरिवौर्वानलः॥ ४०॥

दिष्ट्या। (55) निकारं प्राप्तोऽयं ज्वलति परशुर्मन्युरिव मे
पृथिव्यां राजानो दशरथबले सन्त्युपहिताः।
पुनर्हीविंग्रोऽपि प्रकुपितकृतान्तोत्सवकर-
श्चिरात् चक्षुस्यासु प्रलय इव घोरः परिभवः॥४१॥

अयि। कष्टं, भोः कष्टम्!—

---

(54) अवधूतः अवज्ञातः। हृदयवचनात् ऋचिकादिवाक्यात् अन्तर्धैर्यभरेण आभ्यन्तरिकस्थैर्यातिशयात् यः मन्युः क्रोधः संपीड्य पिण्डीकृतः निरुद्धप्रसरः सङ्कीभूतः दुष्कर्मास्त्रितशल्यवत् दुष्टवर्मस्थकीलक इव परिदहन् दाहं जनयन् स्थितः। कल्पापायमरत्कीर्णपयसः प्रलयकालीनवायुक्षोभितजलस्य सिन्धोः समुद्रस्य और्वानलः वाडवाग्निः इव च न्यक्कारेण तिरस्कारेण भिन्ना स्थितिः मर्यादा यस्य तस्यावमाननासंरब्धस्य मे मम एष क्रोधः स्फूर्जति ज्वलति एव।

(55) मन्युरिव ममायं निकारम् अवमाननां प्राप्तः परशुः ज्वलति। पृथिव्यां राजानः दशरथबले उपहिताः सन्ति। पुनः चिरात् दीर्घकालानन्तरं चक्षुस्यासु चक्षुर्विषयजातेः प्रकुपितस्य क्रुद्धस्य अन्तकस्य यमस्य उत्सवकरः हर्षवर्द्धनः प्रलयः क्षत्रमिति भावः।

Digitized by Google

(56) कामं हि नः खजन एष, तथापि दर्पाद्
घोरं व्यवस्यति कथं नु भवेदवध्यः ।
संदूषितेन च मया मुहुरीक्षितस्ये-
दृत्तस्य भार्गवशिशोर्दुरितं हि तत् स्यात् ॥ ४२ ॥

विश्वा। (57) अब्रह्मवर्चसमिवाभ्यवयस्सामर्थ्यमरे जामदग्न्य मन्यसे ?
ब्रह्मवर्चसमाजमाक्षिपसि यद्वत्से च घोराशय-
स्तेनातिक्रमणेन दुःखयसि नः, पाल्योऽसि सम्बन्धतः ।
अन्तस्त्वां प्रति कोपनस्य तरलः शापोदकं दक्षिणः
प्राक्संस्कारवशेन चापमितरः पाणिर्ममान्विष्यति ॥ ४३ ॥

जाम। ननु भोः कौशिक !

---

(56) एष भार्गवः कामं हि न खजनः स्वनाभिः । भृगुवशिष्ठयोर्ब्रह्मक्षत्रत्वात् । तथाऽपि दर्पात् घोरं व्यवस्यति कर्त्तुमिच्छति । कथं नु अवध्यो भवेत् । मया यदि क्रुद्धचक्षुरसक्रदक्षिपात्यते तदस्य दुरितं पापं स्यात् तदैष कलुषितो भवेदिति भावः ।

(57) अरे जामदग्न्य अब्रह्मणि जले ब्रह्मबलराहित्यमिव यस्त्वयक्षत्रभावं मन्यसे । यत् ब्रह्मणां ब्राह्मणानां जातीनां क्षत्रियाणां समाजं वर्गम् आक्षिपसि अपवदसि वत्से रामे च घोराशयः पापाभिलाषी तद्वधेच्छुरिति भावः । तेन अतिक्रमणेन मर्यादालङ्घनेन नः अस्मान् दुःखयसि । सम्बन्धतः बन्धुत्वात् पाल्योऽसि । अन्तर् अभ्यन्तरे त्वां प्रति कोपनस्य कोपयुक्तस्य मम तरलः चञ्चलः दक्षिणः पाणिः शापोदकं प्राक्संस्कारवशेन पूर्वजातिशिक्षया (५८, टीका,) इतरः वामः पाणिः चापम् अन्विष्यति अङ्गीकर्तुमिच्छति ।

Digitized by Google

(58) त्वं ब्रह्मवर्चसधरो यदि वर्त्तमानो
यद्वा स्वजातिसमयेन धनुर्द्धरः स्याः ।
उग्रेण भोस्तव तपस्तपसा दहामि
पक्षान्तरे तु सदृशं परशुः करोतु ॥ ४४ ॥

नेपथ्ये । (59) अयमहं कौशिकान्तेवासी रामः प्रणम्य विज्ञापयामि ।

पौलस्त्यविजयोद्दामकार्त्तवीर्य्यार्जुनद्विषम् ।
जेतारं कार्त्तिकेयस्य विजयेय नमोऽस्तु वः ॥ ४५ ॥

दश । प्राप्तो रामभद्रः । कथं नु नामैतत् ?

---

(58) यदि त्वं ब्रह्मवर्चसधरः ब्रह्मबलयुक्तः वर्त्तमानः उपस्थितः । यद्वा स्वजातेः क्षत्रियस्य समयेन नियमानुसारेण धनुर्द्धरः स्याः । विश्वामित्रः किल क्षत्रिय आसीत् । तपोबलेन ब्रह्मर्षित्वं लेभे इति रामायणे पठ्यते । १.६७.अ० । भोः उग्रेण प्रचण्डेन तपसा तव तपः दहामि । पक्षान्तरे धनुर्द्धरत्वे मम परशुः सदृशं समुचितं करोतु ।

(59) कौशिकस्य कुशिकनन्दनस्य विश्वामित्रस्य अन्तेवासी शिष्यः । पौलस्त्यस्य रावणस्य विजयेन उद्दामस्य त्यक्तमर्यादस्य कार्तवीर्यार्जुनस्य द्विषं शत्रुं कार्तिकेयस्य कुमारस्य जेतारं विजयेय अहमिति शेषः । आशंसायां लिङ् । विजयेयमिति पाठस्तु भ्रान्तः, विपूर्वकजेरात्मनेपदत्वात् । वः युष्मभ्यः नमः अस्तु ।

Digitized by Google

जन । हन्त ! (60) प्रशस्तमभ्यनुजानीत, विजयतां राम-भद्रः ।

अयं विनेता दृप्तानामेष वीरो जगत्पतिः ।
वयं वसिष्ठधौरेयाः सर्वे प्रतिभुवोऽत्र वः ॥ ४६ ॥

दश । (61) नन्वद्यैव प्रथितयशसामूढरक्षाव्रतानां
याज्यानां नो गुणवति गृहे रामभद्रस्य जातः ।
ज्ञानज्योतिःपरिगतभवद्भूतभव्याः प्रभावं
यद् ब्रह्माणः क्रमपि शिशवोऽप्यत्र संवेदयन्ते ॥ ४७ ॥

जाम । (62) एहि मन्ये, राजपुत्र ! जामदग्न्यं विजेष्यसे । वञ्चितम् । नहि विजेष्यसे ! दुर्दमो हि रेणुकानन्दनस्त्वदन्तकः । तथाहि सम्प्रति—

---

(60) प्रशस्तं श्लाघ्यम् अभ्यनुजानीत स्वीकुरुत यूयमिति शेषः । अयं रामः दृप्तानां विजेता शासिता । वसिष्ठधौरेयाः वसिष्ठप्रमुखाः । प्रतिभुवः जामिनः ।

(61) ननु नूनम् अद्यैव प्रागल्पदिवसात् प्रथितयशसां पुण्यश्लोकानाम् अदरक्षाव्रतानां श्रुतप्रजापालनव्रतानां याज्यानां नः अस्माकं गुणवति गृहे रामभद्रस्य जातः । यत् ज्ञानज्योतिषा परिगतानि ज्ञातानि भवद्-भूतभव्यानि वर्तमानातीतभविष्यन्ति येषां ते ब्रह्माणः द्विजाः अत्र शिशवो बालकोऽपि रामे क्रमपि अनिर्वचनीयं प्रभावं संवेदयन्ते अनुभवन्ति ।

(62) अहं मन्ये त्वां मां निजेष्यसे । काकुभाषितमेतत् । तदन्तकः तव विनाशकः ।

Digitized by Google

(63) *क्षत्तक्षत्रियकण्ठकन्दरसरत्कीलालनिर्वापित-
प्रत्युद्भूतशिखाकरालहुतभुग्भ्राङ्कारिभिर्मार्गणैः ।
एतद्ब्रह्मरकालरुद्रकवलव्यापारमभ्यस्यतु
ब्रह्मास्तम्बनिकुञ्जपुञ्जितघनज्याघोषघोरं धनुः ॥ ४८ ॥

[इति निष्क्रान्ताः सर्वे ।

इति संसृष्टो नाम तृतीयोऽङ्कः ।

---

*लूनचक्षियकण्ठमण्डलगलत्कीलाल..... । वा० रा० ४. ५७. ।

---

६२ क्षत्तात् क्षिप्तात् क्षत्रियकण्ठात् एव कन्दरात् विवरात् सरता निर्गच्छता कीलालेन रक्तेन प्रथमं निर्वापिताभिः किञ्चित्शमिताभिः पुनः प्रत्युद्भूताभिः उत्थिताभिः ज्वालाभिः करालं घोरं हुतभुजं वह्निं भ्राङ्कारिभिः भ्रनभ्रनयन्द्रेन निक्षिपद्भिः मार्गणैः शरैः एतत् ब्रह्मास्तम्ब-निकुञ्जे निकुञ्जरूपे ब्रह्मास्त्रे पुञ्जितेन पिण्डीभूतेन घनेन गम्भीरेण ज्याघोषेण घोरं धनुः धनुरस्य भञ्जनशीलस्य कालरुद्रस्य कवलव्यापारं ग्रासविधिम् अभ्यस्यतु कालरुद्रवत् सर्वान् ग्रासयत्विति भावः । प्रचण्डा-नामग्निज्वालानामुज्जृम्भणेन हिंसोचितजनेनोत्थानं सर्वजनप्रसिद्धम् ।

संसृष्टोऽयं तृतीयोऽङ्कः संसृष्टो विषमैः पदैः ।
जानक्या विप्रयुक्तेन भाव्येन विषदीकृतः ॥

Digitized by Google

अथ चतुर्थोऽङ्कः ।

नेपथ्ये । (1) *भो भो वैमानिकाः ! प्रवर्त्यन्तां प्रवर्त्यन्तां मङ्गलानि ।

(2) जयाशस्यान्तेवासी जयति भगवान् कौशिकमुनिः
सहस्रांशोर्वंशे जगति जयति क्षत्रमधुना ।
विनेता क्षत्रारेर्जगदभयदानव्रतधरः
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते ॥ १ ॥

ततः प्रविशतः संभ्रान्तौ विमानेन सूर्यवत्सामाल्यवन्तौ ।

---

* भो भोः पौरजनाः ! प्रवर्त्यतां माङ्गलिकं.....जामदग्न्यविजयमहोत्सवेन । म०. रा०. ५. ।

---

(1) विमानं द्योमयानम् एषां सन्तीति वैमानिकाः देवाः ।

(2) अन्ते समीपे वसतीति अन्तेवासी शिष्यः । जयाश्वस्य अन्तेवासी (१. ८६. टीका) भगवान् कौशिकमुनिः जयति रामविजयेनेति भावः । सहस्रांशवः किरणाः यस्य तस्य सूर्यस्य वंशे अधुना क्षत्रं क्षत्रियाः जगति जयति । "क्षान्तः" इति (लि०. २. ३७.) सूत्रेण क्षत्रस्य नपुंसकत्वम् । क्षत्रारेः क्षत्रियशत्रोः जामदग्न्यस्य विनेता शासकः जगताम् अभयस्य दानमेव व्रतं धरतीति अभयदानव्रतधरः लोकानां शरण्यः शरणार्हः दिनकरकुलस्य सूर्यवंशस्य इन्दुः चन्द्रः रामभद्रः विजयते ।

Digitized by Google

माल्य। (3) वत्से! दृष्टस्त्वया दिवौकसामेकायनीभावः। यदिन्द्रादयः स्वतो वन्दित्वमुपगताः।

सूर्प। (4) णहि तुम्हेहिं विरूविदं विसंवदइ। संपदंच उक्कम्मिदम्हि। ता किं एत्थ करणिज्जं।

माल्य। (5) यासौ राज्ञा दशरथेन प्राक्प्रतिश्रुतवरद्वया राज्ञी भरतमाता कैकेयी। तस्यां *मन्थरा नाम परिचारिका दशरथस्य वार्ताहारिणी मिथिलामयोध्यायाः संप्रेषिता। मिथिलोपकण्ठे वर्त्तत इति संप्रत्येव मे निवेदितं चारकैः। तस्यास्त्वया शरीरमाविश्य एवमेवं च कर्त्तव्यम्।

[इति कर्णे कथयति।

---

*अयोध्यातः कैकेय्या भरतवार्ताहरणाय प्रेषिता-मन्थरा नाम स्थविरदासी..... मिथिलाप्रान्तरे तिष्ठतीति.....सम्प्रत्येव..... कथयति। अतस्त्वं.....मन्थरा-शरीरमधितिष्ठन्ती.....। आ०. रा०. ४.।

---

(3) दिवौकसां देवानाम् एकायनीभावः संहतिः। स्वतः वन्दित्वं उपगताः रामस्य इति शेषः। अनो हि बलात्कारेण वन्दीभवति। इन्द्रादयस्तु भक्त्यानुरागैः स्वयमेव रामस्य दासं स्वीचक्रुरिति भावः।

(4) णहि युष्माभिः निरूपितं विसंवदति। सम्मतस्य उत्कम्पिताऽस्मि ततः किमत्र करणीयम्। विसंवदति अन्यथा भवति। उत्कम्पिता भीषिता रामजयदर्शनादिति भावः।

(5) प्राक् पूर्वं प्रतिश्रुतं प्रतिज्ञातं वरद्वयं यस्यै सा प्राक्प्रतिश्रुत-वरद्वया। यथोक्तं रामायणे "तस्मिन् भरति संग्रामे राजा शत्रु-परिक्षतः। विजित्याभ्यागतो देवि त्वयोपचरितः स्वयम्॥ अयं-

Digitized by Google

भूर्पं । (6) *किमधन्नो करिस्सदि एव्वं णामेत्ति ?

भाल्य । (7) भिद्येत नो सद्वृत्तमिक्ष्वाकुगृहेषु विशेषतस्तादृशस्य विजिगीषोः ।

भूर्पं । (8) तदो किं ?

भाल्य । (9) ततोऽनेन योगाचारन्यायेन सुदूरमाकृष्य रक्षसामन्तिकमुपनीतस्य विन्ध्यकान्तारेष्वदृश्यस्य विचरतः † सुकराण्यवस्कन्दनानि स्युः । विराधदनुकबन्धप्रभृतयो हि

---

* अवि एव्वं करिस्सदि रामभद्दो । अ०. रा०. ४ ।

†विराधप्रभृतिभिरधिष्ठितेषु विहरतः सुकरं कलत्रापहरणम् । अ०. रा०. ४ ।

रोहणं चास्य तत्र देवि त्वया ज्ञातम् । परितुष्टेन ते दत्तौ द्वौ वरौ तत्र भाविनि ॥" इति २. ८. १४–१५. । दशरथस्य दशरथाय वार्त्तां सन्देशं हरतीति वार्त्ताहारिणी । अयोध्यायाः अयोध्यानगरात् मिथिलां प्रेषिता । मिथिलोपकण्ठे मिथिलासमीपे । चारकैः चरैः मे मह्यं निवेदितम् । आविश्य प्रविश्य । किं कर्त्तव्यम् इति कर्णे कथितम् । उपरिष्टात् प्रकाशितमेतत् ।

(6) किमधन्यो करिष्यत्येवं नामेति ? अधन्यः दुर्भाग्यः राम इति शेषः ।

(7) इक्ष्वाकुगृहेषु राघवेषु विशेषतः विशेषेण तादृशस्य विजिगीषोः विजयेच्छोः रामस्य सद्वृत्तं नो न भिद्येत भज्येत । सर्वथा पिङ्गवचनं पालयिष्यतीति भावः ।

(8) ततः किं भविष्यतीति शेषः ।

(9) योगाचारन्यायेन योगसेवयेव । यथोक्तं माधवेन "योगाङ्गानुष्ठानेनादरनैरन्तर्यदीर्घकालसेवितेन ..... मधुमत्यादिसमाधिलाभो

Digitized by Google

दण्डकारण्यसन्निधिं तीक्ष्णाश्चरिष्यन्ति। शक्या हि लुप्तप्रभुशक्तेरल्पाहमयन्निरुद्यमनाभिसन्धातुम्। अनिवर्त्तनीयश्च रावणस्य सीतास्वीकारग्रहः। स चैवमीषत्करः सप्रयोजनसेति।

पूर्व। (10) अह लक्खणसहायत्तणे किंवि पओअणं?

नाट्य। वीरोऽल्पपरिवारश्चित्यो यथा रामस्तथैव सः।

(11) छद्मदण्डप्रयोगस्तु यद्येकस्मिंस्तथा द्वयोः॥ २॥

पूर्व। (12) मम दुदअं एव्व एदं अ जुत्तं पडिभादि। जं च दुरट्ठिदस्स दासरहिणो सन्निधाणकरणं जं च अणावड्ढवेरस्स अप्पडिसमाधेअं इत्थिआ वेरं ति।

भवति।" रक्षसां राक्षसानाम् कलिकं सभीपम् आनीतस्य अदेशस्थस्य प्रदेशानभिज्ञस्य विन्ध्यपर्वतस्य कान्तारेषु दुर्गजवर्त्मसु विचरतः परिभ्रमतः रामस्य उपरि अवस्कन्दनानि आक्रमणानि सुकराणि अयत्नसाध्यानि स्युः। विराधः (५. १२. टीका) दनोः कबन्धः (५. ५७. टीका) प्रभृतिः येषां ते राक्षसाः। दण्डकारण्यसन्निधिं दण्डकारण्यवार्त्तिषु स्थानेषु। तीक्ष्णाः प्रचण्डम्। लुप्ता प्रभोः राज्ञः शक्तिः यस्य तस्य विरचितसचिवसम्पदो रामस्य अल्पाहमयन्निः छद्मना कपटेन अभिसन्धातुं छलयितुं शक्या। सीतायाः स्वीकारस्य परिग्रहस्य ग्रहः निर्बन्धः निवर्त्तयितुमशक्यः। ईषत्करः अयत्नसाध्यः।

(10) अथ लक्ष्मणसहायत्वे किमपि प्रयोजनम्?

(11) लक्ष्मणसहायत्वेऽपि कपटप्रयोगो न विफलो भवतीति भावः।

12) मम हितमेव न युक्तं प्रतिभाति—यच्च दूरस्थितस्य दाशरथेः

Digitized by Google

भाष्य । (13) तावत् भूम्यानन्तर्यतः प्रत्यासन्न एव सानु-
चरसुन्दोपसुन्दपुत्रोपमर्दैकस्फाटकारिः कथमनाबद्धवैरः ।
अप्रतिविधेयश्च रामरावणयोरितरथापि वैरम् । पश्य ।
(14) पाल्यं तस्य जगद्वयं तु जगतो नित्यं हठादेशिनः
सामेवं सति कीदृगप्रियकृता शश्वद्विरुद्धात्मना ।
कानर्थान् रघुनन्दनो मृगयते देवैः पतिर्यो हृत-
स्तस्माद्दानमपीह नास्ति न भिदा तस्येषवः साधनम् ॥ २ ॥

सन्निधानकरत्वं, यज्ञानाबद्धवैरस्याप्रतिसमाधेयं स्त्रिया वैरम् । द्वितयं ह्यं सन्निधानकरत्वं रामस्य रावणान्तिकमानयनं स्त्रियः सीताहरणमूलं वैरं शत्रुता च । इदानीं रामो दूरे वर्त्तते रावणेन च न बद्धवैरः । अतस्तस्य दण्डकारण्यादौ खड्गासन्निहितभूमौ छलेनोपनयनं सीताहरणेन च वैरोत्तेजनं प्रायेणानिष्टकरमिति भावः ।

(13) पृथिव्याः आनन्तर्यतः सन्निकर्षात् प्रत्यासन्नः सन्निहित एव रामः । अयोध्यापि न दूरमिति भावः । ताडकादिवधेन चाबद्धवैरः (१. १२४, २, २. टीके) । इतरथा अन्यथा अपि सीताहरणादन्यतोऽपि रामरावणयोः वैरम् अप्रतिविधेयम् अप्रतिकार्यम् अनिवार्यमिति भावः ।

(14) तस्य रामस्य जगत् पृथिवी पाल्यम् । किन्तु वयं नित्यं सततं ब्राह्मणादिवधेन जगतः हठेन बलेन आदेशिनः आज्ञापकाः निर्मीढ्का इति भावः । एवं सति शश्वत् सदा विरुद्धात्मना विरुद्धस्वभावेन अप्रियकृता बन्धुघातिना रामेण कीदृक् काम सम्भवतीति शेषः । यो देवैः पतिः अधिपतिः हृतः परिस्वीकृतः । यथोक्तमङ्गसुखे "इन्द्रादयः स्वतो वन्दित्वमुपगताः" इति । स रघुनन्दनः कान् अर्थान् मृगयते अन्विष्यति ? तस्मात् हेतोः इह दानमपि नास्ति ।

Digitized by Google

(15) न दण्डोऽप्यधिके शत्रौ स प्रकाशः प्रकाशते ।
तूष्णीं दण्डस्तु कर्त्तव्यस्तस्य चायमुपक्रमः ॥ ४ ॥

तथा सति सीतापहारतः किमपरं कुर्य्यात् ? किं च

(16) हृतजानिररातिभिः सलज्जो
यदि मृत्योः शरणं गतोऽन्यथापि ।
मृदितो मृत एव निष्प्रतापः
परितप्याप्यथवा घटेत सन्धौ ॥ ५ ॥

(17) उत्तिष्ठेत वधाय नः परिभवप्रौढ़ेन चेन्मन्युना
नेष्टे तत्प्रसरं निरोद्धुमुदधिस्तिग्मांशुवीर्य्यो हि सः ।
किन्तु प्राक्प्रतिपन्नरावणसुहृद्भावेन भीमौजसा

भिदा भेदः न क्षमनीति शेषः । तस्य साधनं दूषवः वाक्याः । साम-दानदण्डभेदाः राज्ञां साधनानीति नीतिविद्भिरुक्तम् । तेषां प्रयोगाः कामन्दकीये नीतिसारे सप्तदशसर्गे द्रष्टव्याः ।

(15) अधिके प्रबलतरे शत्रौ रामे स दण्डोऽपि प्रकाशः न प्रकाशते न फलं दास्यति । प्रकाशं स न दण्डयः । तूष्णीं गूढम् । तस्योपांशु-दण्डस्य अयं सीताहरणरूपः उपक्रमः आरम्भः ।

(16) अरातिभिः शत्रुभिः हृता अपहृता जाया भार्या यस्य स हृतजानिः । जायाया निङ्, पा०. ५. ४. १३४ । रामः सलज्जः यदि मृत्योः शरणं गतः आत्महत्यां करोति । अन्यथाऽपि मृदितः व्यक्-लतः निष्प्रतापः लुप्तानुभावः मृत एव मृतकल्प इति भावः । अथवा परितप्य विषद्य अपि सन्धौ घटेत सन्धिं कुर्वीत ।

(17) (18) परिभवात् न्यक्कारेण प्रौढेन प्रवृद्धेन मन्युना क्रोधेन

Digitized by Google

शचुर्वैश्रवणाग्रजेन हरिणा घोरेण घानिष्यते ॥ ६ ॥

अनेन च प्रसङ्गेन बहुनुसन्धातव्यम् ।

शूर्प । (18) किं विभ्र ?

माल्य । (19) रावणप्रियासि वत्से ! कार्य्यज्ञा च यतो निःशङ्कमावेद्यते हृदयखेदः ।

(20) क्षितेरानन्त्यार्दपक्षदपक्षत्यस्य सततं

द्विधा रामः शत्रुः प्रकृतिनियतः क्षत्रिय इति ।

तृतीयो मे नप्ता रजनिचरनाथस्य सहजो

रिपुप्रत्यासत्तेरहिरिव भयं नो जनयति ॥ ७ ॥

चेत् यदि नः अस्माकं वधाय उत्तिष्ठेत उद्यच्छेत् । 'उदोऽनूर्ध्वकर्मणि' पा०. १. ३. १४. । इत्यात्मनेपदम् । तस्य रामस्य प्रसरम् अभ्यागमनं निरोद्धुं नियन्त्रितुम् उदधिः समुद्रः न ईष्टे न प्रभवति । हि यतः स रामः तिग्मांशुवीर्यः सूर्यप्रभावः । किन्तु प्राक् पूर्वं प्रतिपन्नः घटितः रावणेन सुहृद्भावः मैत्री यस्य तेन भीमौजसा प्रचण्डविक्रमेण घोरेण वज्रधरस्य इन्द्रस्य आत्मजेन तनयेन हरिणा कपिना वाहिना शत्रुः रामः घानिष्यते मारिष्यते । घानिष्यत इति हन्तेः कर्मणि लृङि रूपम् । पञ्चमाङ्के वर्णितमेतत् । अनुसन्धातव्यं चिन्तितव्यम् । किमिव ?

(19) मया निःशङ्कं निरुद्वेगेन हृदयस्य खेदः शोकः आवेद्यते, यतस्त्वं रावणस्य प्रिया राजकार्याणाम् अभिज्ञा चाऽसि । अतो मन्त्रभेदो न शक्यः ।

(20) यः अपकरोति यश्चापक्रियते तौ सन्निहितौ सततं रिपू ।

Digitized by Google

(21) कुम्भकर्णस्तु सत्त्वप्यसत्समः स्वापव्यसनाद्विनयाच्च । विभीषणस्त्वागामिकालगुणसम्पन्न इत्यनुरक्ताः प्रकृतयः । खर-दूषण-त्रिशिरसस्तु कुलसदृशवृत्तयो राजानमुपतिष्ठन्ते । यतस्ते वत्सेनेव धेनुं राजानमर्थान् दुहन्ति । उपजापिताश्च प्रतिजपन्ति प्रकृतयः । तद्दिदमन्तर्भेदजर्जरं राजकुलमभियुक्तमात्रं रामेण भिद्यते । यथोक्तं लघुपि व्यसनपदमभियुक्तस्य कृच्छ्रसाध्यं भवतीति । तत्र च विभीषणावग्रहतः प्रतिविधानम् । स तु प्रकाशदण्डस्तूष्णीं दण्डः सरोधनमपसारणं वा स्यात् । तत्र प्रकाशदण्डमभिप्रसज्यमानाः कथं राक्षसास्तिष्ठेरन् । तूष्णीं दण्डोऽपि प्राज्ञैरनुमीयमानः प्रकृतिकोपकः रामेऽभियोक्तरि दुरन्तः स्यात् !

प्रकृतिषु प्रजासु नियतः रतः अस्मिन् इति रामः द्विधा अस्माकं यत्नः, यतो जगत्पीडका वर्तमिति भावः । मम तृतीयो भ्राता मम भ्रातुष्कन्यायाः तृतीयः पुत्रः रजन्यां रात्रौ चरन्तीति रजनिचराः राक्षसाः तेषां नाथस्य अधिपस्य रावणस्य सहजः सहोदरः विभीषणः रिपोः रामस्य प्रत्यासत्तेः नैकट्यात् अहिः सर्प इव नो भयं जनयति । धर्मानुरक्तत्वाच्चोऽपि रामं भजिष्यत इत्यायङ्कां कुर्म इति भावः । मालिसुमालिमाल्यवन्तः सुकेशतनयाः, रा०. ७. ५. ६. । सुमालिसुतायाः कैकेस्याः रावणकुम्भकर्णविभीषणाः पुत्राः, रा०. ७. ६. १–३५. ।

(21) स्वापव्यसनात् निद्रानुरागात् अविनयात् व्यभिचारात् कुम्भकर्णः सत्त्वं अपि असत्समः जीवन्मृतः । कुम्भकर्णस्य निद्राप्रियता प्रसिद्धा । यदुक्तं तेन वरदानायागताय ब्रह्मणे "स्वप्नं वर्षायुतान्

संरोधने त्वभिभवाद्विहिते तदैक-
मैत्र्या खरप्रभृतयश्च तदा विकुर्युः।
निर्वास्यमानमपि तं परिवारयेयु-
स्तस्मात् खरप्रभृतयः पुरतो विचिन्त्याः ॥ ८ ॥

तत्र रामस्योपयोग इति।

कानि देवदेव मयेषदुचितम्" इति रा०. ७. १०. ४५. । तस्याविनयश्च तत्रैवोक्तः। यथा "कुम्भकर्णः प्रमत्तस्तु मदमोहसमन्वितान्। ...भक्षयन् विचचार ह" ७. ६. २८. । आगामिकैः आयतेरुपकारकैः आत्मगुणैः सम्पन्नः युक्त इति प्रकृतयः प्रजाः अनुरक्ताः तस्मिन्विभीषण इति शेषः। कुलसदसद्वृत्तयः राक्षसाचाराः। राजानं रावणम् उपतिष्ठन्ते सेवन्ते। राजानं अर्थान् दुहन्ति राज्ञः धनानि निष्कर्षन्ति। न त्वनुरक्ता इति भावः। दुहादयो द्विकर्मकाः। उपजापिताः विरक्तिताः प्रकृतयः प्रजाः प्रतिजपन्ति कुमन्त्रणां कुर्वन्ति। अन्तर्भेदेन आभ्यन्तरिकभेदेन प्रजानां विरागेणेति भावः। जर्जरं विशीर्णं राजकुलं राजवंशः अभियुक्तमालम् आक्रमणानन्तरमेव भिद्यते। यथोक्तं भारविणा "अपरानसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः। सुकरः ..... रिपुरुन्मीलयितुं महानपि ॥" २. ५०. । अभियुक्तस्य यत्नाभिक्रान्तस्य लघु स्वल्पम् अपि व्यसनपदं लक्ष्यसाध्यं दुःसाध्यं भवति। यथोक्तं भारविणा "व्यसुरप्युपकृन्ति विपक्षः प्रभुरन्तःप्रकृतिप्रकोपजः" २. ५१. । विभीषणस्य अवमर्दकृतः दण्डेन प्रतिविधानं प्रतिक्रिया। दण्डः वधः। यदुक्तं का.० नी.० "प्रकाशश्चाप्रकाशश्च पूर्वो [वधो] द्विविध उच्यते। प्रकाशदण्डान् कुर्वीत लोकद्विष्टानथा रिपून् ॥ यैरुद्विजते लोको ये चैव स्वपक्षभाः। बाधन्ते व्यधिकं ये च तेषूपांशु प्रवर्तते ॥ विषेणोपनिषद्योगैः यस्मै वोद्वर्तनेन वा। तथोपांशु नयेद्दण्डं यथान्यो

Digitized by Google

भूर्ष। (22) अहो अणुजीवित्तणस्स अगउअदा। जं रावणस्स खरप्पमुहाणं च तुल्ले वि कुलसम्बन्धे एवं मादामहो चिन्तेदि।

माल्य। ईदृश्यः कुलपुत्रकाचारः।

भूर्ष। (23) विणा खरप्पमुहेहिं विभीसणस्स का पडिवत्ती?

माल्य। (24) प्राप्तः खल्वसावुत्प्रेक्षितविकारः स्वयमेवापसर्पेत! उपेक्षणीयस्यास्माभिः। न चैतन्मन्तव्यमौरसं भयमिति। यतः

न विभावयेत्॥" इति १७. १०-११-१२.। संरोधनं कारागारे बन्धनम्। अपसारणं निर्वासनम्। अभिन्नसम्बन्धाः सनाभयो राक्षसाः कथं तितिक्षेरन् मर्षेयुः। प्रकृतिकोपकः प्रजोत्तेजकः। प्राप्ता उपायमुदण्डमपि तर्केयुः रामपक्षस्थान्नवेयुरिति भावः। 'प्रकृतिकोपके' इति पाठे रामेष्वास्थयः। संरोधने विच्छिते क्षते तदा खरप्रभृतयः विभीषणसौहार्दात् विद्रुयुः विरुद्धं कुर्युः। निर्वास्यमानमपि विभीषणं परिवारयेयुः तदनुचरा भवेयुः। तस्मात् पुरतः प्रथमं खरादयो विचिन्त्याः। तत्र खरादीनां निधने रामस्य उपयोगः प्रयोजनम्।

(22) अहो अनुजीवित्वस्याद्भुतता। यद्रावणस्य खरप्रभृतिभ्यश्च तुल्येऽपि कुलसम्बन्धे एवं मातामहश्चिन्तयति। अनुजीविनः सेवकस्य भावः अनुजीवित्वम्। अद्भुतता लाघवम्। यद्भवतो रावणपक्षपातित्वं सनाभीनाञ्च खरादीनां वधेच्छा।

(23) विना खरप्रभृतिभिर्विभीषणस्य का प्रतिपत्तिः? स किं करिष्यति?

(24) उत्प्रेक्षितः अनुमितः विकारः अपक्रिया येन सः। उपेक्षया लोका निष्कारणं भयमिति मन्यन्ते।

Digitized by Google

(25) बाल्यात् प्रभृत्येव विरूढसख्यः
सुग्रीवमेष ध्रुवमाश्रयेत ।
बालिप्रसादीकृतभूमिभागे
कुमारभुक्तौ स्थितमृष्यमूके ॥ ९ ॥

(26) ततश्च बालिना यतिष्यते, न रामोपश्रयेण। रामोपश्लेषेण वा नापेक्षेत बाली ।

भूर्ष । (27) अध रामो परसुरामविजइ जणिदविरोधं वालिनं वावादेदि तदो विभीसणरामसंजोओ अणत्थो त्ति संभावेमि !

भाव्य । मनु वत्से !

---

(25) एष विभीषणो बाल्यात् प्रभृत्येव विरूढसख्यः जातसौहार्दः ध्रुवं नियतं बालिना प्रसादीकृते अनुगृहीते भूमिभागे प्रदेशे कुमारस्य भुक्तौ भोगे ऋष्यमूके स्थितं सुग्रीवम् आश्रयेत । रामायणे तु "धर्मात्मा सुग्रीवो नाम वानरः । भ्राता निरस्तः क्रुद्धेन बालिना मम दुर्मतिना ॥ ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते । स वसत्यात्मवान् शूरः चतुर्भिः सह वानरैः ॥" इत्युक्तम् । २. ७५. ६२-६४. । "वक्तव्यानुचितं किञ्चिच्छायकस्य रसस्य वा । विरुद्धं तत् परित्यज्य अन्यथा वा प्रकल्पयेत् ॥" इत्याद्यालङ्कारिकवचनस्मरणेन बालेरविनयोऽत्रान्यथा दर्शितः ।

(26) रामं नाश्रयेत । अन्यथा बाली न उपेक्षेत अनेनेति भावः ।

(27) अथ रामः परशुरामविजयी जनितविरोधं बालिनं व्यापादयति, ततो विभीषणरामसंयोगोऽनर्थ इति सम्भावयामि ।

Digitized by Google

(28) यो बालिनं हन्ति, हता वयं स-
स्तेन ध्रुवं, तत्र तु सर्वनाशे।
एकः स जीव्यात् कुलतन्तुरस्मै
रामः श्रियं धर्ममयो ददातु ॥ १० ॥

सूर्पः। साक्षम्। (29) एव्वं वि दाव होदु।

माल्य। गम्यतामिदानीं वत्से! यत्र प्रेषितासि। सुकरं चैतत् प्रयोजनं यदा जनकदशरथान्तिके वसिष्ठ-विश्वामित्रौ न स्याताम्। अहमपि लङ्कामेव गच्छामि।

सूर्पः। (30) हा अम्ब! तुएवि दुक्खं पेक्खिदव्वं।

माल्य।—

(31) हा वत्साः! खरदूषणभृतयो वध्याः स्थ पापस्य मे
हा हा वत्स विभीषण! त्वमपि मे कार्य्येण हेयः स्थितः।
हा महत्तल वत्स रावण! महत् पश्यामि ते सङ्कटं
वत्से कैकसि हा हतासि न चिरात्त्रीन्पुत्रकान्द्रक्ष्यसि ॥ ११ ॥

[इति निष्क्रान्तौ।

[इति विष्कम्भकः।

---

(28) ध्रुवम् असंशयं वयं तेन हताः स्मः। तत्र सर्वेषां राक्षसानां नाशे कुलस्य वंशस्य तन्तुः सन्ततिः एकः स विभीषणः जीव्यात्। अस्मै विभीषणाय धर्ममयो रामः श्रियं ददातु।

(29) साक्षम् अश्रूणि विसृज्य। एवमपि तावद्भवतु।

(30) त्वयाऽपि दुःखं प्रेक्षितव्यम्।

(31) कार्य्येण कार्यवशात् हेयः परित्याज्यः। सङ्कटं विपदम्।

Digitized by Google

ततः प्रविशतो वसिष्ठविश्वामित्राभ्यां सह जनकदशरथौ ।
राजानावन्योन्यं परिष्वज्य ।

जन । राजन् ! दिष्ट्या वर्द्धसे यदीदृशस्ते वत्सो रामभद्रः ।

(32) अप्राकृतानि च, गुणैश्च निरन्तराणि,
लोकोत्तराणि च, फलैश्च महोदयानि ।
वीरस्य यस्य महतश्चरिताद्भुतानि
नास्माकमेव जगतामपि मङ्गलानि ॥ १२ ॥

वसिष्ठः । विश्वामित्रं परिष्वज्य । सखे कुशिकनन्दन !

(33) अस्माभिरप्यनाशास्यो रामस्य महिमान्वयः ।
यत् कृतास्तेन कृतिनो वयञ्च भुवनानि च ॥ १३ ॥

विश्वा । (34) प्रकृष्टपुण्यपरिपाकोपादान एष महिमा । के वयमेतावतः प्रहर्षस्य ।

कैकसी माल्यवतो भ्रातुष्पुत्री (४. २०. टीका) । त्रीन् पुत्रकान् रावणादीन् ।

(32) यस्य महतो वीरस्य अप्राकृतानि असामान्यानि, गुणैः निरन्तराणि सततं गुणान्वितानि, लोकोत्तराणि अतिमानुषाणि, फलैः महोदयानि महत्फलदानि अद्भुतानि विचेष्टितानि न केवलम् अस्माकं जगतां त्रयाणां भुवनानामपि मङ्गलानि शुभकराणि ।

(33) रामस्य महिमान्वयः प्रभावावलिः अस्माकमाशीर्वादातिरेकी । यत् तेन भुवनानि च वयं च कृतिनः कृतकृत्याः कृताः ।

(34) प्रकृष्टस्य परमस्य पुण्यस्य परिपाकः अतिशयः उपादान कारणं यस्य ।

Digitized by Google

दश । भगवन् कुशिकनन्दन ! मा मैवम् ।

(35) आदित्याः कुलदेवतामिव नृपाः पूर्वे दिलीपादयः
तेजोराशिमरुन्धतीपतिमृषिं भक्त्या यदाग्निश्रियन् ।
पाकश्लाघ्यतराश्च भूरितपसां सत्याशिषामाशिष-
स्तासामप्ययमेव मङ्गलविधिर्यत्नः प्रसन्नो भवान् ॥ १४ ॥

वसि । सत्यमीदृशो विश्वामित्रः ।

(36) यद्वाचां विषयमतीत्य चेतसां वा
पर्य्यायात् परमतिशायनस्य वा यत् ।
ब्रह्मर्षेा तदिह दुरासदे समिद्धं
तेजोभिर्ज्वलति महत्तपोऽप्रमेयम् ॥ १५ ॥

विश्वा । भगवन् मैत्रावरुण !

---

(35) यदा आदित्याः सूर्यवंश्याः दिलीपादयः पूर्वे प्रथमे नृपाः भक्त्या कुलदेवतामिव तेजोराशिम् अतितेजस्विनम् अरुन्धत्याः पतिम् ऋषिं वशिष्ठम् आग्निश्रियन् पौरोहित्येन वृतवन्तः । आश्रयतेर्नुङि रूपम् । भूरि महत् तपो येषां तथा सत्या फलदा आशीः आशीर्वादः येषां तेषां मुनीनाम् आशिषः पाकेन परिणामेन श्लाघ्यतराः अतिश्लाघ्याः च । तासाम् आशिषाम् अपि अयमेव मङ्गलविधिः शुभोदयः यत् भवान् अस्मभ्यः प्रसन्नः ।

(36) यत् वाङ्मनसोः दुष्प्रापम् यच्च उत्कर्षातिशयि । तत् समिद्धं दीप्यमानम् अप्रमेयम् अनन्तं महत् तपः इह दुरासदे दुर्धर्षे ब्रह्मर्षि विश्वामित्रे तेजोभिः ज्वलति ।

Digitized by Google

(37) सनत्कुमाराङ्गिरसौ गुरू विद्यातपोमयौ ।
स्तौषि चेत् सत्य एवास्मि सत्यसन्धा हि ते गिरः ॥१६॥
रामभद्रे तु नाश्चर्यमेतत् महाराजदशरथो हि तस्य प्रसविता ।

(38) साक्षात्पुण्यसमुच्छ्राया इव मनोर्वैवस्वतस्यान्वये
राजानस्त्वदपेक्षितेन विधिना गोपायितारः प्रजाः ।
ये भूताः प्रथमे पवित्रचरितास्तेषामयं धूर्वरो
वीरः क्षत्रियपुङ्गवो गुणनिधिः श्लाघ्यो धरित्र्याः पतिः ॥१७॥

अपि च ।

(39) अरिष्टस्वाष्ट्रस्य प्रथमनविधौ जम्भदमनः
स विश्वेषामीशः पतिरपि निकायस्य मरुताम् ।

---

(37) सनतः ब्रह्मणः कुमारः पुत्रः त्वम् आङ्गिरसः शतानन्दश्च विद्यातपोमयौ गुरू । यदि त्वं मां स्तौषि यथार्थेनेदृशोऽहं हि यतः ते गिरः सत्यसन्धाः सत्याभिसन्धयः यतस्त्वं सत्यवागिति भावः । प्रसविता जनकः ।

(38) वैवस्वतस्य मनोः अन्वये वंशे साक्षात् पुण्यानां सत्समूहानां समुच्छ्रयाः उन्नतय इव ये त्वदपेक्षितेन तदुपदिष्टेन विधिना प्रजाः गोपायितारः प्रजानां रक्षकाः । 'न लोकाव्ययनिष्ठाखलर्थतृचाम्' पा०.२.३.६९. इति कर्मं । प्रथमे पवित्रचरिताः राजानः भूताः अतिक्रान्ताः । तेषां धूर्वरः राज्यधारकः गुणनिधिः क्षत्रियश्रेष्ठः अयं वीरः दशरथः श्लाघ्यो धरित्र्याः पृथिव्याः पतिः । उत्तरपदस्थाः पुङ्गवादयः श्रेष्ठवाचकाः ।

(39) प्रथमनविधौ शम्बदमनकर्मणि त्वाष्ट्रस्य त्वष्टुः अरिष्टः शत्रुः

विजेतारं सेनाः सततमपहन्तारमसुरा
नमुं वीरं वव्रे बहुषु समनीकेषु मघवा ॥ १८ ॥

(40) सोऽयमीदृशः कथमनीदृशं प्रसूते ? कथमत्रार्थ्यं नाम ?

मरुत्वन्तं देवं य इह भगवन्तं विजयते
विजिग्ये तं राजा युधि दशमुखं हैहयपतिः ।
निहन्तारं तस्य प्रथितमहिमानं त्रिभुवने
महावीरं जित्वा किमिव हि न वत्सेन विजितम् ॥१९॥

इत्यहेति भावः जन्मादमनः जन्मशासकः विश्वेषां लोकानाम् ईशः पतिः मरुतां निकायस्य मरुद्गणस्याऽपि पतिः स मघवा इन्द्रः बहुषु समनीकेषु युद्धेषु सेनाः विजेतारं सैन्यजयिनम् असुरान् अपहन्तारं दानवनिसूदनम् अमुं वीरं दशरथं वव्रे नाधितवान् । रा०. २. ८. ११. । "हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे । इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥ अथान्वाहार्यपचनादुत्थितो घोरदर्शनः । .....इत्र इति प्रोक्तः पापः परमदारुणः ॥.....भित्त्वा यज्ञेन तत्कुक्षिं निष्क्रम्य बलभिद्विभुः । उच्चकर्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा ॥" भा०. ६. ९. ११–१२–१८ । १२. ३२. ॥ तारकस्य सेनान्यामेको जम्भः । सुरासुरयुद्धे ब्रह्मास्त्रेणेन्द्रस्तं जघान । मात्स्य०. १४७. ४३. । १५२. १६२. । "एवं गतेऽपि शक्रत्वं प्रियं मे कर्तुमर्हसि । इमे ते सप्तकाः सप्त मरुतो नाम विश्रुताः । चरन्त्वाज्ञाकराः सप्त वातस्कन्धेषु सप्तसु । सहैभिर्मम पुत्रैस्त्वं मरुद्भिर्जहि शात्रवान् ॥" इति रा०. १. ४८. १–४.

(40) अनीदृशम् अनात्मसदृशम् । यादृशो दशरथस्तादृशो रामभद्र

Digitized by Google

दश। तत् किमित्ययं भिद्यते लोकः।

विश्वा। (41) एष वत्सो रामभद्रः सजामदग्न्य इत एवाभिवर्त्तते। य एषः—

वीरश्रिया च विजयेन च रोचमानो
मान्ये सुनावनतश्च गुणोन्नतश्च।
लज्जां वहन् भृगुपतौ हृतवीर्य्यदर्पे
शिष्यो गुरावि व कृतप्रथमापचारः॥ २०॥

ततः प्रविशतो रामजामदग्न्यौ।

रामः। (42) यद्ब्रह्मवादिभिरुपासितवन्द्यपादे
विद्यातपोव्रतनिधौ तपसां वरिष्ठे।

इति भावः। यः रावणः इह जगति भगवन्तं महत्तमम् इन्द्रं विजयते। तं दशशतं युधि समरे क्षत्रियाणां पतिः राजा कार्तवीर्यः विजिग्ये जितवान्। विपूर्वकजयतेर्लिटि रूपम्। तस्य निहन्तारं विनायकं त्रिभुवने प्रथितमहिमानं विश्रुतप्रभावं महावीरं जामदग्न्यं जित्वा किमिव हि रामेण न विजितम्। सर्वं जितमिति भावः।

(41) जामदग्न्येन सह सजामदग्न्यः। रोचमानः दीप्यमानः। मान्ये सुनौ अवनतः विनयनम्रः, गुणैः उन्नतः। कृतः प्रथमः अपचारः अविनयो येन स शिष्यः गुरौ इव हृतः वीर्यस्य दर्पः यस्य तस्मिन् भृगुपतौ जामदग्न्ये। लज्जां वहन् लज्जितः। यथोक्तं रघौ "निर्जितेषु तरसा तरस्विनां यत्नुषु प्रणतिरेव कीर्तये।" ११. ९१.।

(42) यत् मया त्वयि देवात् गरुत्तेषेण विनयापराधः विनयप्रमादः कृतः। भगवन् तत् त्वं प्रसीद अयं ते तुभ्यम् अञ्जलिः। अहमञ्जलिं

दैवात् कृतस्त्वयि मया विनयापराध-
स्तत्त्वं प्रसीद भगवन्नयमञ्जलिस्ते ॥ २१ ॥

जाम । *अपराद्धं वत्स ! त्वया जामदग्न्यस्य ? नोपकृतम् ?

43) पुण्या ब्राह्मणजातिरन्वयगुणः, शास्त्रं, चरित्रं च मे,
येनैकेन कृतान्यमूनि हरता चैतन्यमात्रामपि ।
एकः सन्नपि भूरिदोषगहनः सोऽयं त्वया प्रेयसा
वत्स ! ब्राह्मणवत्सलेन शमितः क्षेमाय दर्पामयः ॥२२॥

राम । (44) कथं नापराद्धं मया, यदायुधपरिग्रहं यावदारूढो दुर्योगः ?

---

* किमपराद्धमस्मासु वत्सेन । अ०. रा०. ४.।

वत्सेति प्रार्थये दोषो मे क्षम्यतामिति । किम्भूते त्वयि ब्रह्मवादिभिः वेदविद्भिः उपासितौ वन्द्यौ पादौ यस्य तस्मिन् । तथा विद्यायाः तपसः व्रतस्य च निधौ आधारे । तपतां तपस्विनां वरिष्ठे प्रधाने । "विनयापराधसत्त्वम्" इत्यत्र "विनयापचारस्तत्त्व" इति दृश्यरूपसम्मतः पाठः ।

(43) येन एकेन दर्पाभयेन चैतन्यमात्रां चेतनाहरित्तम् अपि हरता अमूनि चरित्रादीनि हृतानि नाशितानीति भावः । हे वत्स ! ब्राह्मणवत्सलेन प्रेयसा प्रियतरेण त्वया सोऽयम् एकः सन् अपि भूरिभिः बहुभिः दोषैः गहनः दुर्गमः दर्पामयः दर्परूपो व्याधिः क्षेमाय कुशलाय शमितः साधितः ।

(44) यदा दुर्योगः कलङ्कः आयुधपरिग्रहं शस्त्रधारणं यावत् आरूढः गतः । यदा मया त्वयि शस्त्रं गृहीतमिति भावः ।

Digitized by Google

जाम। एष वो न्यायः।

(45) असाध्यमन्यथा दोषं परिच्छिद्य शरीरिणाम्।
यथा वैद्यस्तथा राजा शस्त्रपाणिर्विषह्यति ॥ २३ ॥

रामः। कोऽहमुक्तिप्रत्युक्तिकायां भगवतः। तस्मादित इतो भगवन्!

जाम। क्व पुनर्वत्स! मया गन्तव्यम्?

रामः। यत्र तातश्च तातजनकश्च। अथवा शान्तम्। उत यत्र भगवन्तौ मैत्रावरुणकौशिकौ।

जाम। इदमिदानीमशक्यम्। अनतिक्रमणीयश्च राजनिर्देशः। परिक्रम्य। हे भगवन्तौ!

(46) स एष रामः सौम्यत्वादचण्डश्चण्डविक्रमः।
यस्य प्रतिष्ठितं जैत्रं जामदग्न्येऽपि शासनम् ॥ २४ ॥

राजानौ। अतिगम्भीरः सौजन्योद्गारः।

रामः। एष वो रामशिरसा प्रणामपर्य्यायः।

सर्वे। एह्येहि वत्स! इति परिष्वजन्ते।

---

(45) शरीरिणां दोषम् उपदेशेन असाध्यम् अनिवार्यं परिच्छिद्य विविच्य शस्त्रपाणिः शस्त्रहस्तः विषह्यति निरूपयति। वैद्योऽपि व्रणादिदोषान् शस्त्रेण निवारयति।

(46) चण्डविक्रमः तीव्रवीर्योऽपि रामः सौम्यत्वात् मनोहरत्वात् अचण्डः शान्तः। यस्य जैत्रं विजयि शासनम् आज्ञा प्रतिष्ठितं निहितम्।

Digitized by Google

जाम। (47) भगवन् मैत्रावरुण! एष जमदग्निपुत्रः प्रणम्य कौशिकेन सार्धमत्रभवतो विज्ञापयामि।

हन्तातिक्रमसंभृतस्य महतो निर्घृणस्य पाप्मनः
प्रायश्चेतनमादिशन्तु गुरवो रामेण दान्तस्य मे।
प्राग्धर्मस्य भवन्त एव परमद्रष्टार आसन्, गुरो-
र्लब्ध्वा ज्ञानमनेकधा प्रवचनैर्मन्वादयः प्राणयन् ॥२५॥

वसि। (48) अनघः श्रोत्रियाणां गृहे जातोऽसि!

दुर्विनीते त्वयि वयं दुःखिताः, सुखिनोऽन्यथा।
निसर्गो ह्येष हन्तानां यत्तु श्रेयस्तथैव तत् ॥ २६ ॥

तत् परिपूत एवासि।

विश्वा। (49) अपहृतं ते विघ्नः पाप्मानं रामभद्रेण। यतः प्रायश्चित्तमिव राजदण्डमप्येनसो निष्क्रयमामनन्ति

---

(47) सार्धं सह। गुरवो भवन्तः रामेण दान्तस्य शोधितस्य मे मम हन्तानां भवताम् अतिक्रमेण वचनलङ्घनेन संभृतस्य सञ्चितस्य महतो पाप्मनः पापस्य निर्घृणस्य विगुप्तये प्रायश्चेतनं प्रायश्चित्तम् आदिशन्तु। प्राक् प्रथमं भवन्त एव धर्मस्य परमद्रष्टारः आसन्। भवन्त एवादिधर्मशास्त्रप्रवर्त्तकाः। गुरोः सकाशात् अनेकधा ज्ञानं लब्ध्वा मन्वादयः प्रवचनैः व्याख्याभिः प्राणयन् निबबन्धुः धर्मशास्त्राणीति शेषः।

(48) अनघः निष्पापः। निसर्गः स्वभावः। श्रेयः शुभम्। परिपूतः पापनिर्मुक्तः।

(49) अपहृतं शोधितम्। धर्माचार्याः धर्मशास्त्रप्रवर्त्तकाः राज्ञा

Digitized by Google

धर्माचार्य्याः। किं पुनरत्र भगवान् वसिष्ठः प्रजापालसन्निधौ प्रशास्ति।

रामः। एतानि तानि साक्षात्कृतधर्मणामृषीणां प्रसन्नगम्भीरपावनानि वचनानि।

दश। भगवन् जामदग्न्य!

निसर्गतः पवित्रस्य किमन्यत् पावनं तव।
तीर्थोदकस्य वह्नेश्च नान्यतः शुद्धिमर्हतः॥ २७॥

जाम। (50) भगवति वसुन्धरे! प्रसीद रन्ध्रदानेन।

जन। (51) भगवन्! यदि प्रसन्नोऽसि तर्हि स्वयोपवेशनात् परिपुनीहि गृहान्, एतत् पूतमासनं भगवतः।

जाम। (52) यदभिरुचितं सूर्य्यगिरिशान्तेवासिने राजन्यश्रोत्रियाय।

[सर्वे उपविशन्ति।

दश। (53) जनपदवह्निर्निष्ठा यूयं, गृहस्थ परिग्रहा-

कृतं दग्धमपि एनसः पापस्य निष्क्रयम् आमनन्ति निदिशन्ति। प्रजापालसन्निधौ राजालिके।

(50) एतानि वाक्यानि श्रोतुं न शक्नोमीति भावः।

(51) परिपुनीहि पवित्रीकुरु। पूतं पवित्रम्।

(52) सूर्य्यगिरिशस्य याज्ञवल्क्यस्य अन्तेवासिने शिष्याय राजन्यश्रोत्रियाय वेदविदे क्षत्रियाय जनकाय। "रुच्यर्थानां प्रीयमाणः" पा०, १. ४. ३३. इति चतुर्थी।

(53) यूयं तापसाः जनपदात् ग्रामात् वह्निः वने कृतनिलयाः।

Digitized by Google

इयमपि निजैर्व्यर्था: कार्यैस्ततो न बभूव य:।
स इह भवतामस्माभिर्मनोरथवाञ्छित:
सुचरितपरीपाकात् प्राप्तश्चिरस्य समागम: ॥ २८ ॥

अत्र च। (54) का ते स्तुति: स्तुतिपथादतिवृत्तधाम्न:
किं दीयतामविकलचितिदायिने च।
शान्तस्य किं परिजनेन, मुने! तथापि
पुत्रै: समं दशरथोऽद्य वशंवदस्ते ॥ २९ ॥

जाम। यूयमीदृशा इति किमत्राश्चर्यम्?

(55) प्रेद्धं धाम यदामनन्ति सुधिय:, सोऽयं निधिर्ज्योतिषां
देवो व: सविता कुलस्य, किमतो भूत्यै प्रशंसापदम्।

वयमपि गार्हस्थ्याश्रमसेवया निजैः कार्यैः व्यर्थाः। ततो भवतां यः समागमः सङ्गः न बभूव। स मनोरथवाञ्छितः इष्टः समागमः सुचरितानां परीपाकात् परिणामात् पुण्येनेति भावः चिरस्य चिरेण इह अस्माभिः प्राप्तः।

(54) स्तुतिपथात् स्तवविषयात् अतिवृत्तम् अतिशयि धाम तेजो यस्य ईदृशस्य तव जामदग्न्यस्य का स्तुतिः। "स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते" इति भावः। किं त्वां ददानि येन समग्रभूमण्डलं कश्यपाय दत्तम्। शान्तस्य तपोनिरतस्य ते परिजनेन सेवकैः किं प्रयोजनम्। हे मुने! तथापि अद्य दशरथः पुत्रैः समं सह ते वशंवदः त्वदधीनः।

(55) यत् सुधियः पण्डिताः प्रेद्धं प्रज्वलितं धाम तेजः इति आमनन्ति निर्दिशन्ति। "विश्वदेव्यतो ज्योतिषद्भदसि सूर्य। विश्वमाभासि रोचन" इत्यु०, १, ५९, ४,। सोऽयं देवः ज्योतिषां निधिः

Digitized by Google

यज्वानः परमार्थराजऋषयस्ते यूयमिक्ष्वाकवो
येषां वेद इवाप्रमेयमहिमा धर्मे वसिष्ठो गुरुः ॥ ३० ॥
अपिच ।

(56) संग्रामेष्टिसमाप्तिदं दिविषदां भर्तुर्धनुः साधनं
सप्तद्वीपनिविष्टयूपनिलयश्रेण्यङ्किता भूर्गृहाः ।
अक्षत्कीर्त्तिनिबन्धनं भगवती भागीरथी सागरः
प्रख्यातानि च तानि तानि भवतां भूमानमातन्वते ॥३१॥
वसिष्ठविश्वामित्रौ । अपवार्य । एतदपि शिक्षितं वत्सेन ।
जाम । रामभद्र ! मामनुमोदस्वारण्यगमनाय ।

आधारः सूर्यः युष्माकं कुलस्य सविता जनकः । अतः भवतां भूत्यै ऐश्वर्याय किं प्रशंसापदम् । यज्वानः याज्ञिकाः परमार्थेन यथार्थतः राजऋषयः राजेन्द्राः । "ऋत्यकः" पा०. ६. १. १२८. इति न सन्धिः । ते यूयं इक्ष्वाकवः इक्ष्वाकुवंश्याः वेद इव अनन्तधामा वसिष्ठः येषां धर्मे गुरुः ।

(56) दिविषदां देवानां भर्तुः इन्द्रस्य संग्रामस्य युद्धस्य इष्टेः इच्छायाः समाप्तिदम् अन्तकृत् तस्य सप्तमथनं धनुः भवतां साधनम् उपकरणम् । सप्तद्वीपेषु निविष्टानां निहितानां यूपानां जयस्तम्भानाम् एव श्रेणिभिः अङ्किता भूः मही भवतां गृहाः फलगतेति भावः । अक्षत् सततं कीर्तिनिबन्धनं यशोराशिः भगवती भागीरथी, सागरः, प्रख्यातानि च तानि तानि भवतां चरितानि भूमानमातन्वते बहुलीभवन्ति । "आतन्वते" इत्यत्र "आचक्षते" इति त्रिवेणभट्टीतः पाठः । भगीरथेन किल गङ्गा स्वर्गादवतारिता सगरपुत्रैश्च सागरः खनित इति रा०. १. ४५. । ४१. अ०. पठ्यते ।

Digitized by Google

विश्वा। मामप्यद्य भवन्तोऽनुजानन्तु।

(57) रघुजनकगृहेषु गर्भरूप-
व्यतिकरमङ्गलहृद्ययोऽनुभूताः।
भृगुपतिदमनेत्यवोचके। विरम्य।
भृगुपतिविहितोन्नतिं च वत्सं
प्रियमभिनन्द्य सुखी गृहानुपेयाम् ॥ ३२ ॥

दम। वत्स रामभद्र! प्रस्थितस्ते भगवान् कौशिकः।

विश्वा। यावत् रामभद्रेऽहमेव सौम्य! त्वां न मोक्तुमुत्सहे।

(58) किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ३३ ॥

वसि। गृहात् स्वगृहं गन्तुमागन्तुं च कामचारः।

---

(57) अस्माभिः रघुनन्दनानां जनककन्यानाञ्च विवाहमङ्गलानि दृष्टानि। इदानीं रामभद्रं भार्गवविजयिनं दृष्ट्वा सानन्दं गृहान् निवर्त्तिष्ये। दमनशब्दस्य कटुत्वात् विदितशब्देनाप्रियता परिहृता।

(58) किन्तु अनुष्ठाननित्यत्वम् आग्निकत्वता स्वातन्त्र्यं स्वाधीनत्वम् अपकर्षति अपहरति। नित्यं मया क्रियाः कर्त्तव्या इति भावः। हि यतः आहिताः स्थापिताः अग्निः वेषां तेषां गृहमेधिनां गृहस्थता गृहस्थवृत्तिः प्रत्यवायैः विघ्नैः सङ्कटा सम्बाधा परिपूर्णेति भावः। "गृहस्थः ... ... नानाहिताग्निः स्यात्" इति वसिष्ठः। "गृह्याग्नौ वैवाहिकाग्नौ पाकयज्ञान् क्रियात् सायंप्रातर्जुहुयात्। देवताभ्यो बलिहरणं कुर्यात्। ..... भिक्षां भिक्षवे दद्यात्।

Digitized by Google

विश्वा । (59) भगवान् यद्यनुजानीते तर्हि सिद्धाश्रमपदमुभौ गच्छावः । त्वां पुरस्कृत्य गच्छन्मधुच्छन्दसो मातुः सत्कार्यो भविष्यामि ।

वसि । किमेतावत्यपि भवानस्मासु न प्रभवति ?

राजानौ । *रमणीयः पावनो ब्रह्मर्षिसङ्गमः ।
अन्योन्यमाहात्म्यविदोरन्यैरविदितात्मनोः ।
विराजते विरोधोऽपि नाम स्नेहे तुका कथा ॥ ३४ ॥

नेपथ्ये । एषा रामवधूर्गुरून् वन्दते ।

ऋषयः । वत्से जानकि !

(60) वीरेण ते विनयमाङ्गलिकेन पत्या
हतवृत्रः प्रशमितेषु महाभयेषु ।

---

* रमणीयः पावनोऽयमृषीणां समवायः । अ०. रा०. ७. ।

..... त्रिवर्गसेवां सततान्नदानं सुरार्चनं ब्राह्मणपूजनञ्च । स्वाध्यायसेवां पितृतर्पणञ्च कृत्वा नरो याति परं पदं प्रयाति ॥" इति विष्णुः । एषामनुष्ठाने च महत्तापम् । अतोऽत्र चिरं स्थातुं न शक्नोमीति भावः ।

(59) सिद्धाश्रमपदं विश्वामित्रस्याश्रमः (१.२५. टीका) । मधुच्छन्दसो मातुः मम भावीति भावः । मधुच्छन्दःप्रभृतयो विश्वामित्रपुत्राः, वि०. ४. ७. १७. । सत्कार्यः पूज्यः ।

(60) तव विनयेन आङ्गलिकेन शुभङ्करेण पत्या वीरेण हतवृत्रः (४.२८. टीका) इन्द्रश्च महाभयेषु प्रशमितेषु यथा इन्द्राणी मनसा

क्षत्रप्रकाण्डगृहिणीबहुमानपूजा-
मूर्जस्वलामपि शची मनसा करोतु ॥ ३५ ॥

रामः। स्वगतम्। (61) अचिरात् समूलकाषं कषितेषु राक्षसेष्वेवं स्यात्।

ऋषयः। स्वस्त्येवमेवासतां भवन्तः। [इति उत्तिष्ठन्ति।

इतरे। उत्थाय। नमो नमो वः।

जाम। भगवन्तौ, जामदग्न्योऽभिवादयते।

वसिष्ठ-विश्वामित्रौ।—

(62) स्थिरस्ते प्रथमो भूयात्, प्रत्यग्ज्योतिः प्रकाशताम्।
अच्छिन्नशिवसङ्कल्पमन्तःकरणमस्तु ते ॥ ३६ ॥

[इति निष्क्रान्तौ।

जाम। किञ्चित् परिक्रम्य, स्थित्वा च। वत्स रामभद्र! इतस्तावत्।

रामः। उपसृत्य। आज्ञापय।

जाम। यन्मया क्षत्रियोच्छेदविश्रान्तेनावधारितम्।
तदेतदधुना धत्ते धनुः कारणशून्यताम् ॥ ३७ ॥

क्षत्रप्रकाण्डस्य क्षत्रियवरस्य रामस्य गृहीण्याः पत्न्याः तव बहुमानेन अर्जस्वलां महतीं पूजाम् अपि करोतु।

(61) अचिरात् अविलम्बेन समूलकाषं कषितेषु समूलोच्छिन्नेषु। "निमूलसमूलयोः कषः" पा०. ३. ४. ३४. इति घञ्प्रत्ययः।

(62) तव प्रथमः स्थिरो भूयात्। प्रत्यक् पूर्णं ज्योतिः परमज्ञानमिति भावः प्रकाशताम्। अच्छिन्नः अनुबद्धः शिवस्य शुभस्य सङ्कल्पः

Digitized by Google

दुःखादिव्रसनप्रयोजनमस्तु परन्तु: ।

(63) पुण्यानामृषयस्तटेषु सरितां ये दण्डकायां वने
भूयांसो निवसन्ति तेषु सततं लङ्कासदो राक्षसाः ।
विध्वंसाय चरन्ति, तत्प्रमथने यस्योपयोगो भवेत्
संप्रत्येव सतामुनैव धनुषा, वत्सेऽधिकारः स्थितः ॥ ३८ ॥

[इत्यर्पयति ।

रामः । प्रभव । प्रतिगृह्णीतेयमाज्ञा ।

जाम । साक्षं परिक्रम्य । आयुष्मन् ! प्रतिनिवर्त्तस्व ।

[इति निष्क्रान्तः ।

रामः । सवाष्पम् । (64) गतो भगवान् भार्गवः । विचिन्त्य । यद्यपि नामाऽन्येन केनचिदुपायेन दण्डकारण्यं प्रतिष्ठेयम् । कथं च रामप्रियाद् गुरुजनादेवं स्यात् ?

यस्य तत् अन्तःकरणं मनः अस्तु । "आशिषि लिङ्लोटौ" पा०. ३. ३. १७३. इति लोट् ।

(63) दण्डकायां वने दण्डकारण्ये पुण्यानां सरितां नदीनां गोदावरीप्रभृतीनां तटेषु ये भूयांसः बहवः ऋषयः निवसन्ति । सततं सर्वदा लङ्कासदः लङ्कावासिनः राक्षसाः विध्वंसाय नाशाय तेषु चरन्ति । यस्यस्यैव तेषां प्रमथने विनाशे सता पूजितेन अनुना धनुषैव यस्य तव उपयोगः प्रयोजनं स्यात् । तस्याधिकारः त्वयि स्थितः । इति धनुः रामं ददाति ।

(64) "दण्डकारण्यम्" इत्यत्र "दण्डकारण्यानाम्" इति केचित् पठन्ति । व्याकरणविरुद्धः स पाठः । "हरिर्हरिप्रभृतिषु प्रतरणे"

Digitized by Google

(65) न्यस्तशस्त्रे भृगुपतौ परतन्त्रे तथा मयि।
कष्टमुत्सारिताः क्रूरैर्यातुधानैस्तपोधनाः ॥ ३९ ॥

नेपथ्ये। आर्य आर्य!

(66) मध्यमायाः प्रियसखी मातुर्वा मन्थरेति या।
सा प्राप्तेयमयोध्यायास्तव राम! दिष्टया ॥ ४० ॥

रामः। साधु यदिदमस्यां गुरुजनप्रवासवैमनस्यं विच्छिद्येत। तदेतत्स लक्ष्मण! उपसर्पय।

ततः प्रविशति लक्ष्मणः मन्थरावेषेण शूर्पणखा च।

शूर्प। (67) आवेसिअमन्थरासरीरा सुप्पणहा अहं। वसिट्ठविस्सामित्तगमणेण सुसमाहिदं। अम्हो! एसो परसुरामविजई खत्तिअकुमारओ रामो। निव्वण्णं। अम्हो! सम-

---

"इतः प्रतस्थे स रघोरघो रघौ गृहान्विदर्भाधिपतेर्घराधिपः" इत्यादिप्रयोगदर्शनात्।

(65) न्यस्तं मयि निक्षिप्तं शस्त्रं येन तस्मिन् भार्गवे, तथा परतन्त्रे पराधीने मयि कष्टम् अहह क्रूरैः यातुधानैः राक्षसैः तपोधनाः तापसाः उत्सारिताः मथिताः। "यातवो यातना एषु धीयन्त इति यातुधानाः" इति सायनः।

(66) मध्यमायाः मातुः कैकय्याः। वैमनस्यं दीनमनस्कता।

(67) आवेशितमन्थराशरीरा शूर्पणखाऽहम्। वसिष्ठविश्वामित्रगमनेन सुसमाहितम्। अहो! एष परशुरामविजयी क्षत्रियकुमारो रामः। अहो, समग्रसौभाग्यलक्ष्मीपरिपूर्णेषु लोचनरसायनसौम्य-

Digitized by Google

मसोहमलच्छीपरिग्गहेण लोअणरसाअणसोअं से सरीर-णिम्माणं। भो दाणिं चिरआलवेहव्वदुक्खपब्भसिदसंसार-सोक्खस्स वि जणस्स चारित्तधीरसपूरिदं पुणो वि हिअअं परिप्फुरावेदि।

रामः। प्रविपत्य। * अपि मन्थरे! कुशलमम्बायाः?

शूर्प। (68) सुहं कुसलं च। वच्छलदापण्हुदत्थणी मज्झमा दे मादा परिस्सजिअ आसंवेदि। पुत्तअ पुरा पडिस्सादे दुवे वरे महाराएण जाणावेमि। एत्थ मे विग्घत्तिहारओ होहि एस तादस्स कज्जलेहो।

लक्ष्म। गृहीत्वा वाचयति।

---

*अपि कुशलं.....मध्यमाम्बायाः कथयत्यार्या मन्थरा। वा०. रा०. ४।

मस्य शरीरनिर्माणम्। भो इदानीं चिरबालवैधव्यदुःखप्रभ्रंशित-संसारसौख्यस्यापि जनस्य चारित्रधैर्यसपूरितं पुनरपि हृदयं परि-स्फुरति। रावणेन भगिन्याः शूर्पणखायाः भर्त्सबधः रा०. ७. २७. २७–२८–२९ श्लोकेषु कथितः।

(68) सुखं कुशलं च। वत्सलतास्रुतस्तनी मध्यमा ते माता परिष्वज्याशापयति। पुत्रक पुरा प्रतिश्रातौ द्वौ वरौ महाराजेन शाप-यामि। अत्र मे विघ्नप्रतिहारको भवत्येष तातस्य कार्यलेखः। "वच्छलदा" इत्यत्र "वच्छ सदा एसा" "वत्स सदैषा" इत्यर्थकश्चिद्येनग्रन्थे गृहीतः पाठः। प्रस्रुतः क्षरितदुग्धः। परिष्वज्य आलिङ्ग्य। विघ्नप्रतिहारकः वाहकः।

Digitized by Google

(69) *अस्त्वेकेन वरेण वल्लभरतो भोक्ताधिराज्यश्रियः,
खगतम् । कथमेतदार्ये तिष्ठति कनिष्ठस्यार्यस्य भरतस्य राज्यप्रार्थनम् ? प्रकाशम् ।

यावन्येन विहाय कालहरणं रामो वनं दण्डकाम् ।
खगतम् । हा ! अम्ब ! किं कृतं त्वयार्य्यगमनवरणेन ?
प्रकाशम् ।

तस्यां चीरधरश्चतुर्दश समास्तिष्ठत्वसौ, तं पुनः
सीतालक्ष्मणमात्रकात् परिजनादन्यो न चानुव्रजेत् ॥ ४१ ॥

---

*यार्ये बिभर्तु भरतस्तव राज्यलक्ष्मीम् ।
वर्षाणि तिष्ठतु चतुर्दश दण्डकायां
सौमित्रिमैथिलसुतासहितश्च रामः । भ०. रा०. ४. ६६. ।

---

(69) अधिराज्यश्रियः राज्यलक्ष्मीसम्पदः भोक्ता उपभोगी अस्तु राजा भवत्विति भावः । अथ अन्येन द्वितीयेन वरेण विहाय कालहरणं सद्यः रामो वनं दण्डकां यातु । चतुर्दश समाः वत्सरान् तस्यां दण्डकायाम् असौ चीरधरः वल्कलभृत् तिष्ठतु । सीतां लक्ष्मणञ्चापहायान्यः परिजनकं नानुगच्छेत् । आर्ये रामभद्रे तिष्ठति वर्त्तमाने कनिष्ठो भरतः कथं राज्यार्हः । यथोक्तं रामायणे "इक्ष्वाकूनां हि सर्वेषां राजा भवति पूर्वजः" २. ११८. ३३. । "दण्डकाम्" इत्यत्र "दण्डकम्" इति तारानाथभट्टाचार्यगृहीतः पाठः । तस्याम् इति वाक्येन तस्य प्रमादता सूचिता ।

Digitized by Google

स्वगतम् । (70) हा पापे रण्डे मातृबन्धो !

सदा भरतशत्रुघ्नलक्ष्मणार्य्यसुखैः शताम् ।

अम्बेति व्याहृतिं हित्वा किं कृतं पापया त्वया ॥ ४२ ॥

रामः । (71) अहो प्रसादप्रकर्षः !

तत्रैव गमनादेषो यत्र पर्य्युत्सुकं मनः ।

न चैष विरहो जातः स च वत्सो ममानुगः ॥ ४३ ॥

लक्ष्म । दिष्ट्यानुमोदितोऽहमार्य्येण ।

रामः । आर्य्ये मन्थरे ! एष प्रस्थितोऽस्मि ।

सूर्पः । (72) णमो दाणिं भअवदो संसारस्स । जत्थ ईरिसा वि कप्पदुमा परोहन्ति । [इति निष्क्रान्ता ।

लक्ष्म । अये ! मातुलो युधाजिदार्य्यभरतसहचरस्तात-मुपसर्पति ।

रामः । दिष्ट्या कष्टं च ।

अपरिष्वज्य भरतं नास्ति मे गच्छतो धृतिः ।

अस्मत्प्रवासदुःखार्त्तं नत्वेनं द्रष्टुमुत्सहे ॥ ४४ ॥

---

(70) रण्डा विधवा । भ्रातृबन्धुः दुष्टभ्राता । व्याहृतिः ब्रह्मा-णं हित्वा परित्यज्य विरम्येति भावः ।

(71) प्रसादस्य अनुग्रहस्य प्रकर्षः परा कोटिः । स वत्सः लक्ष्मणः मम अनुगः सहायो भवति । "ममानुजः" इत्यत्र "कृपाऽनुजः" इति केचित्पठन्ति । 'अनुजो भरतो कृपो भवति ।' इत्यस्यार्थः । लक्ष्मण-माक्याद्विरहशब्ददर्शनाच्चास्य पदस्यासङ्गतता स्पष्टा ।

(72) नम इदानीं भगवते संसाराय । यत्रेदृशा अपि कल्पद्रुमाः

प्रविश्य युधाजिन्नरतौ दशरथसपत्नीकश्च । (73) देव ! श्रूयतां यदेकायनीभूय प्रजातयस्त्वां विज्ञापयन्ति ।

त्वय्यास्थाता यस्तवायं तनूजे-
स्तेनाद्यैव स्वामिनस्ते प्रसादात् ।
राजन्वत्यो रामभद्रेण राज्ञा
लब्धेप्सिताः पूर्णकामाश्चरामः ॥ ४५ ॥

दश । सखे जनक !

प्रिये कल्याणकामाभिः प्रजाभिर्नोदिता वयम् ।
किं तु रामप्रियौ नेह मैत्रावरुणकौशिकौ ॥ ४६ ॥

जन । परोक्षे सुकृतं कर्म तयोः प्रीतिं करिष्यति ।
मन्त्रज्ञौ वामदेवस्तु भगवानास्त एव हि ॥ ४७ ॥

दश । (74) यद्येवं तदयमेव जामदग्न्यविजयमहोत्सवः प्रसज्यतामभिषेकमहोत्सवेन ।

रामः । इदमिदानीं कथम् ?

प्ररोहन्ति विवर्धन्ते । दैवेषा अपि गुणसम्पन्ना मानुषा भवन्तीति भावः ।

(73) प्रजातयः प्रजाः एकायनीभूय एकाग्रचित्तेन ऐकमत्येन वा । यस्तवायं तनूजः तन्वनः रामः त्वया अध्यक्षेणास्थाता स्थापकः । स्वामिनः भर्तुः तव प्रसादात् अद्यैव तेन रामभद्रेण राज्ञा राजन्वत्यः नाथवत्यः सत्यः लब्धेप्सिताः अधिगतवाञ्छिताः पूर्णकामाः फलितमनोरथाः चरामः वर्त्तामहे । राज्ञं राज्येऽभिषिञ्चेत्यिति भावः ।

(74) प्रसज्यतां सम्बध्यतां रामस्याभिषेकमहोत्सवेन ।

Digitized by Google

दश । (75) सुमन्त्र ! संनिधाप्यन्तामाभिषेचनिकाः सम्भाराः । यच्च येनार्थी स तेन पर्य्याप्तकामः कर्त्तव्यः ।

रामः । उपस्कृत, प्रवक्ष्ये च । अहं तावदर्थी ।

दश । वत्स ! केन ।

रामः ।—

योऽसौ वरद्वयन्यासस्तं त्वां माताद्य मध्यमा ।
यथेष्टं नाथते तात ! तत्प्रसादार्थिनो वयम् ॥ ४८ ॥

दश ।—

(76) सत्यसन्धा हि रघवः किं वत्स ! विचिकित्ससे ।
त्वयि दूतेऽपि कस्तस्य प्राणानपि धनायते ॥ ४९ ॥

रामः । वत्स ! वाच्यताम् ।

लक्ष्म । अस्त्वेकेन वरेणेत्यादिकं वाचयति ।

इतरे । कथमन्यदेव किमपि । हा हा ! हताः स्मः ।

राजा । मूर्च्छति ।

रामलक्ष्मणौ । तात ! समाश्वसिहि समाश्वसिहि ।

---

(75) "आभिषेचनिकं द्रव्यं रामार्थमुपकल्पितम् ॥ यातकुम्भास्तु रुचिरं भद्रासनमलङ्कृतम् । उपकल्पितमाक्षीर्यं व्याघ्रराजस्य चर्मणा ॥ नक्षत्रयुक्तयोश्चैव सक्षमादाहृतं जलम् ।....." रा०. २. १२. १—१२ । आभिषेचनिका अभिषेकसम्बद्धाः । यो यत् याचते तस्य तन्मनोरथः पूरयितव्यः ।

(76) रघवः रघुवंश्याः सत्यसन्धाः सत्यप्रतिज्ञाः । किं विचिकित्ससे

जन। (77) इक्ष्वाकुवंशतिलकस्य नृपस्य तस्मिन्
पत्नी विशुद्धिमति राजकुले प्रसूता।
अत्याहितं किमपि राक्षसकर्म कुर्या-
दार्या सती कथमहो! महदद्भुतं नः॥ ५०॥

राम:। तात तात!

सत्यसन्धाः स्थ यदि वा, रामो यदि च वः प्रियः।
तत् प्रसीदतु तातो नः, पूर्णकामास्तु मध्यमा॥ ५१॥

दश। एवमस्तु का गतिः।

जन। हा वत्स रामभद्र! हा वत्स लक्ष्मण
(78) पुत्रसंक्रान्तलक्ष्मीकैर्यद्दृब्धेक्ष्वाकुभिर्धृतम्।
त्वया तत् वीरकण्ठेन प्राप्तमारण्यकं व्रतम्॥ ५२॥
वत्से जानकि! धन्यासि यस्यास्ते गुरुनियोगादेव भर्तु-
रनुगमनम्।

विलम्बसे। कः तस्य निजस्य प्राणान् अपि धनायते गणयति। "तस्याः" इति पाठो न शोभनः।

(77) इक्ष्वाकुवंशतिलकस्य रघुवंशप्रदीपस्य नृपस्य दशरथस्य पत्नी, तस्मिन् विख्याते विशुद्धिमति पावने कैकयराजवंशे प्रसूता जाता, आर्या पूज्या सती कैकेयी किमपि अकथनीयम् अत्याहितं भीषणं रामस्य विवासनरूपं राक्षसकर्म कथं कुर्यात्। अहो महदाश्चर्यमकाण्डं प्रतिभाति।

(78) पुत्रेषु संक्रान्ता निहिता लक्ष्मीः राजश्रीः यैः तैः दृब्धैः इक्ष्वाकुभिः रघुराजैः यत् व्रतं धृतम्। "गलितवयसामिक्ष्वाकूणामिदं

Digitized by Google

दश । (79) हा वत्से जानकि ! कङ्कणधरैव रक्षसामुपनीतास्युपहारताम् !

[इत्युभौ मूर्च्छितः ।

रामः । (80) अत्यापन्नो गुरुजनः कथं नामैतत् ?

लक्ष्म । आर्य्य दृष्टयोऽयमायातः करुणस्नेहसंवेगः । किमत्र क्रियते प्रतिषिद्धं च नः कालहरणं भरतजनन्या । तदलमतिस्नेहकार्तर्य्येण ।

रामः । साधु आचारनिष्ठुर ! साधु ! अमनुष्यसदृशस्ते चित्तसारः । तदत्स ! वैदेहीमानय ।

[लक्ष्मणो निष्क्रान्तः ।

भरतः । (81) मातुल मातुल ! युक्तमेतद्दो गृहस्य ।

युधाजित् । वत्स ! उद्भ्रान्तः संवृत्तोऽसि ।

(82) पतिर्मृत्योर्वक्त्रे व्रजति, वनमेतत् सुतयुगं,
वधूटी रक्षोभ्यो बलिरिव वराकी प्रणिहिता ।

हि कुलव्रतम्" इति रघुः, १५. ७०. । क्षीरं मातृदुग्धं कण्ठे यस्य तेन शिशुना त्वयारण्यवासः प्राप्तः ।

(79) कङ्कणधरैव विवाहानन्तरमेव । उपहारतां नीताऽसि वने राक्षसाः सन्ति तैर्भक्षिता भविष्यसीति भावः ।

(80) अत्यापन्नः संमूढः ।

(81) गृहस्य कुलस्य तव भवित्र्याः कैकेय्या इत्यर्थः ।

(82) पतिः स्वामी दशरथः वत्सयोः वक्त्रे मुखे व्रजति गच्छति ।

Digitized by Google

निरालम्बो लोकः कुलमयशसा तच्च निहतं,
खसुर्मे दौरात्म्यं जगदविकलं विलुपयति ॥ ५३ ॥

ततः प्रविशति लक्ष्मणः सीता च।

लक्ष्म। आर्ये! इयमार्या।

रामः। द्रुत द्रुतः। सीतालक्ष्मणाभ्यां सह गुरुजनं प्रदक्षिणीकुरु। मातुल!

(83) एष तातस्य तातस्य प्रियापत्याश्च मातरः।
आश्वासनीयाः श्लोकेऽस्मिन् भवतैव, गता वयम् ॥५४॥

[इति परिक्रामति।

वृधा। सावेगम्। कथं वारण्ये त्यजामि? उत्थायानुधावति।

भरतः। अनुगच्छन्। मातुल! ब्रूहि किमिदानीं करोमि?

वृधा। रामभद्र रामभद्र! अपेक्षस्व पादपरिचारकमरण्यानुचरं भरतम्।

एतत् सुतयुगं जनयित्र्यं रामलक्ष्मणौ वनं व्रजतीति शेषः। वराकी दीना वधूटी सीता रक्षोभ्यो वन्यैः उपकार इव प्रक्षिप्ता दत्ता। लोकः निरालम्बः निराश्रयः जात इति शेषः। तत् कुलस्य अयशसा अपयशसा निहतं कलुषितम्। मम खलु भगिन्याः दौरात्म्यं दुराचारः अविकलं सर्वं जगत् विलुपयति आकुलयति।

(83) एष तातः पिता दशरथः। एष तातः श्वशुरो जनकः।

Digitized by Google

रामः । (84) नन्वस्यापि वर्णाश्रमरक्षणे गुरुनियोगः ।

भर । लक्ष्मणस्य शत्रुघ्नस्य वा तदस्तु ।

रामः । किमत्र कस्यचित् स्वरुचिः ?

भर । एतावती मम स्वरुचिः ।

रामः । आः ! शक्यं नाम मयि तिष्ठति त्वयान्येन वा युक्तमुल्लङ्घयितुम् ?

भर । हा हा ! कथं परित्यक्तोऽस्मि मन्दभाग्यः ?

[इति मूर्च्छति ।

युधा । वत्स ! समाश्वसिहि समाश्वसिहि ।

भर । आश्वस । मातुल मातुल ! धारयस्व माम् ।

युधा । वत्स ! एवं तावत् । भरतस्य कर्णे कथयित्वा । रामभद्र ! एवमयं विज्ञापयति—यदेतद्भगवता शरभङ्गेन प्रेषितं (85) तपनीयोपानद्युगलं तदार्य्यः प्रसादीकरोत्विति ।

रामः । (85) तदुन्मुच्य । गृह्यतामिदं वत्स !

प्रियाणि अपत्यानि त्यजन्तीनां यासां ताः मातरश्च भवतैव अस्मिन् शोके आश्वासनीयाः पर्यवस्थापनीयाः । वयं गताः ।

(84) वर्णाश्रमाणां रक्षणे प्रजापालने गुरोः नियोगः आदेशः ।

(85) तपनीयोपानद्युगलं स्वर्णपादुकायुग्मम् । उन्मुच्य स्वपादयोरपनीय । "एतस्मिन्नन्तरे शिष्याः शरभङ्गस्य भीमतः । उपायनमनुप्राप्ता गृहीत्वा कुशपादुके ॥ श्रुत्वेन्द्रं कुशलं पृष्ट्वा निवेद्य स महात्मनः । राघवः प्रतिजग्राह त उभे कुशपादुके ॥.....सोऽधिरोप्य महातेजाः पादुके

भर। शिरस्यारोप्य। आर्य—

रामः। (86) परिष्वज्य। मत्पादमृष्टिकया प्रतिनिवर्त्तस्व। संप्रति सम्भावय चिरप्रमूढौ तातौ।

भर। अयमिदानीमहम्——

(87) नन्दिग्रामे जटां बिभ्रदभिषिच्यार्य्यपादुके।
पालयिष्यामि पृथिवीं यावदार्यो निवर्त्तते ॥ ५५ ॥

[सीतारामौ प्रदक्षिणीकरोति।

लक्ष्म। आर्य्य भरत! लक्ष्मणः प्रणमति।

भरतः। परिष्वज्य, वाष्पस्तम्भं नाटयति।

रामः। वत्स! तातौ सम्भावय।

भर। कष्टमद्यापि नोच्छ्वसितः। [इति वीजयति।

जन। सच्छ्वस्य सर्वतोविलोक्य। हा हा मुषितोऽस्मि।

दश। उच्छ्वस्य। वत्स रामभद्र! न गन्तव्यम् न गन्तव्यम्।

व्यपरोप्य च। प्रायच्छत तदा धीमान् भरताय महात्मने॥" इति रा०, २, १२१, १६–१७–२१।

(86) "आपितोऽसि मया वीर सीतया लक्ष्मणेन च। न च त्वामभिभाषेयं यद्ययोध्यां न गच्छसि॥" इति रा०, २, १२१, १०। सम्भावय स्थिरीकुरु।

(87) "स वल्कलजटाचीरसंनिवेशधरः प्रभुः। पादुके त्वभिषिच्याथ.....। नन्दिग्रामेऽकरोद्राज्यं पूजितो मन्त्रिभिः सह। यावदागमनं तस्य रामस्याक्लिष्टकर्मणः॥" इति रा०, २, १२७, १४–१७–१२–१८। नन्दिग्रामोऽयोध्यायाः प्रागवस्थितः।

Digitized by Google

(88) *प्राणाः पतन्ति, परितस्तमसा हतोऽस्मि,
मर्मच्छिदो मम रुजः प्रसरन्त्यपूर्वाः ।
अक्ष्णोर्मुखेन्दुमुपधेहि, गिरं च देहि,
हा ! पुत्र ! मय्यकरुणः सहसैव मा भूः ॥ ५६ ॥

शोकादिव निर्भरम् । भोः ! क्व प्रविशामीदानीं मन्दभाग्यः ?

[इति विलपो भरतजनकाभ्यां नीयमानो निष्क्रान्तः ।

बुधा । वत्स रामभद्र रामभद्र !

(89) एकीभूय घनैरनेकसमयव्युत्पन्नमेकक्रियं
मुक्ताक्रन्दमितस्ततः किमिदमित्युद्भ्रान्तनारीनरम् ।
एतत्तत् पुरमन्यथैव सहसा संजातमाविद्यते
यस्मिन् कर्दमितेषु वर्त्मसु घनैर्वाष्याम्बुभिर्दुर्दिनम् ॥ ५७ ॥

---

* प्रयान्तीव प्राणाः सुतनु ! हृदयं ध्वंसत इव,
ज्वलन्तीवाङ्गानि प्रसरति समन्तादिव तमः ।
.....
तदक्ष्णोरानन्दं वितर मयि मा भूरकरुणा ॥ मा० मा० ९. ४३. ।

---

(88) प्राणाः पतन्ति निष्क्रामन्ति । परितः सर्वतः तमसा अन्धकारेण हतः निरुद्धः अस्मि । मम अपूर्वाः अननुभूतपूर्वाः मर्मच्छिदः मर्मघातिनः रुजः व्यथाः प्रसरन्ति बहुलीभवन्ति । अक्ष्णोः मम नयनयोः पुरतः मुखेन्दुं चन्द्राननम् उपधेहि उपस्थापय । गिरं च देहि ब्रूहि ।

(89) एकीभूय सङ्घाय घनैः अनेकसमये व्युत्पन्नं समाप्तम्, एका

Digitized by Google

रामः। मातुल मातुल! प्रतिनिवर्त्तस्व। अयञ्च वो हस्ते भरतः।

वृधा। अनुरुध्यस्व मामनुगच्छन्तम्।

रामः। शान्तम्। गुरवो यूयं नानुगन्तारः। आत्मना तृतीयेन गन्तव्यमित्यम्बाया आदेशः।

वृधा। किमहमेकोऽनुगच्छामि, अपितु सबालवृद्धाः प्रकृतयः। किं न पश्यसि?

(90) स्कन्धारोपितयज्ञपात्रनिचयाः स्वैर्वाजपेयार्जितै-
स्त्वत्वैर्वारयितुं तवार्कैकिरणानेते महाब्राह्मणाः।
साकेताः सह सैनिकैरनुपतत्पत्नीग्रहीताग्नयः
प्राक्प्रस्थापितहोमधेनव इमे धावन्ति वृद्धा अपि ॥५८॥

रामः। मातुल मातुल! गुरुभिरेव शिष्यो धर्म्मलोपात् पालयितव्यः तत् प्रसीदतु नः प्रतिनिवृत्य, निवर्त्यतामयं महाजनः। [इति प्रणमति।

क्रिया कर्म यत्र तद्यथा तथा शुक्लः विक्लवः आक्रन्दः रुदितं यत्र तत्, कुतस्ततः किम् इदम् इति उद्भ्रान्ताः संमूढाः नारीनराः स्त्रीपुरुषाः यत्र तत्। तत् एतत् अयोध्यापुरं सहसा अन्यथैव भिन्नाकारमेव सञ्जातम्। यस्मिन् पुरे घनैः निविडैः वाष्पाम्बुभिः त्वद्विरहशोकाकुलानां नयनजलैः कर्दमितेषु पङ्किलेषु वर्त्मसु मार्गेषु दुर्दिनं वर्षुकदिनम् आवेद्यते तद्वत् प्रतिभाति।

(90) स्वैः स्वकीयैः वाजपेये यज्ञे अर्जितैः लब्धैः त्वत्वैः आत-

वृधा । वत्सोत्तिष्ठोत्तिष्ठ । एष वो वञ्चयित्वा प्रजाः क्वापि मन्दभाग्यो गच्छामि ।

त्वां लक्ष्मण महाबाहो ! त्वां च वैदेहनन्दिनि !

आमन्त्रये निवृत्तोऽस्मि पापः कल्याणमस्तु वाम् ॥५९॥

इदन् प्रतिनिवृत्य । अहो ! नु खलु भोः !

(91) प्रतिमन्वन्तरं भूतैर्गीयमाना चरिष्यति ।

प्रातः पवित्रं लोकानामियं चारित्रपञ्जिका ॥ ६०॥

[इति निष्क्रान्तः ।

इष्क्ष्वा । (92) कथितमार्य्यस्य गुह्यवेरपुरवास्तव्येन निषादपतिना गुहेन तत्प्रदेशपर्य्यन्तावस्कन्दिनो विराधराक्षसस्य दुर्विलसितम् ।

पतैः तव अर्कस्य स्वर्वस्य किरणान् वारयितुम् एते स्कन्धेषु आरोपितः निक्षिप्तः यत्नपात्राणां निचयः समूहः यैः ते, साकेताः अयोध्यावासिनः महाब्राह्मणाः सैनिकैः योधैः सह, अनुपतन्तीभिः अनुगच्छन्तीभिः पत्नीभिः स्वीकृताः अग्निः येषां ते, प्राक् अग्रतः प्रस्थापिताः कृता होमधेनवः यैः ते, इमे इत्वा अपि धावन्ति । "साकेतः स्यादयोध्यायाम्" इति यादवः ।

(91) मनोः अन्तरं राज्यकालः मन्वन्तरम् । प्रतिमन्वन्तरं युगे युगे भूतैः प्राणिभिः गीयमाना कीर्त्यमाना रामस्य इदं चारित्रस्य गीतस्य पञ्जिका पत्रिका लोकानां प्रातः पवित्रम् अघमर्षणं चरिष्यति भविष्यति ।

(92) रा०. २. ४६. अ०. वर्णनादर्शनादाधुनिकमिजापुरसन्निहितशृङ्गवेरपुरमासीदित्यवगम्यते । अधुनाऽप्येतन्नामकग्रामार्द्धक-

Digitized by Google

रामः। (93) तेन विराधहतकोन्मथनाय सन्निकृष्ट-प्रयागमनुषक्तमन्दाकिनीपवित्रमेखलं चित्रकूटं नामाचल-मुपेत्य मुनिभिरुपजुष्टतीर्थं, रक्षांसि निहत्य, दण्डकां प्राप्य, सन्निहितगृध्रराजं क्रमेण यामो जनस्थानम्।

[इति निष्क्रान्ताः सर्वे।

इति चारित्रं नाम चतुर्थोऽङ्कः।

वस्तुनम्। खर्वटाख्या अतिदुःखका विन्ध्यशैलनिवासिनो निषादा इति वि०. १. १२. २४–२६.। मनौ तु ब्राह्मणाच्छूद्रायां जातो निषाद इति श्रूयते १०. ८.। तत्प्रदेशपर्यन्तम् अवरुन्धिनः अभिचरतः। दुर्विलसितं दुर्वृत्तम्।

(93) विराधहतकोन्मथनाय दुष्टस्य विराधस्य उच्छेदाय। सन्निकृष्टप्रयागं प्रयागसन्निहितम्। अनुषक्तया संलग्नया मन्दाकिन्या भागीरथ्या पवित्रा मेखला नितम्बो यस्य तम् अचलं पर्वतम्। वृन्दारण्यस्य चित्रकूटस्य संस्थानं रा०. २. ५५. अ०. उक्तम्। उपजुष्टतीर्थं सेविततीर्थम्। गोदावर्याः प्राचेतोदीच्यां दण्डकारण्यमासीज्जनस्थानञ्च तस्याः पूर्वांश इति प्रतिभाति रामायणवर्णनया। सन्निहितः गृध्रराजः जटायुः यस्य तत् जनस्थानं यामः गच्छामः। "अश्रौषं पतितं चार्द्धं जनस्थाने जटायुषम्" इति रा०. ४. ६०. २१.।

दण्डारण्यनगरेन्द्रस्य मध्यायतनवादिना।
भारतेश्वरभट्टेन चारित्रमुज्ज्वलीकृतम्॥

Digitized by Google

अथ पञ्चमोऽङ्कः ।

(1) ततः प्रविशति सम्पातिः ।

सम्पा । (2) नूनमद्य वत्सजटायुरभिवादनाय मलय-कन्दरकुलायमुपसीदति । तथाहि——

(3) पर्य्यायचक्षुष्टष्टनष्टककुभः संवर्त्तविस्तारयो-
र्नीहारीकृतमेघमोचितधुतव्यक्तास्फुरद्विद्युतः ।
आरात्कीर्णखणत्खणीकृतगुरुग्रावोच्चयश्रेणयः
श्येनेयस्य हृहत्पतत्रधुतयः प्रख्यापयन्त्यागमम् ॥ १ ॥

---

(1) जटायुःसम्पाती गरुड़पुत्रौ । यथोक्तं रामायणे "विनतायाः सुतौ राम जज्ञाते गरुडारुणौ ॥ तत्राज्ञातोऽस्मि गरुडात् सम्पातिस्त्वग्रजो मम । जटायुषं तु मां विद्धि श्येनीपुत्रमरिन्दम ॥" इति ।

(2) नूनम् असंशयम् । अनुजत्वात् वत्सजटायुरिति सम्भाषणम् । अभिवादनाय पूजनाय । मलयस्य पर्वतस्य कन्दरे गुहायां कुलायः नीडः मलयकन्दरकुलायः । उपसीदति उपसर्पति । रामायणे विन्ध्य-कन्दराश्रिश्रम उक्तः । तस्य जनस्थानादुत्तरत्वादसम्भवात्र मलयगिरि-रुक्तः । पक्षित्वेन कुलायस्य योजितः ।

(3) संवर्त्तविस्तारयोः आकुञ्चनप्रसारणयोः पर्य्यायेण पर्य्यायक्रमेण क्षणं दृष्टाः क्षणञ्च नष्टाः अदृश्याः ककुभः दिशः यासु ताः । नीहा-रीकृतैः तुषारभावं प्रापितैः मेघैः मोचिताः विसृष्टाः तदनन्तरं धुताः

Digitized by Google

(4) दूरोद्वेल्लितबाड़वस्य जलधेरुल्लोलभिन्नाम्भसो
रन्ध्रैरापतितेन वेगमरुता पातालमाध्मायते।
यद्वैकुण्ठवराहकण्ठकुहरस्फारोच्चरद्भैरव-
ध्वानोद्यण्डमकाण्डकालरजनीपर्जन्यवद्गर्जति ॥ २ ॥

प्रविश्य जटायुः।—

कम्पिताः व्यक्तं स्फुटं स्फुरन्त्यः विद्युतः यासु ताः। आरात् दूरं कीर्णाः विक्षिप्ताः खण्डत्वयोज्झितानां गन्धायितानां गुरूणां महतां आयोऽयानाम् उपलराशीनां पर्वतानामिति यावत् श्रेण्यः याभ्यः ताः। श्येनेयस्य श्येनीपुत्रस्य जटायुषः दृढतोः विशालयोः पतत्रयोः पक्षयोः धुतयः कम्पाः आगमं तस्य आगमनं प्रख्यापयन्ति कथयन्ति।

(4) दूरम् अत्यूर्ध्वम् उद्वेल्लितः उद्भूतः बाडवः और्वानलः यत्र तस्य, उल्लोलैः महातरङ्गैः भिन्नानि भिन्नितानि अम्भांसि जलानि यस्य तस्य, जलधेः सप्तस्य रन्ध्रैः आपतितेन वेगमरुता जटायुषो वेग-भिन्नेन वायुना पातालम् आध्मायते स्फीतीक्रियते। यत् वायुपूरितं पातालं वैकुण्ठवराहस्य भगवतो विष्णोः वराहावतारस्य कण्ठकुहरात् कन्दरसदृशात् महाकण्ठात् स्फारं विपुलम् उच्चरत् उद्गीर्यमाणं भैरवं भीषणं ध्वानं ध्वनिरिव उद्यण्डम् उद्यम् अकाण्डे अकाले काल-रजन्यां प्रलयकालीनरात्रौ पर्जन्यवत् मेघ इव गर्जति। "एवं संस्तू-यमानस्तु पृथिव्यां पृथिवीधरः। वामस्वरध्वनिः श्रीमान् जगर्ज परि-घर्घरम् ॥ ततः सप्तत्वमित्य धरां खदंष्ट्रया महावराहः स्फुटपद्म-लोचनः। रसातलादुत्पतता सहस्रिभः सुरस्तुतो नील इवाचलो महान् ॥" इति वि०. १, ४, २५—२६.।

Digitized by Google

(5) कावेरीवलयितमेखलस्य सानौ-
वेकस्मिन् मलयगिरेर्दिवः पतामि ।
यत्रार्य्यो निवसति काश्यपः शकुन्तः
शैलेन्द्रोऽपर इव विप्रयुक्तपक्षः ॥ ३ ॥
(6) विस्रंसयन्ती परिगृह्य पक्षौ
जाता ममाप्युत्पतनश्रमार्त्तिः ।
शक्तिर्हि कालस्य विभोर्जराख्या
शक्त्यन्तराणां प्रतिबन्धहेतुः ॥ ४ ॥

---

(5) कावेर्या वलयिता वलयाकारेण परिगता मेखला नितम्बो यस्य तस्य मलयगिरेः । नीलगिरिरेव मलयाचल इत्यत्राभिधीयते । एकस्मिन् सानौ प्रस्थे दिवः नभसः पतामि । अपरः अन्यः शैलेन्द्रः महापर्वतः इव विप्रयुक्तपक्षः विनष्टपक्षः (५. ८. टीका) आर्यः महाप्रजः काश्यपः कश्यपसन्तानः शकुन्तः पक्षी सम्पातिः यत्र निवसति । कश्यपो हि सम्पातिजनकस्य गरुडस्य भारतानुसारेण पिता (१. १६. अ०.) रामायणानुसारेण च नातामहीप्रसविता (रा०. ३. २०. अ०.) । पुरा किल पर्वताः पक्षवन्त आसन्, संरब्धेन वलभिदा वज्रेण पक्षाश्छिन्ना इति पौराणिकी कथात्र बीजता ।

(6) परिगृह्य अभिभूय पक्षौ विस्रंसयन्ती शिथिलीकुर्वन्ती ममापि महाबलशालिनोऽपि उत्पतनस्य उड्डयनस्य श्रमेण आयासेन आर्तिः खेदः जाता । विभोः प्रभविष्णोः कालस्य जराख्या शक्तिः हि शक्त्यन्तराणाम् अन्येषां शक्तीनां प्रतिबन्धहेतुः । जरया सर्वाः शक्तयो निरुध्यन्ते । अतो ममापि खेदः सङ्गात इति भावः ।

Digitized by Google

(7) तदयमार्यो मन्वन्तरपुराणगर्भराजः सम्पातिः । अहो भ्रातृस्नेहः ।

(8) पुरा कल्पे दूरोत्पतनखुरलीकेलिजनिता-
दतिप्रत्यासङ्गात् परितपति गात्राणि तपने ।
अवष्टभ्यासौ मामुपरिततपत्रः शिशुरिति
स्वपक्षाभ्यां श्लेषाद्विकलमरचत् करुणया ॥ ५ ॥

---

(7) मन्वन्तरेषु पुराणः दृष्टः मन्वन्तरपुराणः कल्पादौ जात इति भावः । कल्पस्याऽऽदावित्यादिश्लोकेन स्फुटीकृतमेतत् । "षष्टिवर्षसहस्राणि मम जातस्य रावण । पितृपैतामहं राज्यं यथावदनुशाधि तः ॥" इति (रा० ३. ५२. २६.) सीताहरणे जटायुवाक्यं श्रुत्वा तस्य सम्पातेश्च त्रेतायुगान्ते जातत्वं रामायणसम्मतमित्याकलयामः । कविना तु तयोः कल्पपोङ्गूतिं लक्ष्मीकृत्य मन्वन्तरपुराण इत्युक्तम् ।

(8) पुरा कल्पे आदिकाले दूरं यत् उत्पतनम् उड्डयनं तस्य खुरल्या अभ्यासेन या केलिः विनोदः तज्जनितात् अतिप्रत्यासङ्गात् औद्धत्यात् सूर्यमण्डलसमीपगमनादिति भावः मम गात्राणि अवयवान् परितपति दहति तपने सूर्ये असौ सम्पातिः शिशुरिति मम शिशुत्वात् करुणया दयया अवष्टभ्य सदर्पम् उपरि ततो विस्तृतौ पक्षौ येन स तत् श्लेषात् दाहात् मामु अविकलं समग्रम् अरचत् । "अहं पुरा जटायुश्च भ्रातरौ रूढयौवनौ । बलेन दर्पितावावां वज्रजिज्ञासया खगौ । सूर्यमण्डलपर्यन्तं गन्तुमुत्पतितौ मदात् ॥ वज्रयोजनसाहस्रं गतौ तत्र प्रतापितः । जटायुषं परित्रातुं पक्षैराच्छाद्य मोहितः ॥ स्खलितोऽहं रश्मिभिर्दग्धपक्षोऽस्मिन् विन्ध्यमूर्धनि । पतितो दूरपतनात् मूर्च्छितोऽहं कपीश्वराः ॥" इत्यध्यात्मरामायणम् ।

Digitized by Google

उपेत्य । (9) आर्य्य काश्यप ! त्वां जटायुरभिवादयते ।

सम्पा । एह्येहि वत्स !

(10) त्वया पुत्रवती श्येनी गृध्राणां चक्रवर्त्तिना ।
गरुत्मतेव वीरेण विनता न: पितामही ॥ ६ ॥

(11) परिष्वज्य । वत्स जटायो ! अपि कालविप्रकर्षान्मन्दी-भूतः पितृमरणशोको रामभद्रस्य ।

जटा । (12) तस्य विद्यातपोबलसंयोगः स्वा च धीरता ।
न्याय्यो रक्षाधिकारश्च दौर्मनस्यं व्यपोहति ॥ ७ ॥

सम्पा । (13) बलैर्विराधमांसानां गृध्रैरावेदितं हि मे ।
चित्रकूटाश्रया रामः शरभङ्गाश्रमं गतः ॥ ८ ॥
तदा च शरभङ्गेन हव्यवाहे हुता तनुः ।
अथोपसेदिवान् रामः सुतीक्ष्णादीन् मुनीनपि ॥ ९ ॥

---

(9) काश्यप कश्यपोद्भव । ५. ५. टीका ।

(10) चक्रवर्त्तिना अधिराजेन । गरुत्मता गरुडेन । ५. १. टीका ।

(11) कालस्य विप्रकर्षात् दूरत्वात् दीर्घकालत्वात् बन्धुदिवसव्यपगमा-दिति भावः । मन्दीभूतः मन्दभूतः । पितुः दशरथस्य मरणात् शोकः ।

(12) विद्यायां तपसि च इह्याः विद्यातपोधना इत्यर्थः । तैः सह तस्य संयोगः सङ्गः, स्वा निजस्य च धीरता धैर्यं, न्याय्यः उचितः च रक्षाधिकारः राजसादिबन्धेन प्रजापालनाधिकारः दौर्मनस्यं विषादं व्यपोहति दूरीकरोति ।

(13) विराधमांसानां तृप्तैः रामविनाशितस्य (रा०. ३. ८.) विरा-

Digitized by Google

जटा । वाढम् । अधुनागस्त्यवचनाद्रामः पञ्चवट्यां प्रतिवसति ।

सम्पा । (14) चिरात् श्रुत्वा । आः अस्ति जनस्थाने पञ्चवटी नाम गोदावरीतटोद्देशः । वत्स जटायो ! विषयबाहुल्यं कालविप्रकर्षश्च नः स्मृतिं मुष्णाति ।

(15) कल्पस्यादौ मम परिचयस्तावदासीदुदस्याद्
यावद्विष्णोरुपरि चरणश्चारुगङ्गापताकः ।
पर्य्यन्तेष्वप्यवधिवलयस्तेजसां यावदृद्धि-
र्लोकालोकः परिकलयिता सप्तमस्याम्बुराशेः ॥ १० ॥

धराक्षसक्ष मांसपूरितोदरैः । "अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा" इत्यादिस्थलेषु तृप्तेन षष्ठीप्रयोगो दृश्यते । स्टप्रैः मे मह्यम् आवेदितम् । यथा रामः चित्रकूटात् पर्वतात् शरभङ्गस्य मुनेः आश्रमं गतः । तदा तेन कृव्यवाहे अग्नौ तनुः शरीरं हुता । यदुक्तं रामायणे "ततोऽग्निं स समाधाय हुत्वा चाज्येन मन्त्रवत् । शरभङ्गस्तपःसिद्धः प्रविवेश हुताशनम् ॥" इति ३. ६. ३१ । तदनन्तरं रामः सुतीक्ष्णादीन् उपसेदिवान् प्राप । ३. ११. अ० ।

(14) गोदावरीतटोद्देशः गोदावरीतटस्थः प्रदेशः । स्मृतिं मुष्णाति विस्मारयति ।

(15) कल्पस्य आदौ प्रारम्भे मम परिचयः विज्ञानं तावत् आसीत् यावत् विष्णोः त्रिविक्रमस्य वामनस्य चरणः पादः चारुः गङ्गा आकाशगङ्गा एव पताका यस्य स सन् उपरि ऊर्ध्वम् उदस्थात् उत्थितवान् । बलिच्छलनाय वामनेन द्वितीयेन पादेन नभ आचक्रमे इति भा०, ८. २०.

Digitized by Google

जटा । (16) तचैकदा रघुनन्दनं दृषयन्ती शूर्पणखा प्राप्ता ।

सम्पा । अहो निर्मर्यादता !

(17) अनेकयुगजीविन्यास्तेता यस्यास्त्रयोदशी ।
सा क्षीरकण्ठं तं वत्सं लज्जयन्ती न लज्जिता ॥ ११ ॥

जटा । (18) तस्यास्य कर्णनासौष्ठकर्त्तनेन न्यवीविशत् ।
दशाननतिरस्कारप्रशस्तिमिव लक्ष्मणः ॥ १२ ॥

अध्याये द्रष्टव्यम् । तत्र च दिव्यसरिदस्य पताका बभूवेति कवेरभिप्रायः । पर्वतेषु प्रान्तेषु यावत् सप्तमस्य अम्बुराशेः जलघेः खादूदकस्य सप्तद्वीपस्य परिकलयिता परिगन्ता सीमेति भावः तेजसाम् आलोकानाम् अवधिवलयः बलयाकारः अन्तः अद्रिः पर्वतः लोक्यते पार्श्वेन न लोक्यते च पार्श्वान्तरेणेति लोकालोकः । समग्रे द्यावापृथिव्यौ मम परिचित आत्मानमिति भावः । "खादूदकस्य परतो दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चना भूमिः सर्वजन्तुविवर्जिता ॥ लोकालोकस्तथा शैलो योजनाऽयुतविस्तृतः । ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् ॥" इति वि०. २. ४. ९४–९६. ।

(16) दूषयन्ती कामयन्ती । "अन्यदूषयोर्मैथुनेच्छायां क्यच्" इति दीक्षितः ।

(17) तेता यस्या त्रयोदशी परिणाम इति भावः । न लज्जिता निर्लज्जा । क्षीरकण्ठं शिशुम् ।

(18) "इत्युक्तो लक्ष्मणः क्रुद्धस्तस्य रामस्य पश्यतः । खड्गेन तस्याश्चिच्छेद कर्णनासां निरागसम् ॥" इति रा०. ३. २४. २१. ।

Digitized by Google

अब्रवा । (19) तन्निमित्तकस्तर्हि कश्चिदनुबन्धः परैरभियोगः ?

अटा । बाढम् । एकेनैव च रामभद्रेण

(20) चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।
त्रयश्च दूषणखरत्रिमूर्धानो मृधे हताः ॥ १२ ॥

दशाननस्य रावणस्य तिरस्कारस्य प्रशस्तिं कीर्त्तिम् इव व्यधीवियत् निवेशयामास तामिति शेषः ।

(19) तर्हि तदा । परैः शत्रुभिः राक्षसैः अभियोगः अवस्कन्दः अनुबन्धः आसक्तः ।

(20) दूषणश्च खरश्च त्रिमूर्धा त्रिशिराश्च दूषणखरत्रिमूर्धानः मृधे युद्धे हताः । खरः शूर्पणखायाः मातृष्वसेयो भ्राता दण्डकारण्यरक्षिता, रा०. ७. २४. २७. । तन्मूलनायको दूषणः, रा०. ३. २८. १७. । तदनुचरत्रिशिराः, रा०. ३. २९. ३२. । प्रावेश रा०. ३. ४०. १०. श्लोकस्य प्रथमार्द्धस्य संवादितयाऽस्य श्लोकस्य पूर्वार्द्धं केचिदुत्तरचरितप्रकाशकाः "चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्" इति पठन्ति । तत्र सङ्कटं यतो रामायणे चतुर्दशाधिकचतुर्दशसहस्राणां राक्षसानां वध उक्तः । यथा प्रथमतः शूर्पणखोत्तेजितः रामलक्ष्मणसीतावधाय "चतुर्दश निशाचरान् । आदिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥" ३. २५. २०. । रामबाणैः "शोणिताक्तां महाकायां विगतैरसुभिस्ततः । चतुर्दश निपेतुस्ते घोरभिन्ना निशाचराः ॥" ३. २६. २१. । ततो "राक्षसानां सघोराणां सहस्राणि चतुर्दश । निर्यातानि जनस्थानात् खरस्य वशवर्त्तिनाम् ॥" ३. २८. २८. । तानि च "चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् । हतान्येकेन रामेण मानुषेण पदातिना ॥" इति ३. ३२. ३४. ।

सम्पा। (21) आश्चर्यम्! अथवा नाश्चर्यमेतद्दाशरथौ। महत् पुनरपाहृतं वैरहारमिति मन्यमानः संप्रमुग्धोऽस्मि। तद्वत्स जटायो! नास्मिन्नवसरे सीतारामलक्ष्मणास्त्वया क्षणमपि मोक्तव्याः।

(22) स्वसुः सोदर्य्यायाः कथमिव निकारं दशमुख-
स्तथा भूयोभूयः स्वजनविनिपातं च सहते।
मदान्धो मायावी प्रभुरमितवीर्य्योऽन्तिकचरः
सपत्नः कष्टं नो निपुणमनुपाल्या हि शिशवः॥ १७॥

(23) अहमपि समुद्रे कृताह्निकः शिवतातिपरिक्षतिमनु-
ध्यास्यामि। [इति निष्क्रान्तः।

---

(21) महत् वैरहारम् अपाहृतम् उड्डाटितमिति विचिन्त्य आकुलितोऽस्मि। मोक्तव्याः एकाकिनः परित्याज्याः।

(22) सोदर्य्यायाः सहोदरायाः स्वसुः भगिन्याः शूर्पणखायाः निकारम् अपमानं विरूपणमिति भावः। तथा भूयोभूयः वारं वारं स्वजनानां राक्षसानां विनिपातं वधं च दशमुखः रावणः कथमपि सहते? सपत्नः शत्रुः रावणः मदान्धः मदोन्मत्तः मायावी मायाविष्टः प्रभुः समर्थः अमितवीर्यः अनन्यसन्निसम्भवः अन्तिकचरः समीपचारी। कष्टं नः अस्माकम्। हि यतः शिशवः रामादयः निपुणं कौशलेन अनुपाल्याः रक्षितव्याः।

(23) कृतम् आह्निकं दिनकृत्यं येन सः। शिवतातिपरिक्षतिं कल्याणवर्धनमघमर्षणम् अनुध्यास्यामि जपामि। "उत्याय पुनरेत्य

Digitized by Google

अटा । उत्पत्य, गगनगमनमभिनीय ।

(24) एषोऽहं प्रलयमरुत्प्रचण्डरंहः-
संक्षिप्तप्रथिम पिवन्निवान्तरिक्षम् ।
क्षेपीयो मलयगिरेर्निवासभूमेः
संसक्तक्षितिरुहजालमभ्युपेतः ॥ १५ ॥

(25) अयमविरलानोकहनिवहनिरन्तरस्निग्धनिर्मलपरिसरारण्यपरिणद्धगोदावरीसुखरकन्दरः सततमभिष्यन्दमानमेघमेदुरितस्निग्धोज्ज्वलनीलिमा जनस्थानमध्यदेशगो गिरिः प्रस्रवणो नाम । इयं च पञ्चवटी । विभाव्य । अये—

यत्वादप्यहं निमज्ज्य वै । मन्त्ररत्नं निवारन्तु जपेद्ध्यायन् सनातनम् ॥" इति हारीतः ।

(24) प्रलयमरुत्प्रचण्डस्य मरुतः वायोरिव प्रचण्डेन उग्रेण रंहसा वेगेन संक्षिप्तः सङ्कोचितः प्रथिमता विशालता यस्य तत् अन्तरीक्षं नभः पिबन् इव क्षेपीयः अतिक्षिप्रं मलयगिरेः मलयाचलात् निवासभूमेः अवस्थानमहीधरे संसक्तं लग्नं क्षितिरुहजालं वृक्षसमूहः यस्य तत् यथा तथा अभ्युपेतः आगतः ।

(25) अविरलानां निबिडानाम् अशोकहानां वृक्षाणां निवहैः समूहैः निरन्तरम् अविच्छिन्नं स्निग्धेन निर्मलेन च परिसरारण्येन उपान्तवनेन परिणद्धया परिक्षिप्तया गोदावर्या सुखराः श्रुतसुखकराः कन्दराः गुहाः यस्य सः । अभिष्यन्दमानैः अतिरिच्यमानैः मेघैः मेदुरितः स्निग्धीकृतः नीलिमा नीलवर्णत्वं यस्य सः । जनस्थानस्य मध्यदेशगः मध्यस्थितः । " मध्यदेशगः" इत्यत्र " मध्यगः " इति "निर्ण-

(26) *दूरं कृतश्चित्रमृगेण राम-
स्तया दिशा गच्छति लक्ष्मणोऽपि ।
ततः परिव्राडुटजं प्रविष्टो
धिग् व्यक्तरूपो दशकन्धरोऽयम् ॥ १६ ॥

प्रमादः । (27) †परःसहस्रैरायुक्तं पिशाचवदनैः खरैः ।
‡रथं वधूटीमारोप्य पापः क्वाप्येष गच्छति ॥ १७ ॥

---

* नीती दूरं कनकहरिणच्छद्मना रामभद्रः,
पश्चादेनं द्रुतमनुसरत्येष वत्सः कनिष्ठः ।
विश्वद्विश्यत् प्रविशति ततः पर्णशालाञ्च भिक्षुः,
धिक् कष्टं भोः प्रथयति निजामाकृतिं रावणोऽयम् । अ०. रा०. ५. ७. ।

† पिशाचवदनैर्युक्तं खरैः कनकभूषणैः । रा०. ३. ३९. ७ ।

‡ रथमारोप्य वैदेहीमेष पापः क्व गच्छति । अ०. रा०. ५. ८. ।

खपरिसरः..." इत्यत्र च "नीलपरिसर..." इति पाठान्तरचरित-सङ्गतौ । पूर्वघटस्य 'राजमन्त्री'त्यस्मिन्हितांशः प्रस्रवणगिरिरिति तर्क-धामः ।

(26) चित्रमृगेण कैतवेन रौप्यविन्दुखचितेन (रा०. ३. ४८. अ०.) कनकेन रामः दूरं कृतः आनीतः (५० अ०) । "तया पदमनुप्राप्तं कुपितो राघवानुजः । जगाम वन रामोऽसौ सीतां त्यक्त्वा महावने ॥ ...एतदन्तरमासाद्य दशग्रीवः प्रतापवान् । अभिचक्राम वैदेहीं परि-व्राट् रूपेण तदा ॥" ५२. १–४ । परिव्राट् भिक्षुः । उटजं रामस्य पर्णशालाम् । दशकन्धरः रावणः ।

(27) परःसहस्रैः सहस्राधिकैः खरैः अनुचरैः । वधूटीं सीतां रथं आरोप्य । विजनताहिकर्मकलम् ।

Digitized by Google

पौलस्त्य पौलस्त्य !

(28) धर्त्तारः प्रलयेषु ये भगवतो वेदस्य विश्वेश्वरा-
स्तेषामन्वयसम्भवस्य भवतः, स्नातस्य वेदव्रतैः।
जेतुर्नैर्ऋतसङ्घनोऽपि, तपसा दृप्तस्य, रात्रेः सुतो,
निन्द्या दुश्चरिता च नाभिजननी जाता कथं दुर्मतिः॥ १८॥

(29) कथमवज्ञया न शृणोतीव ? आः ! दुरात्मन् ! नैर्ऋता-
पसद ! तिष्ठ तिष्ठ—

तुण्डप्रोतशिरःकरोटिशिखराकृष्टिस्फुरत्प्रस्फुट-
स्नोमग्रीवयलद्गतोष्णरुधिरस्रायून्नजालस्य ते।

---

(28) ये भगवतो विश्वेश्वराः जगदीशाः प्रलयेषु वेदस्य धर्त्तारः रक्षितारः। तेषाम् अन्वयसम्भवस्य वंशोद्भवस्य पितामहप्रपौत्रस्य भवतः वेदव्रतैः स्नातस्य वैदिकानुष्ठानाभिज्ञस्य। अतो वेदविरुद्धं परस्त्रीहरणं विशेषेण विगर्हितमिति भावः। रावणः किल तपस्यया पितामहमतो-षयत् (रा०. ७. १०. अ०.)। तस्मात्त्र वैदिकानुष्ठानानि ज्ञातवान्। उपपञ्च-मतस्तस्य वेदव्रतैः स्नातस्येति विशेषणम्। नितलसङ्घानां पाताललिवासि-नाम् अधिपतिः नैर्ऋतसङ्घा यमः तस्मादपि जेतुः विजयिनः (रा०. ७. २१.—२. अ०.)। अतश्चौरिकया परस्त्रीहरणमतिनिन्द्यमिति भावः। तपसा दृप्तस्य अवलिप्तस्य, सतो रात्रेः कथं निन्द्या दुश्चरिता दुराचारा च नाभिजननी कलङ्ककरी दुर्मतिः जाता।

(29) निर्ऋतिरकल्याणं येषां ते नैर्ऋताः राक्षसाः। तेषाम् अपसद अधम। तुण्डेन मुखेन प्रोतायाः सम्बद्धायाः शिरसः करोट्याः अस्थ्नः शिखरस्य अग्रभागस्य आकृष्ट्या आकर्षणेन स्फुरन्ति चञ्चलानि

Digitized by Google

अत्युग्रक्रकचप्रचण्डनखरोत्कृत्तक्षणत्कीकसै-
रङ्गैः खण्डितकण्डराधमनिभिः श्येनोसुतस्तृप्यतु ॥१९॥

[निष्क्रान्तः ।

[इति विष्कम्भकः ।

प्रविश्य उच्चैः । (30) हा !—आर्य्य ! क्वासि ? कष्टं दशाविपाकमनुभवत्यार्य्यो मारीचात् ।

एष मूर्त्त इव क्रोधः शोकाग्निरिव जङ्गमः ।
कच्छाद्विभर्त्ति दुःखेक्ष्वाखासंवेगिनीं तनुम् ॥ २० ॥

तथाहि ।—

प्रस्फुटानि विस्मराणि क्रोधमूर्त्तेरयङ्गमानि तेषु स्थितानि उष्णानि रुधिराणि रक्तानि स्रायवः अन्त्रजालानि जालरूपाणि अन्त्राणि च यस्य तस्य ते अत्युग्राः अतितीक्ष्णाः क्रकचाः करपत्र इव ये मम प्रचण्डाः नखराः नखाः तैः उत्कृत्तानि छिन्नानि क्वथन्ति रवन्ति कीकसानि अस्थीनि येषां तैः खण्डिताः शकलिताः कण्डराः महत्यः स्नायवः धमन्यः (१. ४४. टीका) । नाड्यश्च येषां तैः अङ्गैः श्येनोसुतः तृप्यतु अहं तृप्तिं गच्छानि (५. १. टीका) कण्डरेत्यत्र कन्धरेति क्वचित्पाठः ।

(30) दशाविपाकम् अवस्थापरिणामं दुरवस्थामिति भावः । मारीचात् मारीचमायया सीताहरणेन । एष मूर्तः मूर्तिमान् क्रोध इव । जङ्गमः चलतः शोकाग्निरिव दुःखेक्ष्वानां दुःखस्यूनां स्वाखानां संवेगः भवः यस्यामस्तां तनुं देहं कच्छात् कष्टेन बिभर्त्ति वहति । "स्वाखा" इत्यत्र "खच्चा" इति लिपिदोषेण पठितम् ।

Digitized by Google

(31) आभुग्नभ्रुकुटीविटङ्कघटनासंसूचिताम्तःस्फुर-
द्धैर्यस्खलितदुर्व्यवस्थवितताप्रोच्चण्डकोपानलः ।
धूमावलिरुद्धसामिव निधिर्मध्यज्वलद्बाडवो
विद्युद्रञ्जितवज्रगर्भजलदच्छायां समालम्बते ॥ २१ ॥

ततः प्रविशति रामः ।

रामः ।—

(32) न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्खन्दते,
घोरेऽस्मिंस्तमसीव मज्जति मनः संमीलितं लज्जया ।
श्लोकस्तातविपत्तिजो दहति मां नास्त्येव यस्मिन् क्रिया,
मर्म्माणीव पुनर्भिनत्ति करुणा सीतां वराकीं प्रति ॥ २२ ॥

---

(31) आभुग्नयोः आकुञ्चितयोः भ्रुवोः कुटी गर्तः भ्रुभङ्गः विटङ्कः कपोतपालिका इव तस्य घटनया करणेन संसूचितः प्रकाशितः किन्तु अन्तर् मनसि स्फुरता धैर्येण स्खलितः निरुद्धप्रसरः दुर्व्यवस्थं निरतिशयं विततः विस्तृतः प्रोच्चण्डः उग्रः कोपानलः क्रोधाग्निः यस्य स रामः । उद्गता धूमावलिः यस्मात् सः, मध्ये ज्वलत् वाडवः वाडवानलः यस्य सः, अम्भसां जलानां निधिः समुद्र इव विद्युता आङ्कितं खचितं वज्रं गर्भे अभ्यन्तरे यस्य तस्य जलदस्य मेघस्य छायां कान्तिं समालम्बते ।

(32) न्यक्कारः सीताहरणरूपापमानना वज्रनिर्मितः कीलः इव मम हृदि हृदये तीव्रं तीक्ष्णं परिस्खन्दते चरति । तीव्र इति पाठे तीव्रो न्यक्कारः । लज्जया सङ्कोचितं सङ्कोचितं किंकर्तव्यतामूढमिति भावः मनः घोरे अग्रे तमसि महान्धकारे मज्जति इव । तातस्य दशरथस्य

वक्ष्य। (33) आर्य्य आर्य्य! न खलु लोकोत्तरकर्म्माण-स्वादृशः प्रसुह्यन्ति जन्तुषु।

रामः। वत्स! लोकोत्तरायैव कर्म्मणि रामस्व।

(34) यैर्गुप्तान्यकुतोभयानि भुवनान्यासन्, महाभीशव-स्ते सूर्य्यान्वयकेतवो नृपतयः पूर्वे तिरस्कारिताः।
कक्षान्तेष्वपि यः स्थितः स गमितः साधुर्जटायुर्दिवं,
पत्नीं हारयता वने यदकृतं लोकैः कृतं तन्मया ॥२३॥

हा!—तात, काश्यप, अकुन्तराज! क्व पुनस्त्वादृशस्य महतस्तीर्थभूतस्य साधोः सम्भवः?

विपत्तिजः मरणजनितः शोकः मां दहति। यस्मिन् क्रिया प्रतिक्रिया नास्ति एव। वराकीं दीनां सीतां प्रति कृत्वा दत्वा पुनः मम मर्माणि भिनत्ति विदारयति एव।

(33) लोकोत्तराणि असामान्यानि कर्माणि येषां ते। त्वादृशः भवादृशाः। जन्तुषु व्यसनेषु। प्रसुह्यन्ति संमूढा भवन्ति।

(34) यैः क्षत्रपतिभिः गुप्तानि रक्षितानि भुवनानि अकुतोभयानि निर्भयानि आसन्। ते सूर्य्यान्वयकेतवः सूर्यवंशप्रदीपाः पूर्वे अतिक्रान्ताः महान्तः अभीशवः रश्मयः येषां ते महोज्ज्वलाः क्षत्रपतयः तिरस्कारिताः अवमानिताः। कक्षान्तेषु अपि यः स्थितः स विगतजीवितः स साधुः जटायुः दिवं स्वर्गं गमितः प्रापितः। मदर्थं रावणेन युद्धं कृत्वा विनष्ट इति भावः। रा०. ३. ५१—२. अ०। लोकैः मनुष्यैः यत् न कृतं वने पत्नीं सीतां हारयता मया तत् कृतम्। अनेन दोषेण रावणः सीतां अहारेति भावः। तात पितृसख। यथोक्तं जटायुषा रामाय "मां विद्धि वयस्यं पितुरात्मनः" इति २०. २.। अकुन्तराज पक्षिप्रधान। तीर्थभूतस्य तीर्थ-

वज्र । (35) पश्यामीव तां पश्चिमामवस्थां तातस्य—

*यामोषधिमिवायुष्मन् विचिनोषि वने वने ।

सा सीता मम च प्राणा रावणेनोभयं हृतम् ॥ २४ ॥

इत्येतदेवाभिधाय वीरलोकमधिष्ठितस्तातः ।

रामः । (36) वत्स वत्स ! हृदयमर्माविधः खल्वमी कथोद्घाताः ।

वज्र । अतस्तं तस्मिन् दुरात्मनि सर्वप्रकारेण वैरानृण्यमुपगच्छावः ।

रामः । (37) अथ किम् । किं हि नामैतत् करिष्यते, यदेतावतः परिभवातिप्रसङ्गस्य तुल्यं स्यात् ?

प्रागेव राक्षसवधाय मतिः स्थिता मे,

बध्या हि ते बहुभिरेव यतो निमित्तैः ।

---

* यामोषधिमिवायुष्मन् विचिनोषिवनात्मज [महावने, बु०. स०.]

सा सीता मम च प्राणा रावणेनोभयं हृतम् ॥ रा०. ३. ७२. १६. ।

वत्सावनस्य । सत्त्वः उत्पत्तिः । त्वादृशा धर्मचारिणः पृथिव्यां विरला इति भावः ।

(35) तातस्य जटायुषः पश्चिमां मरणकालीनाम् अवस्थां दशाम् । पश्यामीव साक्षे वर्तत इव । विचिनोषि अन्विष्यसि । अभिधाय उक्त्वा । वीराणां लोकं भुवनम् अधिष्ठितः गतः मृत इति भावः ।

(36) कथायाः उद्घाताः उद्गाराः । दुरात्मनि रावणे । वैरानृण्यम् उपगच्छावः वैरनिर्यातनं कुर्वः ।

(37) परिभवातिप्रसङ्गस्य भर्त्सनमानस्य । प्राक् पूर्वम् एव राक्षसवधाय मे मतिः स्थिता आसीत् । यतो बहुभिरेव निमित्तैः कारणैः

Digitized by Google

तन्मात्रके त्विह कृतेऽपि कृतः श्रमो मे,
कृत्यं कुलस्य कदनं, परतश्च नान्यत् ॥ २५ ॥

तथापि वत्स !—

(38) प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखः
पिबन्निव मुहुर्मुहुर्भ्रुकुटिति मन्युरुच्चैर्ज्वलन् ।
शिखाभिरिव निस्सरन्ननुपलब्धदाह्यान्तरः,
पयोधिमिव वाडवो दहति मामतस्त्वायताम् ॥ २६ ॥

वङ्गा । (39) एतान्यतिसंभ्रान्तविविधमृगयूथान्युन्मत्त-चण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराण्यरण्यानि दक्षिणां दिशमभिवर्त्तन्ते तदेभिरेव पथिभिर्भवान् ।

ते वध्याः । दृढ तन्मात्रके क्षतेऽपि केवलरावणनिधनेऽपि कृतो मे श्रमः यात्निः । कुलस्य सर्वस्य तद्दंशस्य कदनं विनाशनं कृत्यं करणीयम् । परतः पश्चात् च न अन्यत् करणीयम् । "कदनात्" इति पाठे कदनात्परतश्च नाऽन्यत् कृत्यमित्यन्वयः ।

(38) प्रचण्डः उग्रः परिपिण्डितः पिण्डीभूतश्च प्रचण्डपरिपिण्डितः, स्तिमिता स्थिरा वृत्तिः चेष्टितं यस्य सः, अन्तर् अभ्यन्तरे सुखं यस्य सः, मन्युः क्रोधः, भ्रुकुटिति सपदि पिबन् मां शोषयन् इव सञ्जृम्भ-मुखः उच्चैः ज्वलन्, अनुपलब्धम् अप्राप्तं दाह्यम् अन्तरम् अवकाशो येन सः, शिखाभिः ज्वालाभिः इव निस्सरन् निष्क्रामन् वाडवः पयोधिं समुद्रमिव मां दहति । अतः त्वावता रक्ष दाक्षादिति शेषः ।

(39) अतिसम्भ्रान्तानि विविधानां वनानां मृगाणां यूथानि येषु तानि । उन्मत्तैः चण्डैः श्वापदकुलैः हिंस्रपशुभिः आक्रान्तानि सेवितानि

Digitized by Google

रामः । (40) अदृष्टपूर्वाः खल्वमी जनस्थानविभागाः ।

लक्ष्म । (41) ननु तदेव तातमारुणिं गृध्रराजमग्निसात्कृत्य निर्गतयोः पञ्चवटाश्रमादावयोः कोऽपि कालो वर्त्तते, यदा दूरविच्छिन्नाः सम्प्रति जनस्थानसीमानः । यथा चैतान्यग्रतः प्रतिभयजननान्यरण्यानि तथा नूनमसौ जनस्थानपश्चिमः कुञ्जवान् नाम दनुकबन्धाधिष्ठितो दण्डकारण्यविभागः ।

रामः । (42) द्रष्टव्य एव स दुरात्मा कान्तारमण्डूकः ।

विकटानि विपुलानि गिरिगह्वराणि येषु तानि । दक्षिणां दिशम् अभिवर्तन्ते दक्षिणाभिमुखानि ।

(40) जनस्थानस्य विभागाः अंशाः पूर्वं पञ्चवटीनिवासे न दृष्टाः ।

(41) तातं पितृसखम् आरुणिम् अरुणभ्रातुष्पुत्रं (५. १. टीका) गृध्रराजं जटायुषम् अग्निसात्कृत्य दग्ध्वा । "एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम् । ददाह रामो धर्मात्मा पतगेन्द्रं जटायुषम् ।" रा०. ७१. ३७. । निर्गतयोर्दीर्घकालोऽतीतः । अधुनाऽऽवां जनस्थानात् सुदूरमागतौ । प्रतिभयजननानि भीषणानि । "ततः शून्यं जनस्थानं परित्यज्य महाबलौ । अन्वेषमाणौ तौ सीतां जग्मतुः पश्चिमां दिशम् ॥... ततः परं जनस्थानात् क्रोशत्रयमतीत्य वै । क्रौञ्चारण्यं [क्रौञ्चारण्यं, बु०. स०.] विविशतुः गहनं वनमोजसा [तौ महौजसौ, बु०. स०.] ॥ .....अथ तत्र महाघोरं विद्रुतं तं महोच्छ्रयम् । विद्रुमशिरोग्रीवं कबन्धसदृशं सुखम् ॥ ....." इति ७४. २. ७. १४. । श्रीकण्ठवर्णनया क्रौञ्चारण्यमित्यत्र कुञ्जवन्नमित्यपि पाठ आसीदिति वयं सम्भावयामः ।

(42) कान्तारस्य दुर्गप्रदेशस्य अरण्यस्येति भावः मण्डूकः भेक

नेपथ्ये । कः कोऽत्र भोः ? परित्रायतां परित्रायताम-
नेन दुरात्मना राक्षसकबन्धेनाक्रम्यमाणामरण्ये स्त्रियम् ।
(43) अहं हि श्रमणा नाम सिद्धा श्रवरतापसी ।
मतङ्गाश्रमवास्तव्या रामान्वेषिण्युपागता ॥ २७ ॥
रामः । वत्स लक्ष्मण ! गच्छ गच्छ ।
लक्ष्म । एष गतोऽस्मि । [इति निष्क्रान्तः ।

रामः । (44) प्रिये ! हाहा !—क्वासि, प्रकिर मधुरां वाचमथवा
पराभूतैरित्थं विलपनविनोदोऽप्यसुलभः ।
अनिन्द्यः पौलस्त्यो व्रजतु, परिवादो मयि पुन-
र्गतो रूढे वैरे बहुगुणमनेन प्रविकृतम् ॥ २८ ॥

दूव । यथा भेका जलाशयं न त्यजन्ति तथैव कबन्धोऽरण्यमेतच्च जहा-
ति । यथा रामायणे तदुक्तिः "सोऽहं भुजाभ्यां दीर्घाभ्यामाक्रम्याऽस्मि-
न्महावने । गजान् दृप्तान् मृगान्दृप्तान् भक्षयामि समन्ततः ॥" इति
३.७५.१२. ।

(43) मतङ्गाश्रमवास्तव्या मतङ्गवनवासिनी । श्रवरतापसी तापसी
श्रवरी । रा०. ३. ७६–७७. अ०. ।

(44) क्व कुत्र असि वर्तसे ? मधुरां वाचं प्रकिर विसर्जय वदेति
भावः । अथवा इत्थम् ईदृशं पराभूतैः व्यक्लृप्तैः प्राणैः विलपनेन क्रन्द-
नेन विनोदः शोकापनयनम् अपि असुलभः दुर्लभः । पौलस्त्यो रावणः
अनिन्द्यः व्रजतु गच्छतु, न तं किञ्चिदहमीति भावः । पुनः किन्तु रूढे
प्रवृद्धे वैरे बहुगुणम् अनेन प्रविकृतं हिंसितम् इति परिवादः कौत्सीनं
मयि गतः संक्रान्तः ।

Digitized by Google

ततः प्रविशति लक्ष्मणः श्रमणा च ।

लक्ष्म । (45) तत् क्रूरदन्तकरपत्रनिकृत्तसख्य-
सङ्घातनिःसरदसृक्प्लुतकूर्चगुच्छम् ।
वक्त्रं वपुश्च विकटाकृति दीर्घबाहो-
रार्य्येण राक्षसकुतूहलिना न दृष्टम् ॥ २९ ॥

आर्ये श्रमणे ! अयमार्थः—

श्रमणा । जयति जयति देवः ।

रामः । अथास्मत्पर्य्यन्वेषणे किं प्रयोजनम् ?

श्रम । (46) शृणोषि रावणानुजं विभीषणम् ?

रामः । कस्तं न शृणोति ?

श्रम । स च दैवाद्यदैव खरदूषणप्रभृतयो निहतास्तदैव बन्धुभ्यः कस्यापि हेतोः परिक्रम्य सुग्रीवसख्याद्दृष्यमूके वर्त्तते तस्यायमात्मसमर्पितो लेखः । [इति लेखमर्पयति ।

लक्ष्म । गृहीत्वा वाचयति । स्वस्ति रामदेवं प्रणम्य विभीषणो विज्ञापयति—

---

(45) राक्षसविषये कुतूहलिना कौतुकवता आर्येण रामेण दीर्घबाहोः (५५. टीका) कबन्धस्य क्रूरैः कर्कशैः दन्तैः एव करपत्रेण क्रकचेन निकृत्तेभ्यः छिन्नेभ्यः सत्वानां प्राणिनां संघातेभ्यः समूहेभ्यः निःसरद्भिः निर्गच्छद्भिः असृग्भिः रक्तैः प्लुतं स्नातं कूर्चगुच्छः श्मश्रुकलापः यस्य तत् वक्त्रं मुखं विकटाकृति बीभत्सदर्शनं वपुश्च (५७. टीका) न दृष्टम् ।

(46) किं विभीषणस्य नाम श्रुतवानसि ?

Digitized by Google

(47) विश्लिष्टभागधेयानां हवी नः परमा गतिः ।
धर्म्मः प्रक्षय्यमाणो वा गोप्ता धर्म्मस्य वा भवान् ॥ ३० ॥

रामः । (48) वत्स! ब्रूहि किं प्रतिसंदिश्यतामेवंवादिनः प्रियसुहृदो लङ्केश्वरस्य तत्रभवतो महाराजविभीषणस्य ।

अज्ञा । यदा लङ्केश्वरः प्रियसुहृदित्युत्तमार्य्येण तत् किमवशिष्यते सन्देश्यस्य ।

रामः । यथाह सौमित्रिः ।

अज्ञा । अनुगृहीताः स्मः ।

अज्ञा । (49) आर्य्ये अमणे! कथय विभीषणसम्पर्कादस्ति कापिदार्य्यायाः प्रवृत्तिः ।

अज्ञा । (50) वर्त्तमाने नास्ति । यदा पुनर्दुरात्मना राक्षसापसदेनापक्रियमाणायाः स्वस्तमनसूयानामाङ्गुलीयम्, तच्च तैर्गृहीतम् ।

---

(47) विश्लिष्टानि वियुक्तानि भागधेयानि येषां तेषां दुर्भाग्यानां नः अस्माकं हवी परमा गतिः आश्रयस्थानं—प्रक्षय्यमाणः क्षयतो धर्म्मो वा धर्म्मस्य गोप्ता रक्षिता भवान् वा ।

(48) किं प्रतिसन्दिश्यतां कः प्रतिसन्देयः प्रेष्यतां किमुत्तरं दीयतामित्यर्थः ।

(49) सम्पर्कात् सम्बन्धात् प्रवृत्तादिति भावः । आर्य्यायाः सीतायाः प्रवृत्तिः वार्त्ता ।

(50) अनसूयायाः "वासाङ्गरागस्य भूषणानि खलु तथा ।

Digitized by Google

रामः। हा प्रिये महारण्यवासप्रियसखि विदेहराजनन्दिनि! [इति संवरणं नाटयति।

लक्ष्म। आर्य्य! केन कस्य वा हेतोस्तदृग्गृहीतम्।

अज। ऋष्यमूके रामगुणपक्षपातात् सुग्रीवविभीषणहनूमत्प्रभृतिभिः।

रामः। (51) द्रष्टव्या हि निष्कारणप्रियकारिणो भुवनमहनीयमहिमानस्ते महात्मानः, तच्च सीतावासस्रुतमभिज्ञानम्। तदृष्यमूकमभिसन्धाय तावदच्छावः।

अज। इत इतस्तर्हि देवः। [इति परिक्रामति।

लक्ष्म। (52) हनूमानिति महानेष वीरवादः। तत्र-

मैथिली प्रतिजग्राह प्रीतिदायमनुत्तमम्॥" रा°. २. १. २१.। "ह्रियमाणा तु वैदेही क्वचिन्नाथमपश्यती। ददर्श गिरिशृङ्गस्थान् पञ्च वानरपुङ्गवान्॥ तेषां मध्ये... । उत्तरीयं वरारोहा शुभान्याभरणानि च॥ सुमोच....." ६°. ५—७.। अतोऽनसूयानामाङ्कमुत्तरीयमित्युक्तम्। स्रस्तं पतितम्। राक्षसापसदेन राक्षसाधमेन रावणेन। तैः वानरैः।

(51) निष्कारणं स्वत एव प्रियकारिणः उपकर्त्तारः। भुवने महनीयः पूजनीयः महिमा औदार्यं येषां ते। सीतावासस्रुतं सीतावसनपतितम्। अभिज्ञायतेऽनेन इति अभिज्ञानं चिह्नम्। ऋष्यमूकम् अभिसन्धाय तत् पर्वताभिमुखम्।

(52) वीर इति वादः उक्तिः वीरवादः। सप्तदृभ्राताः संघो-

Digitized by Google

भवतो जातमात्रस्य तस्य समुद्भान्तदेवासुराण्यद्भुतोदाहरणान्यनुसूयन्ते । अपिच किल ।

यद्वज्रकर्षणे वीर्य्यं, या वायौ वा समुन्नतिः ।
यद्बालिनि महाबाहौ, तच्च वीरे हनूमति ॥ ३१ ॥

अम । (53) एवमीदृशो हेमगिरिवास्तव्यस्य तत्रभवतः प्लवङ्गपुङ्गवानीकवृन्दयूथपतेः केसरिणः क्षेत्रसम्भवः सूनुराञ्जनेयो हनूमान्नाम । यस्य रेतोधाः पिता भगवान् मातरिश्वा । तत् किं हनूमतैकेन ।

(54) अम्भोधेर्नालिकेलीरसमिव चुलुकैरञ्जुलुम्यन्त्यपो ये

भिताः देवासुराः यैः तानि अद्भुतानि उदाहरणानि कर्माणि । जातमात्रो हि हनूमान् पक्वफलबोधाद्दयन्नं भास्करं गृहीतुमुत्पपाते-त्यादि रा०. ७. ३५. अ०. पठ्यते । वज्रं कर्षतीति वज्रकर्षश्च इन्द्रः । प्रमत्तो यद्वायौ वा समुन्नतिरिति पाठः । यद्वायौ वा समुन्नत इति पाठोऽपि अमः ।

(53) "ऋर्यदृक्षवरस्वर्क्षः सुमेरुर्नाम पर्वतः । यत्र राज्यं प्रशास्यैष केसरी नाम वै पिता ॥ तस्य भार्या बभूवेष्टा ह्यञ्जनेति परिश्रुता । जनयामास तस्यां वै वायुरात्मजमुत्तमम् ॥" इति रा०. ७. ३५. १६-२०. । हेमगिरिवास्तव्यस्य स्वर्णमयसुमेरुपर्वतनिवासिनः । प्लवङ्गपुङ्गवानां वानरवर्याणाम् अनीकस्य बलानां वृन्दस्य यूथपतेः अधिपस्य । क्षेत्रे भार्यायां सम्भवः उत्पत्तिः यस्य स सूनुः नन्दनः । आञ्जनेयः अञ्जनागर्भजः । मातरिश्वा वायुः । रेतोधाः शुक्रनिधाता ।

(54) ये अम्भोधेः समुद्रस्य अपः जलानि नारिकेलीरसमिव नारि-

Digitized by Google

येषामुत्क्षेपहेतुः शिखरिषु लिकुचोदुम्बरप्राय एषु ।
ब्रह्मस्तम्बं निवासद्रुममिव रभसाद्विप्रकर्त्तुं क्षमा ये
तेषां कोटयोऽप्यसंख्याः सुतममरपतेर्वानराणां नमन्ति ॥३२॥

रामः । आर्य्ये हन्त दृष्टिखेन सुमहानग्निसञ्चयः । तत् किमेतत् ?

अप । (55) लक्ष्मणकुमारेण तस्य योजनबाहोश्चितेयमभिकृष्टा ।

रामः । साधु साधु कृतम् ।

लक्ष्म । आर्य्य ! पश्य पश्य ।

केतफलसमध्यस्थिता अप इव चुलुकैः गण्डूषैः उच्चुलुम्पन्ति निपिबन्ति । येषां एषु शिखरिषु विषवेषु उत्क्षेपहेतुः उदसनफलं लिकुचोदुम्बरप्रायः लिकुचोदुम्बरफलसदृशः । ये पर्वतानेतान् लिकुचोदुम्बरवदुत्क्षिपन्तीति भावः । एषिल्लकैष इति पाठो न मनोरमः । ये रभसात् औत्सुक्यात् ब्रह्मस्तम्बं ब्रह्मणः निवासद्रुममिव वासवृक्षमिव विप्रकर्त्तुं नाशयितुमिति भावः क्षमाः समर्थाः । तेषां वानराणाम् असंख्याः कोट्यः अपि अमरपतेः इन्द्रस्य सुतं वालिनं नमन्ति तदायत्ताः ।

(55) योजनबाहोः योजनायतभुजस्य कबन्धस्य । यदुक्तं कबन्धेन "एवमुक्तो मया शक्रो बाहू योजनमायतौ । प्रादाद्दक्षिणे चास्यं मे तीक्ष्णदंष्ट्रमिदं महत् ॥" रा०. ३. ७५. २१. । अभिकृष्टा कृता । "कबन्धमवटे कृत्वा चक्रतुस्तौ चितां ततः ॥ लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः । चितामादीपयामास प्रजज्वाल च सर्वशः । तच्छरीरं कबन्धस्य हतपिण्डोपमं महत् । मेदसः पच्यमानस्य मन्दं दहति पावकः ॥" इति रा०. ३. ७५. ५०–५२. ।

Digitized by Google

(56) सौहित्यात् पृथवः क्वथन्ति रुधिरोत्सेकाश्चमत्कारिण-
ष्टाङ्कारोत्कटमुत्कटन्ति नलकास्त्वङ्मांसविस्रंसनात् ।
उत्सर्पन्त्यथ मेदसां विकलनादुद्बुद्बुदा वीचय-
श्चित्रं चित्रमुदेति कोऽप्ययमितो दिव्यः श्मशानालयात् ॥३१॥

प्रविश्य दिव्यपुरुषः । जयति जजति रामदेवः ।

(57) "दनुर्नाम श्रियः पुत्रः शापाद्राक्षसतां गतः ।" रा०. ४. २. १४.
इन्द्रास्त्रक्षतकाबन्ध्यः पूतोऽस्मि भवतां श्रयात् ॥ ३४ ॥

रामः । प्रियं नः प्रियम् ।

---

(56) सौहित्यात् उचितसंयोगात् पृथवः विशालाः चमत्कारिणः विस्मयकराः रुधिरस्य रक्तस्य उत्सेकाः उद्रेकाः क्वथन्ति बुद्बुदायन्ते । त्वचः चर्मणः मांसस्य च विस्रंसनात् विगलनात् नलकाः दीर्घास्थीनि टाङ्कारेण 'टां टां' इति शब्देन उत्कटं प्रचण्डम् उत्कटन्ति उद्गच्छन्ति । नलशब्दस्य पुंलिङ्गत्वात् पाणिनिनाऽस्थिवाचकानां नपुंसकत्वाऽनिर्देशाद्दोषो नलकस्य पुंलिङ्गप्रयोगः । अथ मेदसां वसानां विकलनात् विगमात् उद्बुद्बुदाः वीचयः तरङ्गाः उत्सर्पन्ति । चित्रं चित्रं महदाश्चर्यं कोऽपि दिव्यः पुरुषः इतः श्मशानालयात् उदेति उत्तिष्ठति ।

(57) "श्रियो मां मध्यमं पुत्रं दनुं नाम्ना च दानवम् । इन्द्रकोपादिदं रूपं प्राप्तवन्तमवेहि च ॥ अहं हि तपसोग्रेण पितामहमतोषयम् । दीर्घमायुः स मे प्रादात् ततोऽहं पूर्णमानसः ॥...रक्षे यज्ञमधर्षयम् ॥ तस्य बाहुप्रसक्तेन वज्रेण शतपर्वणा । सक्थिनी मे शिरश्चैव शरीरे सन्निवेशितम् ॥" इति रा०. ३. ७५. २४–२७ ।

Digitized by Google

दक्षः । (58) माल्यवत्प्रयुक्तेन च मया युष्मदासादनाय दूषितमरक्षमासीत् । अलं वा तत्कालकाश्मलस्मरणेन । सम्प्रति तु युष्मत्प्रभावात् प्रहृष्टसहजज्योतिषः परोक्षमिव वस्तु किञ्चिदत्र प्रतिभाति । तच्च वः प्रतिबोधनाय ज्ञातमहोपकारेभ्यः कथ्यते ।

प्रार्थ्य माल्यवता बाली युष्मद्घाते नियुज्यते ।
तेनापि रावणे मैत्रीमनुरुध्य व्यपेक्ष्यते ॥ ३५ ॥

राघवः । (59) एष एव पन्थाश्चारित्रस्थानाम् ।

न तादृशः सुहृत्कार्ये माध्यस्थ्यमवलम्बते ।
ममाप्यस्मिन्महावीरे सोत्कण्ठमिव मानसम् ॥ ३६ ॥

इन्द्राग्नेव वज्रेण ज्ञातं कावन्ध्यं शिरोहीनत्वं यस्य सोऽहं भवतां त्रयात् त्रायात् पूतोऽस्मि ।

(58) माल्यवता प्रयुक्तेन व्यापारितेन । युष्मदासादनाय भवत्प्राप्तये भवद्विनाशायेति भावः । काश्मलं कालुष्यं पापमिति यावत् । प्रहृष्टं रूढं सहजं स्वाभाविकं दिव्यमिति भावः ज्योतिः यस्य तस्य अधिगतपूर्वदिव्यत्वस्य । प्रतिबोधनाय अभिज्ञापनाय । ज्ञातो महोपकारः मोक्षः यैः तेभ्यः । पूज्यार्थे बहुवचनम् । युष्मद्घाते भवद्वधाय । तेन वालिना अपि रावणे मैत्रीं सौहार्दम् अनुरुध्य अनुरुध्य (६२. टीका) व्यपेक्ष्यते प्रतिपाल्यते युष्मद्घात इति शेषः ।

(59) चारित्रे तिष्ठतीति चारित्रस्थः सहृत्तः । तादृशः लोकः सुहृदां कार्ये माध्यस्थ्यम् औदासीन्यं न अवलम्बते न आश्रयति । अहमपि तं वालिं द्रष्टुमुत्सुकः ।

Digitized by Google

इतरे । (60) क्वान्यत्र रामदेवादमून्यस्त्राणि नाम ?

रामः । (61) भद्र, कृतं सौजन्यम् । अधुना नन्द महाभाग स्वेषु लोकेषु ।

दूतः । यथाज्ञापयति । [इति निष्क्रान्तः ।

लक्ष्म । आर्ये वालिरावणयोः किंनिबन्धना मैत्री ?

सीता । (62) कैलासे तुलिते, जिते त्रिभुवने, दृप्यन्तमभ्युद्यतं
दोर्दण्डाय दशास्यमिन्द्रतनयः प्रक्षिप्य कक्षालये ।
साख्यं कर्म समाप्य सप्तसु नदीनाथेष्वथो मुक्तवा-
नुन्मुक्ताय नताय याचितवते सख्यञ्च तस्मै ददौ ॥३७॥

लक्ष्म । (63) दुरात्मन् ! पौलस्त्यकुलपांसन ! एष ते क्षत्रियपरितापिनो वीर्य्यस्योत्कर्षः ।

---

(60) रामभद्रं विहायान्ये वीरसदृशमीदृशं वक्तुं न क्षमाः ।

(61) स्वेषु स्वकीयेषु दिव्येषु लोकेषु भुवनेषु अधुना नन्द चरेति भावः ।

(62) कैलासे पर्वते तुलिते उन्नमिते (रा०. ७. १६. २५.) त्रिभुवने जिते (१८–२९. अ०.) सति दृप्यन्तम् अवलिप्तं दोर्दण्डाय बाहुयुद्धाय अभ्युद्यतम् उत्सुकं दशास्यं दशमुखं रावणम् इन्द्रतनयः वाली कक्षालये गह्वरतुल्ये दरीकक्षे प्रक्षिप्य न्यस्य सप्तसु नदीनाथेषु समुद्रेषु साख्यं कर्म क्षयं समाप्य यथो अनन्तरं मुक्तवान् । उन्मुक्ताय दत्तमोक्षाय नताय नम्राय याचितवते अर्थिने रावणाय सख्यञ्च ददौ । "सोऽहं दृप्तबलस्तुभ्यमिच्छामि रिपुमुद्धव । त्वया सह चिरं सख्यं सुस्निग्धं पावकात्मतः ॥" इति रा०. ७. ३४. ४०. ।

(63) कुलपांसन कुलाङ्गार । क्षत्रियपरितापिनः क्षत्रपरिभाविनः ।

Digitized by Google

रामः । (64) एवमुत्तरोत्तरभावश्चिन्त्यते जीवलोकः ।

लक्ष्म । (65) आर्य्ये पुरत एष ते शुभगिरिः किंनामधेयः ?

अज । (66) नायं गिरिर्मयोराशिरिव वीरस्य बालिनः ।

एष दुन्दुभिदैत्येन्द्रमहिषास्थिसञ्चयः ॥ ३८ ॥

लक्ष्म । (67) उपरुद्धान्यनेन वर्त्मानि, तत्परिहृत्य गच्छामः ।

रामः । नन्वेहि । [पदेन क्षिपति ।

अज । आसर्य्यम् !

---

(64) लक्ष्मणस्यात्रेपोक्तिसमर्थनमेतदुक्तम् । उत्तरात् परात् उत्तरः परः भावः यत्र स जीवानां लोकः भुवनं चिन्त्यते अद्भुतपूर्वः । विजितत्रिभुवनस्य रावणस्यापि भङ्गः न प्रकृतिविरुद्ध इति भावः ।

(65) ते तव पुरतः अग्रतः । किं नामधेयं संज्ञा अस्येति किं-नामधेयः ।

(66) दुन्दुभिदैत्येन्द्रमहिषस्य महिषरूपधरस्य दैत्येन्द्रस्य दान-वाधिपस्य दुन्दुभेः अस्थिसञ्चयः अस्थिराशिः । "आसीन्महासुरः पूर्वं दुन्दुभिर्नाम राघव ।" कदाचिद्वलजिन्मत्तः बालिनं स उपाग-मत् । "धारयन्महिषं रूपं तीक्ष्णशृङ्गो भयावहः । ...स मृदित्वा विषाणाभ्यां दुन्दुभिं दानवर्षभम् । आविध्य बलवान् बाली भूतले निष्पिपेष ह ॥ ..... एतत्तस्यास्थि कायत्स्थ.....गिरिकूटनिभं महत् ॥ अथैवं वदतस्तस्य सुग्रीवस्य महात्मनः । राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन तोलयत् । ... चिक्षेप शतयोजनम् ॥" इति रा०. ४. ६. अ० ।

(67) अनेन अस्थिसञ्चयेन वर्त्मानि उपरुद्धानि निरुद्धाः पन्थानः ।

Digitized by Google

(68) यत् संक्रन्दननन्दनः कपिवृषा निर्मथ्य दोस्तम्भयो-
व्यापारेण निरास्यदास्थितगिरेर्दैवद्विषो दुन्दुभेः ।
तत् कङ्कालमकाण्डपाण्डुरघनप्रस्पर्द्धि कुर्वत् पुनः
पादाकृष्टविवर्त्तनादयमितो निर्बन्ध्यमाविध्यति ॥ ३९ ॥

अरण्य । (69) * प्रशान्तगम्भीरनीलविपुलश्रीररण्यगिरि-
भूमिः प्रसज्यते ।

अम । (70) ऋष्यमूकपम्पापर्य्यन्तभूमयः खल्वेताः । तथा
चाग्रतो मतङ्गाश्रमपदम् । यत्र शून्येऽपि सन्निहितसोमचष-
कविशेषपात्रपरिकरास्तीर्णबर्हिरिध्मवानाज्यगन्धिरद्यापि
भगवान् वैश्वानरः समिध्यते ।

---

* अवकीर्णानि पर्वतैरविरलनिविष्टनीलबहुलच्छायतरुणतरुषण्डमण्डितानि प्रशान्तगम्भीरारण्यानि । उ० च० २. अ० ।

---

(68) संक्रन्दनस्य इन्द्रस्य नन्दनः कपिवृषा कपीन्द्रः वाली आस्थितः आरूढः गिरिः पर्वतः यस्मात् तस्य देवद्विषो दानवस्य दुन्दुभेः यत् कङ्कालं निर्मथ्य दोस्तम्भयोः भुजदण्डयोः व्यापारेण कर्मणा निरास्यत् निक्षिप्तवान् । अस्यतेस्युक् [अङि] पा० ७. ४. १७ । अकाण्डपाण्डुरघनप्रस्पर्द्धि तदाकारं कुर्वत् वर्त्म रोधि तत् कङ्कालम् अयं रामः पुनः पादस्य आकृष्टस्य विवर्त्तनात् परिक्रमेण इतः अस्मात् प्रदेशात् निर्बन्ध्यं सफलम् आविध्यति निरस्यति ।

(69) अरण्यगिरिभूमिः वन्यपार्वतीयप्रदेशः प्रसज्यते संलग्नः ।

(70) "इह ते भवितात्मानो गुरवो मे महाद्युते । अुहावास्मक्रतुवरं मन्त्रवन्मन्त्रकोविदाः ॥ इयं प्रत्यक्षसंवेदी यत्र ते देवसत्क्रियाः । पुष्पोपहारैः प्रणताश्चक्रुरभ्युद्यतैः करैः ॥ तेषां तपःप्रभावेण

रामः । (71) अचिन्त्यसमुदयस्तपसां विशेषाः ।

अज । देव ! पश्य पश्य ।

(72) इह समदशकुन्ताक्रान्तवानीरमुक्त-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनसुखरभूरिस्रोतसो निर्झरिण्यः ॥ ४० ॥

अपिच ।

पश्चाऽद्याऽपि रघूत्तम । न स्त्रायन्ति न शुष्यन्ति कुसुमानि कुशास्तथा ॥" इति रा०. २. ७७. २२–२४ । मूले निर्जनेऽपि यत्र मतङ्गवने अद्याऽपि सन्निहिताः सोमचषकाः सोमरसपानपात्राणि विशेषपात्राणां परिकरः स्रुक्स्रुवादयः आहवनीयाः वह्नयः कुशाः च यस्य सः दुग्धशान् काष्ठयुक्तः आज्यमन्त्रैः हुतमन्त्रैः वैश्वानरः समिध्यते ज्वलति ।

(71) अचिन्त्याः अप्रमेयाः समुदयः ऐश्वर्याणि येषां ते तपसां विशेषाः महातापसाः ।

(72) इह अत्र प्रदेशे समदैः मत्तैः शकुन्तैः पक्षिभिः आक्रान्तेभ्यः अधिष्ठितेभ्यः वानीरेभ्यः वेतसेभ्यः मुक्तैः पतितैः प्रसवैः फलैः सुरभीणि सुगन्धानि शीतानि शीतलानि स्वच्छानि निर्मलानि तोयानि जलानि यासां ताः । तथा फलानां भरपरिणामेन अतिशयपाकेन श्यामानां कृष्णानां जम्बूनां जम्बुवृक्षाणां निकुञ्जेषु स्खलनेन पतनेन सुखराणि कलकलायितानि भूरीणि महान्ति स्रोतांसि प्रवाहाः यासां ताः निर्झरिण्यः गिरिनद्यः वहन्ति स्रवन्ति । 'मुक्त' इत्यत्र 'शीकृत्' इत्युत्तरचरितसम्मतः पाठः ।

Digitized by Google

(73) दधति *कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्थानमम्बूकृतानि ।
शिशिरकटुकषायः स्थायते गन्धकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ ४१ ॥

लक्ष्म । (74) तत् किमभित एव प्रवृद्धपौरस्त्यमारुतविहन्यमानकदम्बानि काननानि संगलितवाष्पपटलया दृशा परिक्षिप्य धनुरवष्टभ्य धीरचरितगरीरेणार्थ्येण सपदि स्थीयते ।

त्रप । वत्स ! किं न पश्यसि ?

---

* कुहरविहरमाणप्रौढभल्लूकढिक्का । अ० रा० ५. २ ।

---

(73) अत्र कुहरभाजां विलवासिनां भल्लूकयूनां तरुणभल्लूकानाम् अनुरसितेन गुरूणि गम्भीराणि अम्बूकृतानि निष्ठीवनयुक्ताः गन्धाः स्थानं संहतिं दधति धारयन्ति । तथा गन्धकीनां वृक्षविशेषाणां शिशिरः शीतलः कटुः उग्रः कषायः सुरभिः दृभैः गजैः दलितानां भग्नानां विकीर्णानां विक्षिप्तानां ग्रन्थीनां निष्यन्दस्य रसस्रवस्य गन्धः स्थायते वितन्यते ।

(74) प्रवृद्धेन पौरस्त्येन प्राच्येन मारुतेन वायुना विहन्यमानाः ताड्यमानाः कदम्बाः येषु तानि काननानि वनानि संगलितं चरितं वाष्पपटलं नयनविन्दवः यस्याः तया दृशा परिक्षिप्य तेषु दृशं निक्षिप्येति भावः धनुः अवष्टभ्य स्टहीत्वा । सपदि तत्क्षणात् स्थीयते गतिभङ्गः क्रियते ।

Digitized by Google

(75) स्थितमुपनतजृम्भागर्भविम्बैः कदम्बैः,
श्रुतमतिकलकण्ठैस्ताण्डवं नीलकण्ठैः ।
उपरि विघटमानप्रौढतापिञ्छनीलः
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥ ४२ ॥

लक्ष्म । खगतम् । अपि नामायमार्यः केनचिद्रसान्तरेण विक्षिप्यते ।

नेपथ्ये । मातामह, निवर्त्तस्व, निवर्त्तस्व ।

(76) त्वन्नियोगादयुक्तोऽपि बधः साधोः करिष्यते ।
पूज्योऽपि ननु मित्रस्य यो गुरुर्गुरुरेव सः ॥ ४३ ॥

लक्ष्म । आर्य्ये ! कोऽयम् ?

अज । देव ! पश्य पश्य ।

---

(75) कदम्बैः वृक्षैः उपनता प्राप्ता जृम्भा विकाशः गर्भस्थेषु विम्बेषु प्ररूढेषु येषां तैः स्थितम् । विकसत्प्रसवाः कदम्बा इति भावः । अतिकलकण्ठैः मनोहरनिनादैः नीलकण्ठैः मयूरैः ताण्डवं नृत्यं कृतम् । उपरि ऊर्ध्वं विघटमानं प्रफुल्लत् प्रौढं प्रवृद्धं तापिञ्छं तमालपुष्पम् इव नीलः नूतनः तोयवाहः मेघः अद्रेः पर्वतस्य शिखरं श्रयति । अतो रामस्य प्रियाविरहचिन्तानुवेधो युक्तः । यदुक्तं मेघदूते "मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेष-प्रणयिनि जने किं पुनर्दूरसंस्थे" इति २. । वर्षागमे सुग्रीवसख्यिल-नमनुस्मरन्त्रियं वर्षारम्भवर्णना कृता ।

(76) मित्रस्य रावणस्य मातामहत्वेन पूज्यत्वात्त्वं ममाऽपि पूज्यः । अतस्त्वादेशेनाऽनुचितमपि रामनिधनं करोमि । कविना क्षुण्णमेतत् ।

Digitized by Google

(77) बिभ्राणश्चारु चामीकरकमलमयं दाम दत्तं मघोना
पिङ्गेनाङ्गेन सन्ध्याच्छुरित इव महानम्बुवाहस्तडित्वान्।
उत्पातावित्रमूर्त्तेर्दधदुपरि गिरेर्गैरिकाङ्गस्य लक्ष्मी-
मन्तः सीमन्तरेखामिव वियति जवादिन्द्रसूनुस्तनोति ॥४४॥

अन्वयः। (78) आर्य्य आर्य्य! दिष्ट्या प्रायः स वीरगोष्ठी-
दानप्रियसुहृन्माघवतः।

रामः। खगतम्। महावीरः सः।

तत प्रविशति वाली।

वाली।

(79) लोकालोकालवालस्खलनपरिलसत्सप्तमाम्भोधिपूरं
विस्मित्थत्पूर्वकल्पत्रिभुवनमखिलोत्खातपातालमूलम्।

---

(77) चारु मनोहरं मघोना इन्द्रेण दत्तं चामीकरकमलमयं हैमपद्मनिर्मितं दाम मालां (रा०. ४. ६. ७४.) बिभ्राणः दधत्, पिङ्गेन पिङ्गलेन अङ्गेन सन्ध्यया छुरितः स्निग्धः तडित्वान् विद्युत्वान् महान् अम्बुवाहः मेघ इव, उत्पातेन उत्पतनेन आविद्धा सङ्कोचिता मूर्त्तिः यस्य तस्य गैरिकाङ्गस्य धातुमयस्य गिरेः उपरि लक्ष्मीं शोभां दधत्, इन्द्रसूनुः वाली जवात् वेगेन अन्तः मध्ये वियति नभसि नभोमध्य इति भावः सीमन्तरेखां केशान्तर्गतरेखाम् इव तनोति विस्तारयति द्रुतगमनेन रेखामिव जनयतीति भावः।

(78) मघवतः इन्द्रस्य तनयः माघवतो वाली। यथा प्रायशः माघवगोष्ठीदानप्रियस्तथा स महावीरो युद्धदानप्रिय इति वाक्यार्थः।

(79) लोकालोकालवालस्य खलनेन भ्रंशेन परिलसन् विस-

Digitized by Google

पर्य्यस्तादित्यचन्द्रस्रवकमवपतद्भूरितारा प्रसूनं
ब्रह्मस्तम्बं लुनीयामिह हि मम विधावस्ति तीव्रो विषादः ॥४५॥

(80) एवं नामायुक्तमनुरुध्यमानाः पुमांसो महत्यायुक्तगह्वरे पात्यन्ते । यदनेन माल्यवता पौलस्त्यमैत्रीदिवसमनुस्मार्य तत्रभवतो रघुध्वजस्य निधने नियुक्तोऽस्मि । अहो ग्रहः । प्रातरारभ्य मामनुबध्नन् किञ्चिन्न्यायाः प्रख्याप्य संप्रति निहन्तः । कष्टं भोः कष्टम् ।

(81) दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते,
धर्म्मात्मन्यतिथौ निजानपि जगत्पूज्ये ग्रहानागते ।

र्यनं यन्त्रनस्य अम्भोधेः सलिलस्य पूरः जलौघः यत्र तत् यथा तथा । मयाखवाखेन इन्द्रमूलनिक्षिप्तजलानि निरुध्यन्ते तद्व्योमाको कपर्वतेन खादूदको निरुद्धः (५. १५. टीका) । विच्छिद्यत् विवुद्धानं पूर्वस्य अतीतस्य कल्पस्य निर्भुवनं यत्र तत् यथा तथा, अखिलं निःशेषेण उत्खातम् उत्पाटितं पातालम् एव मूलं यस्य तत् यथा तथा पर्यस्तौ विच्छिन्नौ आदित्यचन्द्रौ एव स्रवकौ गुच्छौ यस्य तत् यथा तथा । अवपतन्ति परिस्रवमाणानि भूरीणि बहूनि तारानक्षत्राणि एव प्रसूनानि पुष्पाणि यस्य तत् यथा तथा । "तारा: स्त्रपुष्पाणि" इति नैघण्टुकः । अहमेवं ब्रह्मस्तम्बम् लुनीयाम् उच्छेत्तुं शक्नोमि । "शकि लिङ् च" पा०. ३. ३. १७२. इति शक्यार्थे लिङ् । किन्तु हि निश्चितम् इह विधौ कर्मणि रामनिधने मम तीव्रो विषादः अस्ति यतोऽयुक्तमेतदिति भावः ।

(80) अयुक्तगह्वरे गर्तरूपेऽयुक्तकर्मणि ।

(81) मायाविभिः मायाकुशलैः अरिभिः शत्रुभिः राक्षसैः दौरात्म्यात् दुराचारतया निजार्जवेन स्वकीयया सरलतया शुचौ विशुद्धे

Digitized by Google

एतस्मिन्नुचितं न नाम विहितं, वाचापि नोक्तं प्रियं,
धिक् पापेन मया रिपाविव कथं रामे बधायोद्यमः ॥ ४६ ॥

(82) कथितञ्च सम्प्रत्येवमेव चारकैः विभीषणेन सुग्रीवस्याप्यनाख्याय रामान्तिकं श्रमणा प्रेषिता। प्रतिपन्नलङ्काधिपत्यश्च तस्य दाशरथिरस्मिन् मतङ्गाश्रमोपकण्ठे वर्त्तत इति। भवत्ववतरामि। तथा नाटयति। कः कोऽत्र भोः।

(83) विजितपरशुरामं सत्यधर्म्माभिरामं
गुणनिधिमभिरामं द्रष्टुमभ्यागतोऽस्मि।
भवति च फलवत्ता चक्षुषस्तत्र दृष्टे
भवति च रमणीयो दर्पकण्डूनिकाषः ॥ ४७ ॥

रामः। वत्स सौमित्रे! मामिहस्थमावेदय महाभागाय।

लक्ष्म। उपस्थित। अयमार्य्यस्तिष्ठति तदुपसर्पतु महाभागः।

बाली। अपि त्वं पुनरसौ लक्ष्मणः।

रामे वर्त्तिते सति, जगत्पूज्ये धर्मात्मनि धर्ममये अतिथौ विज्ञानु मदीयान् भ्रष्टान् अपि आगते, एतस्मिन् रामे उचितम् आतिथ्यं न नाम विहितं कृतम्। वाचाऽपि प्रियं मधुरं न उक्तम्। धिक् पापेन दुष्टेन मया रिपौ शत्रौ इव रामे कथं बधाय उद्यमः वधः उद्योगः कृतः।

(82) चारकैः चरैः। प्रतिपन्नं स्वीकृतं लङ्काया आधिपत्यं येन सः। तस्य तस्मै विभीषणाय।

(83) सत्येन धर्मेण च अभिरामं प्रियम् अभिरामं प्रियदर्शनं रामं

वच्म। अथ किम्।

[उभावुपसर्पतः।

वाली। स्वगतम्।

स एष रामश्चरिताभिरामो धर्मैकवीरः पुरुषप्रकाण्डः।
(84) ख्यात्येव पूर्वाणि परैश्चरित्रैर्योऽद्भुतैरप्रतिमोऽतिशेते ॥४८॥

प्रकाशम्। राम!

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
(85) वैदग्ध्यं तु ममापि संप्रति कृतस्त्वद्दर्शने चक्षुषः।
त्वत्साङ्गत्यसुखस्य नास्ति विषयस्तत् किं वृथा व्याहृतै-
रस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम् ॥ ४८ ॥

रामः। दिष्ट्या यदद्य दृष्टस्त्वं सत्यमेतच्च युज्यते।

किं त्वग्रस्थेषु युष्मासु कथं रामोऽस्तु सायुधः ॥ ५० ॥

वाली। विहस्य। भो महाबलिय! किमित्यननुकम्म-
नीयानप्येवमस्माननुकम्पसे।

दृष्टुमागतोऽसि। दर्पस्य कण्डूः कण्डूतेः निकाषः घर्षणं दर्प-कण्डूनिकाषः। तथाहि भाषः "विनोदमिच्छन्नश्च दर्पजन्मनो रणेन कण्डूः" इति।

(84) परैः उत्तरैः चरित्रैः पूर्वाणि अतीतानि चरित्राणि अतिशेते अतिवर्त्तते।

(85) सम्प्रति तद्दर्शने ममापि बधोद्यतस्यापि चक्षुषः कृतः वैदग्ध्यं दृष्टिः भवतीति शेषः। किन्तु तव सङ्गसुखस्य विषयो नास्ति। वृथा व्याहृतैः वाक्यैः किम्। अस्मिन् विश्रुतजामदग्न्यदमने विख्यातवीरस्य भार्गवस्य शासके पाणौ करे धनुः जृम्भतां विकसतु।

Digitized by Google

(86) भ्राता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते,
संयत्तो भव, सत्यमस्ति भवतः, सत्यं मनुष्यो भवान् ।
यज्ञैरव्यवधीयमानविजयाः प्रायो वयं, तेषु चेद्-
आहस्ते, सुखमाश्वसन्ति गिरयो यैर्वानराः यज्ञियाः ॥५१॥
तदितः स्थलीमधितिष्ठाव ।

यज्ञ । (87) आर्य्य ! यथाह महाभागः स्वजातिसमय-व्यवस्थिता युद्धधर्मा इति ।

वालिरामौ । अन्योन्यमुद्दिश्य ।

कामं त्वया सह श्लाघ्यो वीरगोष्ठीमहोत्सवः ।
किं त्विदानीमतिक्रान्ते त्वय्यवीरा वसुन्धरा ॥५२॥

[परिक्रम्य निष्क्रान्तौ ।

---

(86) जगत्सु त्रिभुवनेषु वयं दुन्दुभिर्दमनादिभिः चरितैः भ्राताः ख्याता एव । रा० ४, ८–१० अ० । वाग्भिः किं तुभ्यम् आख्यायते कथ्यते । संयत्तः सज्जो भव । भवतः सत्यमस्ति सत्यप्रियोऽसि । सत्यं भवान् मनुष्यः अतो बहुर्ज्ञातासीति भावः । वयं प्रायः प्रायेण यज्ञैः न व्यवधीयमानः निरुध्यमानः विजयो येषां ते । विना यज्ञैरेवास्माकं प्रायेण जय इति भावः । तेषु यज्ञेषु ते तव चेत् यदि आहः निर्बन्धः स्यात् मया यज्ञभवश्यं यष्टीतव्यमिति यदि तवाभिलाषः, गिरयः पर्वताः उत्पाटनाभावात् सुखम् आश्वसन्ति—ये पर्वताः वानराणां यज्ञम् । स्थलीं समरभूमां भुवम् ।

(87) स्वजात्याः समवेन नियमेन व्यवस्थिताः निर्द्धारिताः ।

Digitized by Google

जक्ष्म । (88) कथमास्फालिते धनुषि कुपितः सांक्रन्दनिः । तथाहि ।

गर्जत्पर्जन्यघोरस्तनितमविरतं तिग्मगम्भीरमन्त-
र्गुञ्जन् गुञ्जाभजृम्भाविहृतमुखविषद्विश्वदिक्चक्रवालः ।
संरम्भोत्तम्भतुङ्गस्खलितविततताडित्पिङ्गलाङ्गूलकेतु-
र्व्यस्तं विस्तार्य दर्पाद्दपिहितगगनोत्सङ्गमङ्गं धुनोति ॥५२॥

नेपथ्ये । विभीषण विभीषण !

(89) आर्यस्य बालिन इव ध्वनिरेष, नूनं
तस्यैव नूतनघनस्तनितप्रचण्डः ।
मौर्वीरवश्च कुत एष भयानकः स्या-
द्व्यापारितं किमु हरेण धनुः पिणाकम् ॥५४॥

---

(88) संक्रन्दनस्य इन्द्रस्य स्नुतुः सांक्रन्दनिः वाली । गर्जत्पर्जन्यः स्फूर्जन्मेघ इव घोरं स्तनितं गर्जनं यस्य तत् यथा तथा अविरतं सततं तिग्मम् उग्रं गम्भीरं मन्द्रं च अन्तर् अभ्यन्तरे गुञ्जति ङकारं कुर्वति गुञ्जाभे गुञ्जाफलवर्णे जृम्भाया व्यादानेन विहृते मुखे विषत् प्रविषत् विश्वदिक्चक्रवालं समस्तदिङ्मण्डलं यस्य सः । अत्र ङकारार्थे गुञ्जत् इति प्रयोगः न समीचीनः । संरम्भेण उत्तम्भेन उच्छ्रयेन तुङ्गम् उच्चैः स्खलितं विततं विस्तृतं तडित्वत् पिङ्गं पिङ्गलं लाङ्गूलम् एव केतुः पताका यस्य सः वाली व्यस्तम् उद्भ्रान्तम् अपिहितः स्थगितः गगनस्य उत्सङ्गः येन तम् अङ्गं दर्पात् विस्तार्य धुनोति संचालयति ।

(89) नूनं निःसन्देहं तस्यैव बालिन एव नूतनस्य अनल्पस्य नेपथ्य

लक्ष्म । आर्ये ! अयं नु कः ?

अन । स एष खलु विभीषणसखः सुग्रीवः सविमर्षसंरम्भं संग्रहारमनुसरति । सर्वे च यूथपतयो गिरिगह्वरेभ्यः संपतन्ति ।

लक्ष्म । तेन हि संप्रति मयाप्यारोपयितव्यं धनुः ।

अन । (90) एष बालिकायदुन्दुभिकरङ्कसप्ततालगिरिमहीतलान्यवदार्य रामतूणीरमधिशयितः शरः ।

नेपथ्ये ।

(91) मद्द्रोहाच्छपथात् प्रसीदतु मतिः पौलस्त्यसुग्रीवयो-
र्हे वीराः कपयः शमोऽस्तु भवतामीशः स एवास्ति चेत् ।
रामात् प्राप्तमहार्घवीरमरणस्याग्रास्तिरेषाद्य मे
योऽहं सूर्यसुतः स एष भवतां, योऽयं स वक्षोऽरुदः ॥ ५५ ॥

ज्ञानितं यद्वद् एव प्रचण्डः एष ध्वनिरिति शेषः । एष भयानकः मौर्वीरवः ज्यानिनादश्च कुतः स्यात् उत्थित इति भावः । किन्तु किं करेण निजश्च पित्र्यश्च धनुः व्यापारितम् आलक्ष्यम् ।

(90) "स विसृष्टो बलवता बाणो हेमपरिष्कृतः । भित्त्वा तालान् गिरिं चैव प्रविवेश रसातलम् ॥ स तु तूणश्च रूपेण तत उत्पत्य सायकः । आजगाम पुनस्तूणं रामस्याक्लिष्टतेजसः ॥" इति रा०. ४, ११. ४—५. । बालिकायं दुन्दुभेर्दानवश्च करङ्कं सप्तं सप्त तालान् तालसदृशान् गिरीन् महीतलं रसातलञ्च अवदार्य भित्त्वा ।

(91) पौलस्त्यश्च विभीषणश्च सुग्रीवश्च मद्द्रोहात् शपथात् मद्विरोधशपथेन मतिः प्रसीदतु प्रसन्ना भवतु । शपितौ स्थः युवां युवं

अङ्क । (92) तदयमनुचरान्नानियन्त्रणोन्मुक्तवीरसमय-सङ्गलसदसद्दुःखनिश्चतैर्यूथपतिभिरार्येण च सपक्षपातवाष्पेण वीक्ष्यमाणः, स्वद्रोहशपथयन्त्रितसग्रीवविभीषणेन याच्यमानशरीरसौष्ठवः, प्रयत्ननिरुद्धनिष्ठुरप्रहारमर्मच्छेद-वेदनावेगः, परिष्वङ्गव्याजविधृतसुग्रीवकण्ठपरिधीकृतस्व-कण्ठकनककमलमालागुणः, शक्रसुतुरस्यामपि दशायां वीरश्रिया प्रदीप्यते ।

ततः प्रविशतः सुग्रीवविभीषणौ बाली रामश्च ।

मा कार्ष्मिति भावः । अङ्गं चेत् यदि स एव पूर्ववत् भवतातीव्रः नाथः अस्ति तदा हे वीराः कपियूथपतयः भवतां शमः शान्तिः अस्तु । अद्य रामात् प्राप्तं महार्घम् अतिपूज्यं वीरस्य मरणं येन तस्य मे मम एषा आशास्तिः युष्मभ्यः उपदेशः । यः यादृशः अङ्गं भवतां नाथ इति भावः एष सूर्यसुतः सुग्रीवः सः तादृशः । यः यादृशः अयं सुग्रीवः सः तादृशः अयं बलवान् मम पुत्रः अङ्गदः ।

(92) अनुचरात्मनः आत्मनया बालिनः "शमोऽस्तु भवताम्" इति आदेशेन यत् नियन्त्रणं प्रतिरोधः तेन उन्मुक्तेन परित्यक्तेन वीराणां समयस्य नियमस्य सङ्गेन युद्धाभिलाषेण इति भावः यत् सदृशं स्फुरत् असह्यं दुःखं तेन निश्चतैः शान्तैः यूथपतिभिः वानराधिपैः आर्येण रामेण सपक्षपातवाष्पेण स्नेहात् वाष्पाकुलदृशा वीक्ष्यमाणः, स्वस्य बालिनः द्रोहात् शपथात् यन्त्रितेन तथा सुग्रीवेण विभीषणेन याच्यमानं शरीरस्य सौष्ठवं शोभा यस्य सः (रा०. ४. २४. १६-) । प्रयत्नेन निरुद्धः निष्ठुरैः प्रहारैः मर्मच्छेदस्य वेदनावेगो येन सः । परिष्वङ्ग-

राम । (93) अप्राकृताभिजनवीर्ययशश्चरित्रान्
पुण्यश्रियः कुलमहीधरभूरिसारान् ।
एवंविधानपि निपात्य कटुर्विपाकः
सर्वङ्कषः कषति, हा विषमः कृतान्तः ॥ ५६ ॥

वाली । (94) वत्स विभीषण ! पश्य पश्य सुष्ठु शोभते वत्स-सुग्रीवस्य वक्षसि सहस्रपुष्करमालागुणः ।

सुग्रीवविभीषणौ । अपवार्य ।

(95) अकाण्डशुष्काग्रनिपातरौद्रः
क एष धातुर्विषमो विवर्त्तः ।

व्याजेन आलिङ्गनव्यपदेशेन विश्लिष्टे स्पष्टीकृते सुग्रीवस्य कण्ठे परिधीकृतः वलयीकृतः स्वकण्ठस्थ इन्द्रदत्तायाः कनककमलानां मालायाः गुच्छो येन स तथोक्तस्तनुः वाली । "इन्द्रदत्तामिमां मालां सुग्रीवः प्रतिपद्यत । प्राप्नोतु हरिराज्यं च त्यक्ष्यामि जीवितं स्वयम् ॥" इति रा०. ४. १६. ५१. ।

(93) अप्राकृतानि असामान्यानि अभिजनवीर्ययशश्चरित्राणि जन्मविक्रमयशश्चरितानि येषां तान् पुण्यश्रियः पवित्रलक्ष्मीकान् कुलमहीधरभूरिसारान् कुलपर्वतान् इव महासारान् एवंविधान् बाल्यादीन् अपि कटुः सर्वङ्कषः विपाकः परिणामः निपात्य कषति निकृन्तयति । हा कृतान्तो विषमः दारुणः ।

(94) सहस्रस्य पुष्कराणां कमलानां मालायाः गुच्छः सहस्रपुष्करमालागुच्छः ।

(95) अकाण्डे अकस्मात् शुष्कस्य अशनेः वज्रस्य पातः पतनम्

Digitized by Google

अस्माभिरार्य्यैः यपथैर्निकृष्टैः
कथं विलङ्घ्यः कथमाश्रितव्यम् ॥ ५७ ॥

वाली। रामभद्र रामभद्र!

रामः। आर्य्य! अयमस्मि।

वाली। (96) यदासन्नं दैवादनभिमतसख्येऽपि हि जने
मया सख्यं प्राणैरपि दृढ इव तस्माद्दमधुना।
यदन्यत् साधूनां तव च गुणराशेः समुचितं
प्रहाणे प्राणानां तदपि हि यथाशक्ति विदधे ॥ ५८ ॥

रामः। सविनयलज्जावशोत्कम्पितशरीरः।

सुग्रीवविभीषणौ। जनान्तिकम्। आर्य्ये अमणे! कथमस्मदादिवाक्षाकं रामदेवादेष दैवविपाकः।

अम। माल्यवता किलैवमिति। [उभयोः कर्णे कथयति।

वाली। वत्स सुग्रीव!

सुग्री। वाष्पस्तम्भं नाटयति।

दृढ दौढ्यः भयानकः कः एष धातुः ईश्वरस्य विषमः दारुणः विपर्ययः विकारः। कथं यमयमनियन्त्रिता वयमार्यवचनसङ्गत्र युद्धं कुर्मः कथं वा विना युद्धेन तिष्ठामः।

(96) यत् सख्यम् अप्रियेऽपि रावणेन मया कृतं, तदर्थं प्राणान् दत्त्वाऽद्य तस्माद्विमुक्तोऽस्मि। मम प्राणानां प्रहाणे त्यागे मरणे इति भावः तत् समुचितं विदधे करोमि।

Digitized by Google

वाली । (97) ननु सुग्रीव आः प्रातिकूलिकः संवृत्तः ।

सुषे । सकरुणम् । आर्य, आर्य प्रसीदाज्ञापय ।

वाली । वत्स ! कथय कस्त्ववाज्ञि ।

सुषे । गुरुः स्वामी च ।

वाली । त्वं तु मम कः ?

सुषे । श्रेष्ठः प्रेष्यश्च ।

वाली । वत्स ! कथय क आवयोरन्योन्यधर्मः ।

सुषे । (98) वश्यित्वं वो वश्यता च मम ।

वाली । तं हस्ते गृहीत्वा । तर्हि दत्तोऽसि रामाय । रामभद्र ! नन्वेष गृह्यताम् ।

रामलक्ष्मणौ । को हि पूज्यस्य गुरोर्वचनं न बहु मन्यते ?

विभी । (99) अहो विस्तरस्थानेऽपि धर्मोपपत्तिविशुद्धः संक्षेपः ।

वाली । (100) वत्स सुग्रीव अथ ब्रह्मपुत्रादाचार्याज्जाम्बवतः अधीतधर्मपारायणवचनेन कौटश्यस्तया मैत्रीधर्म आगमितः ।

---

(97) प्रातिकूलिकः अविधेयः । उत्तरदानविलम्बादिदमुक्तं वालिना ।

(98) आवयोः सेव्यसेवकभावः ।

(99) धर्मस्य उपपत्त्या स्वीकारेण विशुद्धः संक्षेपः संक्षिप्तोक्तिः ।

(100) आगमितः यापितः । जाम्बवतो ब्रह्मपुत्रतया धर्मपारायणविज्ञानसत्त्वम् ।

Digitized by Google

सुग्रीवः । (101) प्राणैरपि हिता हृत्तिरद्रोहो व्याजवर्जनम् ।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम् ॥ ५९ ॥

वाली । (102) रामभद्र । तवापि भगवतः सहस्रकिरणान्वयपुरोहिताहस्सिष्ठादेव एव हि संप्रदायः ।

रामः । आर्य ! अथ किम् ।

वाली । (103) तदनेन मैत्रीधर्मेण भवद्भ्रातान्योन्यस्य वर्त्तितव्यम् । मद्गुरोधात् क्रियतामुपनिबन्धः अग्निसाक्षिकश्च । समयो नातिवर्त्तते । संनिहित एवायं मतङ्गयज्ञाग्निः ।

रामसुग्रीवौ । अन्योन्यहस्तग्राहम् ।

पुरो मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः ।
ममेव हृदयं तेऽस्तु तवेव हृदयञ्च मे ॥ ६० ॥

वाली । रामभद्र, अयं च वत्सो विभीषणस्त्वया प्रतिश्रुतलङ्काधिराज्य एव पुरतः श्रमणायाः ।

विभी । सलक्ष्मणमहम् । कथं स्नातोऽस्मि ।

---

(101) प्राणैरपि हिता उपकारिणी हृत्तिः व्यवहारः । प्राणदानेनाऽपि हितं कर्तव्यम् । अद्रोहः अहिंसा व्याजवर्जनं कपटराहित्यम् आत्मनीव प्रियाधानम् आधानं न्यासः एतत् मैत्रीमहाव्रतं सुहृद्धर्मः । 'हिते हृत्तिः' इति क्वचित्पाठः ।

(102) सहस्रकिरणान्वयः सूर्यवंशः । सम्प्रदायः अधिगमः ।

(103) "यदि ते रोचते सख्यं बाहुरेष प्रसारितः । गृह्यतां पाणिना पाणिर्मर्यादां बध्यतां स्थिरा ॥ एतत्तु वचनं श्रुत्वा रामः सुग्रीवभा-

Digitized by Google

श्रमणाश्रमलक्ष्मणौ । (104) अहो चारचक्षुष्मत्ता ।

रामः । अथ किम् ।

विभी । (105) तर्हि प्रसन्नं दैवेन । [इति प्रणमति ।

सुग्री । मयाप्यविदितः श्रमणाश्रमान्तः फलितस्त्विति तर्कितार्थोऽस्मि ।

रामः । (106) हे प्रियसुहृदौ महाराजसुग्रीवविभीषणौ एष वामिदानीं सौमित्रिः ।

लक्ष्म । आर्यौ ! लक्ष्मणोऽभिवादयते ।

उभौ । एह्येहि वत्स । [इत्यालिङ्गतः ।

षितम् । संप्रहृष्टमना हृष्टं पीडयामास पाणिना ॥ ... ततस्तु हनुमान् दृष्ट्वा तयोः सम्बन्धमोषितम् । विधिवत् सोऽथ काष्ठाभ्यां जनयामास पावकम् ॥ ... तमग्निं दीप्यमानन्तु चक्रतुस्तौ प्रदक्षिणम् । सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥" इति रा०. ४. ४. अ०. ।

(104) चारः एव चक्षुः अस्त्यस्तीति चारचक्षुष्मान् तस्य भावः चारचक्षुष्मत्ता । ..."स्वपन्नपि च जागर्त्ति चारचक्षुर्महीपतिः ॥" इति कामन्दकी ।

(105) रामस्य स्वीकारोक्तिं श्रुत्वा स्वकाधिपत्यदानप्रतिज्ञानं परिस्मृत्य विभीषणो वदति । तर्हि तदा दैवेन प्रसन्नं देवो रामो मयि प्रसन्न इति । ततः सुग्रीवो वदति मत्तोऽपि प्रच्छन्नं रामान्तिकं श्रमणाश्रमनं सफलमिति निरूपयामि ।

(106) इदानीं वां युवयोः सौमित्रिः लक्ष्मणः । भवतोः स्वजन इति भावः ।

Digitized by Google

अम। अतिगम्भीरः सरसः स्वीकारः।

बाली। (107) वत्स विभीषण! तवाप्यलमिदानीं स्वार्थशालीनतया एवंपरिणाममेवैतद्वस्तु। रावणो हि नास्मेवेति महत्तान्तेनैव व्याख्यातम्। अपत्यस्नेहसाम्येऽपि पिण्डोपजीविनो विशेषतो रावणहितोपस्थानं धर्मः। स्वयं कथयितुं सम्यग्विभीषणस्य प्रेयसा योग इति मातामहस्य युक्तम्। महान्त एव हि तादृशानामगाधसत्त्वानामविनयपरिस्खन्दितं जानन्ति। प्रचलन्ति हि मे प्राणाः तदवसानप्रपातस्थलमुपनयन्तुमां भवन्तः।

---

(107) स्वार्थे स्वकाराख्यस्वामविषये शालीनतया लज्जया अलम्। एतत् वस्तु एवंपरिणामम् ईदृशं परिणंस्यति तव राज्यलाभो भवितेति भावः। महत्तान्तेनैव महद्वृत्तेनैव रावणस्य वधो दर्शितः। अपत्यस्नेहसाम्येऽपि तुल्येऽपि रावणविभीषणयोः सम्बन्धे रावणस्य पिण्डोपजीविनः सेवकस्य माल्यवतः तस्य हिते दृष्टे विशेषेण उपस्थानं स्थितिः धर्मः। स्वयं सम्यक् यथार्थं कथयितुं विभीषणस्य प्रेयसा प्रियेण रामेण योग इति मातामहस्य युक्तम् उपपत्तिः। हि यतः महान्तः एव अगाधसत्त्वानाम् अमितवीर्याणां रावणस्येति भावः अविनयस्य परिस्खन्दितं जानन्ति। यो रावणगर्वखर्वकारिणं मां हतवान् स रावणं नियतं हनिष्यति। त्वम् अन्तर्भेदजर्जरं राजकुलं निवेदयितुं राममाश्रित इति माल्यवानपि जानाति। अतस्ते निरर्थका लज्जा। रावणदुर्नयफलानि पश्यतापि त्वदपेक्षया तदुपस्थानन्तु सेवकस्य कर्त्तव्यमिति भावः। अवसानप्रपातस्थलम् अन्तकालोचितं गिरिप्रपातम्।

Digitized by Google

नीवप्रभृतयः । (108) हा वीर हा मघवनन्दन मन्दराद्रि-
निष्कम्पसार जगदप्रतिमल्ल वीर ।
उद्दर्पदुन्दुभिनिशुम्भपटुप्रचण्ड-
दोर्दण्डमण्डल गतोऽसि हता हताः स्मः ॥ ६१ ॥

इति रुदद्भिस्तैर्व्याघ्रभाषः परिक्रम्य ।

बाली । भो महात्मानः प्लवङ्गपुङ्गवाः !
(109) सुग्रीवाङ्गदयोः प्रभुत्वमिह यत् सौजन्यमेतद्धि वो-,
मत्प्रीत्यैव तु नावधीर्यमनयोर्यद्वो महिम्नः क्षमम् ।
प्रायः संप्रति रामरावणरणः, स्नेहस्य निर्व्यूढक-
स्तस्मिन्नञ्जलिरेष शान्तमथ वा वीर्येषु वः के वयम् ॥ ६२ ॥

---

(108) मघोनः इन्द्रस्य नन्दन पुत्र । मन्दराद्रिवत् मन्दराचलवत् निष्कम्पसार अचलसामर्थ्य । मन्दरेण सक्षीरो मथितः, वि० १. ९. अ०. । जगति अप्रतिमल्लवीर अद्वितीयशूर । उद्दर्पस्य बलोन्मत्तस्य दुन्दुभेः दानवस्य निशुम्भे प्रमथने पटोः कुशलस्य प्रचण्डस्य दोर्दण्डस्य भुजदण्डस्य मण्डलं चक्रं यस्य तादृश । गतोऽसि मृतोऽसि ।

(109) इह युष्माकं मध्ये सुग्रीवाङ्गदयोः यत् प्रभुत्वम् आधिपत्यम् एतत् हि निश्चितं वः सौजन्यं दाक्षिण्यम् । भवतां स्वीकारावत्तं तत् । मत्प्रीत्यैव ममानुरागेणैव अनयोः न किञ्चित् आवधीर्यम् उपेक्ष्यं यत् भवतां महिम्नः महत्त्वस्य क्षमं सदृशम् । तस्मिन् रणे स्नेहस्य निर्व्यूढकः प्रथयस्वकः एष मे अञ्जलिः । अथवा शान्तं निष्प्रयोजनो ममाञ्जलिबन्धः युष्माकं वीर्ये वयं के न गणनीया इति भावः ।

Digitized by Google

किञ्च ।

(110) कर्णावर्जितदिङ्मतङ्गजयुगह्रेपमर्दाय ते
पुच्छास्फोटदलत्समुद्रविवरैः पातालभम्याश्च ताः ।
कापेयस्य च पौरुषस्य च तथा प्रेम्णो गरिम्णश्च य-
द्दोष्णामुन्मथितद्विषां सुसदृशं तन्मा स्म वो विस्मरत् ॥ ६२ ॥

[इति निष्क्रान्ताः सर्वे ।

इति महावीरचरिते आरण्यकं नाम पञ्चमोऽङ्कः ।

---

(110) ते प्रसिद्धाः कर्णैः आवर्जितानाम् आनमितानां दिग्मतङ्गजानां युगहन्वेन हनुयुग्मेन उपमर्दाः पीडनानि । पुच्छानां वालधीनाम् आस्फोटेन आस्फालनेन दलतः दीर्यमाणस्य समुद्रस्य विवरैः रन्ध्रैः ताः पातालभम्याः पातालं प्रति सम्पदाः । "क्षोभयेयुश्च सहसा गम्भीरान् सलिलाशयान् । मत्स्यकूर्मवराहांश्च भक्षान् प्रजनितान् वने ॥" इत्यादि रा०. १. २०. अ०. वर्णनां परिदृश्यैषाऽतिशयोक्तिः कृता । कापेयस्य कपीनां पौरुषस्य वीर्यस्य तथा प्रेम्णः प्रणयस्य गरिम्णः गुरुत्वस्य गाढानुरागस्येति भावः यत् उन्मथिताः हिंसाः मथिताः यैः तेषां दोष्णां भुजानां सुसदृशं समुचितं पौरुषप्रेमातिशये यत् प्रचण्डैर्भुजैः कर्तव्यं तत् वो युष्मान् मा स्म विस्मरत् युष्मान् मा त्याक्षीदिति भावः । रामरावणयुद्धे यूयं तदनुरूपं कुरुतेत्याशयः । "ओत्तरे लङ् च" पा०. ३. २. १७३. इति लङ् ।

प्रियारण्येन न विदारण्येनारण्यदर्शिना ।
आरण्यकस्य सुगमा विवृता विवृतिः कृता ॥

Digitized by Google

अथ षष्ठोऽङ्कः ।

ततः प्रविशति विषण्णो माल्यवान् ।

माल्य । सचिन्तम् । (1) अहह रक्षःपतेर्दुर्विनयविटपि-
कोरकाः परितः प्रकीर्णा इव ।
(2) बीजं यस्य विदेहराजतनयायाच्ञाङ्कुरोऽपि स्वसु-
र्यात्रा तौ परिवञ्चितुं, किसलयं मारीचमायाविधिः ।
शाखाजालमयोनिजापहरणं, तस्य स्फुटं कोरकाः
कोशाधीशवधोऽनुजस्य गमनं सख्यं तयोस्तेन च ॥ १ ॥

---

(1) रक्षःपतेः राक्षसाधिपतेः रावणस्य दुर्विनयः एव विटपी द्रुमः तस्य कोरकाः कलिकाः परितः समन्ततः प्रकीर्णाः विक्षिप्ता इव ।

(2) यस्य रक्षःपस्य दुर्नयस्य विदेहराजस्य जनकस्य तनयायाः सीतायाः सर्वनाशसूचेन याच्ञा बीजम् । स्वसुः रावणभगिन्याः शूर्प-णखायाः तौ रामलक्ष्मणौ परिवञ्चितुं प्रतारयितुं यात्रा गमनम् अपि अङ्कुरः । मारीचस्य मायाविधिः छलकृत्यधारणं किसलयम् पल्लवम् । अयोनिजायाः सीतायाः अपहरणं शाखाजालं शाखासमूहः । कोशस्य धनागारस्य अधीशानाम् अध्यक्षाणां खरदूषणत्रिशिरसां वधः—अनुजस्य विभीषणस्य गमनं—तेन च तयोः रामलक्ष्मणयोः सख्यं तस्य स्फुटं व्यक्तं कोरकाः । 'ते राजानमधर्मान् दुहन्ति' इति वाक्येन खरा-

Digitized by Google

(3) अयमधिरादेव फलोन्मुखोऽपि भवितेति मन्ये। यतो *दृढबुद्धिरनागतं पश्यति। निश्चय। अहो! वामता भागधेयानाम्।

(4) व्यसनेऽस्मिन् मन्त्रशक्त्या यद्यत् प्रतिकृतं मया।
अलसस्य यथा कार्यं तत्तत् प्रच्युतमात्मना॥ २॥

वामनीयम्। साचिव्यं नाम महते सन्तापाय।

(5) †यत् किञ्चिद्दुर्मदाः स्वैरमाद्रियन्ते निरर्गलम्।
तत्र तत्र प्रतीकारश्चिन्त्यो वक्रे विधावपि॥ ३॥

‡अहो! दुरात्मनः क्षत्रियवटोः सर्वातिशायि चरितम्।

---

* दृढबुद्धिर्हि प्रथमं पश्यति। वा०. रा०. ५.।

† स्वेच्छया कुरुते स्वामी यत्किञ्चन यतस्ततः।
तत्तत् प्रतिचिकीर्षन्तो दुःखं जीवन्ति मन्त्रिणः। वा०. रा०. १. २.।

‡ अहो दुरात्मनोऽस्य क्षत्रियकुलिकस्य सर्वकर्मोपसुप्तायितम्। भ०. रा०. ३.।

दीनां कोशाधीशत्वं चतुर्थेऽङ्के सूचितम्। न तु रामायणसम्मतमेतत्।

(3) अनागतं भविष्यत्। भागधेयानां भाग्यानां वामता प्रतीपता।

(4) क्रियामन्त्रस्य कार्यमिव सर्वं प्रतिकृतं आमदग्न्योत्तेजनादिकं निष्फलीभूतम्।

(5) दुर्मदाः प्रमत्ताः स्वैरं स्वेच्छया निरर्गलं निर्यन्त्रणं यत् किञ्चित् आद्रियन्ते क्रीडीकुर्वन्ति। तत्र तत्र वक्रे प्रतिकूले विधौ दैवेऽपि प्रतीकारः मन्त्रिणा मन्त्रयितव्यः।

Digitized by Google

(6) यत्तथाविधशौर्योणां कपिचक्रवर्त्तिनं शरैः संयमयता किं नाम न विहितम् ? अरयं नाटयित्वा । उल्लङ्घ किष्किन्धातः प्रतिनिवृत्तेन चारक्षेण यत् सीतामन्वेष्टुमनुदिग्रमभिदुद्रुवुः कपिपुङ्गवा इति ।

नेपथ्ये ।——

(7) भ्रान्तीः सप्ताधिकानां प्रविदधदरुणैरर्चिषां चक्रवालैः प्राग्वीराणामलक्ष्यप्रसृतिरतिसमुत्तप्तरौक्मालयेषु ।

---

(6) तथाविधशौर्योणाम् तादृशबलोन्मत्तम् । संयमयता दमयता । किष्किन्धोत्कलस्था वालिपालिता गुहा नगरी च (रा०. ४. २५. ३८.) ।

(7) सप्ताधिकानाम् अर्चिषां ज्वालानाम् । सप्तार्चिरेवाग्निः । अतः तस्य प्रचण्डत्वद्योतनार्थं सप्ताधिकानामिति विशेषणं प्रयुक्तम् । अरुणैः गौरैः चक्रवालैः मण्डलैः भ्रान्तीः प्रविदधत् जनयन्, प्राक् प्रथमं वीराणां प्रहस्तादीनाम् अतिसमुत्तप्तेषु रौक्मेषु हैमेषु आलयेषु वेश्मसु अलक्ष्या द्रुतत्वात् दुरुपलक्ष्या प्रसृतिः विसर्पणं यस्य सः । रा०. (बु०. स०.) ५. ५४. अध्यायानुसारेण हनुमान् किल प्रथमं राक्षसबलाध्यक्षाणां गृहाणि ददाह । अत्र प्राक्वीराणामिति तारानाथगृहीतः प्राचीराणामिति त्रिवेणगृहीतः पाठः । प्रौढः प्रवृद्धः हुताशः हुतभुक् वह्निः अर्द्धभुष्टम् अर्द्धदग्धं यथा तथा अपसर्पतां पलायमानानां रजनिचरभटानां राक्षसवीराणाम् उद्गाढस्य प्रौढस्य कल्पान्तस्य प्रलयस्य शङ्का यत्र तद्यथा तथा परिदहतः क्षुभ्यतः अब्धेः समुद्रस्य त्रिकूटेन पर्वतेन सह लङ्कां लीढे रसयति दहतीति भावः । "ततः स लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः । युगान्तकालानलतुल्यरूपः .....वदभे दिवस्पृक् ॥" इति रा०. (बु०. स०.) । "लङ्कां त्रिकूटशिखरे

अर्धभ्रष्टापसर्पद्रजनिचरभटोद्गाढकल्पान्तशङ्कं
लङ्कां प्रौढो हुताग्नः सह परिदलतोऽभ्येत्यिकूटेन लीढे ॥ ४ ॥

प्रविश्य पटाक्षेपेण संभ्रान्ता त्रिजटा।

त्रिज। (8) परित्तायदु परित्तायदु कणिट्ठमादामहो।

[इति घोरक्षाडं पतति।

माल्य। वत्से! अलं कातरतया किमिदमुच्चैरत्याहितम्?

त्रिज। (9) उत्थाय। कणिट्ठमादामह! किं कहेमि मन्दभाइणी। एसो क्खु कोवि दुट्ठवाणरो सअलं विद्धंसिअ णअरं खणमेत्तएण तीरकक्खणक्खरिणीखेवविक्खित्तविविहरक्खसलोओ अक्खेण क्खु कुमालएण अणुवन्धिज्जमाणो तस्सिं कदन्तलीलं कदुअ झत्ति णिक्कन्तो।

स्थिताम्" इति च रामायणम्। अत्र 'परिदलितः' इति क्वचित्पाठः। तस्य हुताशेनान्वयः।

(8) परित्रायतां परित्रायतां कनिष्ठमातामहः। घोरक्षाडं वक्षःस्ताडयित्वा।

(9) कनिष्ठमातामह! किं कथयामि मन्दभागिनी। एष खलु कोऽपि दुष्टवानरः सकलं विध्वंस्य नगरं क्षणमात्रेण तीरकर्षणनखरिणीक्षेपविक्षिप्तविविधराक्षसलोकोऽक्षेण खलु कुमारेणानुबध्यमानस्तस्मिन् कृतान्तलीलां कृत्वा झटिति निष्क्रान्तः। राक्षसेभ्यस्तीराणाम् आकर्षणं नखरिण्याः नखानां क्षेपेण प्रयोगेण च विक्षिप्ताः राक्षसलोकाः येन सः।

Digitized by Google

भाष्य । धिक्कष्टम् । किं नाम दग्धं नगरं हतोऽयः कुमारः ? अपि को नामायं कपिः स्यात् ! सत्वरत्वम् । उक्तश्च चारक्षेण हनुमानवाचीं दिशमिति । अहह !

(10) तूलदाहं पुरं लङ्कां दहतैव हनूमता ।
अपि लङ्कापतेस्तीव्रः प्रतापो निरवाप्यत ॥ ५ ॥

वत्से ! अपि तेन सीताप्रवृत्तिरुपलब्धा ।

त्रिज । (11) कणिट्ठमादामह ! पुरदो जेव्व कोवि मक्कडपरमाणू तीए समं मन्तअन्तो दिट्ठो । तीए वि उम्मोचिअ केसाहरणं अहिण्णाणं त्ति तस्स हत्थे समप्पिदं एतिअं जाणामि ।

भाष्य । (12) किं न पर्य्याप्तम् ? साधुकम् । एतेनैव कपिपरमाणुना तावदेवमनुष्ठितम् । एवं परःशताः कोट्यः शूयन्ते सम्प्रति सुग्रीवभुजबलपरिपालिते कपिसर्गे ।

---

(10) तूलदाहं तूलवत् । निरवाप्यत अशस्यत । त्रिजन्तस्य निर्वर्तितः कर्मणि क्तिच् रूपम् । सीतायाः प्रवृत्तिः वार्ता सीताप्रवृत्तिः ।

(11) कनिष्ठमातामह ! पुरत एव कोऽपि मर्कटपरमाणुरूपया सम मन्त्रयन् दृष्टः । तयाप्युन्मुच्य केशाभरणमभिज्ञानमिति तस्य हस्ते समर्पितमेतावज्जानामि । मर्कटपरमाणुः क्षुद्रकपिः । "दृष्ट्वंशप्रमाणस्तु ततो भूत्वा गतेऽहनि । निशि लङ्कां सहातेजाः प्रवेक्ष्यन् मारुतात्मजः ॥..." "सा निरीक्ष्य ततः सर्वं वेण्यां ग्रथितमुत्तमम् । विमुच्य प्रददौ तस्मै मणिरत्नं हनूमते ॥" इति रा०. ५. ८. ४७. । २६. २२–४. ।

(12) कपिसर्गे वानरसृष्टौ वानरेष्विति भावः । कोटीशतानीदृशा वानराः सुग्रीवाज्ञाकरा इति श्रूयन्ते ।

Digitized by Google

विज । (13) सवितर्कम् । कहं तारिसी सुउमारदंसणा वि सुसिणिद्धवाहारा वि माणसी वि सीदा अम्हाणं रक्खसाणं वि रक्खसी जादा ।

माल्य । वत्से ! युज्यतेऽपि ।

पतिव्रतामयं ज्योतिः भ्रान्तं दीप्तं च घुष्यते ।

विजय । अथवा किं नाम सा वराकी ?

(14) दुष्कर्मणां परीपाकः स्वयमेवैष दीप्यते ॥ ६ ॥

विज । (15) कणिट्ठमादामह ! पढमं खु दण्डकारण्णपेरन्तपरिट्ठिदविविहमहीहरप्पदेसेसु णिवासो जेव्व अम्हाणं रक्खसाणं । विहारा खु णिखिलम्मि जम्बुदीवे । संपदं खु इह णअरे वि अक्खमो णिवासो । का गई को पडिआरो ।

माल्य । वत्से ! किमेवमतिकातरासि ? पश्य—

(16) दुर्गोऽयं चित्रकूटस्तदुपरि नगरं सप्तधातुप्रकार-

---

(13) कथं तादृशी सुकुमारदर्शनाऽपि सुस्निग्धव्यवहाराऽपि मानुष्यऽपि सीताऽस्माकं राक्षसानामपि राक्षसी जाता । राक्षसी क्षयकरी ।

(14) एष परीपाकः परिणामः स्वयं दीप्यते ज्वलति । एतान्यस्माकं दुष्कर्मणां फलान्येति भावः ।

(15) कनिष्ठमातामह ! प्रथमं खलु दण्डकारण्यपर्यन्तपरिस्थितविविधमहीधरप्रदेशेषु निवास एवाऽस्माकं राक्षसानाम् । विहाराः खलु निखिले जम्बुद्वीपे । साम्प्रतं खल्विह नगरेऽत्यक्षमो निवासः । का गतिः कः प्रतिकारः ।

(16) अयं चित्राणि कूटानि शिखराणि यस्य स चित्रकूटः गिरि-

Digitized by Google

प्राकारः दुस्तरेषा निरवधिपरिखाप्यब्धिरभ्रंकषोर्मिः ।
विज्ञेय । अथवा किमनेन ।

दोर्दण्डा एव दृप्यद्रिपुदलनमहासत्रदीक्षाः प्रतीक्ष्या
रक्षोनाथस्य [वामाक्षिस्पन्दनं सूचयन् सव्यथम्]——
—किं नो विधिरिह वचनेऽप्यक्षमो दुर्विपाकः ॥ ७ ॥
वक्षे वत्सस्य कुम्भकर्णस्य निद्रागमसौख्यः कियद्वशिष्टम् ?

त्रिज । (17) कणिट्ठमादामह ! अज्जि जेव्व कसणच-उद्दसीदिअहे चउत्थोमासो परिसमत्तो ।

ट्राद्रिः दुर्गः दुर्गमः । तस्योपरि सप्तधातुप्रकारप्राकारं सप्तधातुनिर्मित-प्राकारयुक्तं नगरम् । "ददर्श तां पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् । ...यत्नतेव नभः क्लृप्तं सागरेणाभिसंहताम् । ... शातकुम्भेन महता प्राकारेण सुसंवृताम् ।..." इति रा०. ५. ६. अ०. । एषाऽपि दुस्तरा निरवधिपरिखा अनन्तखातम् अभ्रंकषाः श्लोमस्पृशः ऊर्मयः तरङ्गाः यस्य सोऽब्धिः जलधिः । रक्षोनाथस्य रावणस्य प्रतीक्ष्याः पूज्याः दोर्दण्डा भुजा एव दृप्यताम् अवलिप्तानां रिपूणां दलन एव महासत्रे महायज्ञे दीक्षा येषां तादृशा रिपुमथनक्षमा इति भावः । अक्षिस्पन्दरेऽशुभसूचनं वामाक्षिस्पन्दनं दृष्ट्वा सविषादं वदति । हन्त रावणस्याधिनि वचनेऽपि अक्षमः असहनो विधिः दैवं किं नोऽस्माकं दुर्विपाकः दुरतिक्रमः । वत्सस्य निद्रागमसौख्यः कियत् अवशिष्टं कतिदिनापगमे वत्सस्य निद्राभङ्गो भविष्यति ।

(17) कनिष्ठमातामह ! अस्मिन्नेव कृष्णचतुर्दशीदिवसे चतुर्थमासः परिसमाप्तः । कृष्णचतुर्दशी कृष्णपक्षस्य चतुर्दशी तिथिः । विजया-दशम्यां (रा०. ५. ७१. १४–५.) रामस्य लङ्काजयाय प्रयाणं लङ्की-कृत्य लङ्कादाहस्य पूर्वत्वात् कृष्णचतुर्दशीमुक्तम् ।

Digitized by Google

माल्य। (18) कथमद्यापि विप्रकृष्टतमः किल प्रबोधकालः? सखरत्वम्। विस्मृश्यमाने तु दिष्ट्या कनिष्ठवत्स एव दूरदर्शी यस्याविस्मृश्यकारितापि शुभोदर्का सुबहुशोऽप्यभिसन्धीयमाने कुलप्रतिष्ठातन्तुं तमेवोत्पश्यामि।

विज। सखन्भ्रमम्। (19) कणिट्ठमादामह! हद्धी हद्धी सन्तं पावं पडिहदममङ्गलम्।

माल्य। किमिति?

विज। (20) कणिट्ठमादामहस्स अअं णअवअणोवण्णासो अस्सिं जेव्व कस्सिं अमङ्गले जेव्व विस्सन्तो।

माल्य। (21) वत्से! नैतदनुसन्धायोक्तम्। एवं किलावसीयते। यतः

---

(18) विप्रकृष्टतमः अतिदूरः। कुलभर्तुश्च सम्प्राप्तवद्यमानस्यापात्, रा०, ६. २७. १६.। कनिष्ठवत्सः विभीषणः। यस्य अविस्मृश्यकारिता रामसन्निधिगमनं शुभोदर्का शुभफलदा। कुलप्रतिष्ठातन्तुं तमेव उत्पश्यामि अन्येषां निधने स एव राक्षसवंशस्थितिमूलं भविष्यतीति तर्कयामि।

(19) कनिष्ठमातामह! हा धिक् हा धिक् शान्तं पापं प्रतिहतममङ्गलम्।

(20) कनिष्ठमातामहस्यायं नयवचनोपन्यासोऽन्यस्मिन्नेव कस्मिंश्चिदमङ्गले विश्रान्तः। अमङ्गले विश्रान्तः राक्षसकुलनाशं सूचयति।

(21) न अनुसन्धाय सर्वतो वीक्ष्यैव। एवम् अवसीयते दैवस्य अवसानं भविष्यति। प्रबलात् भवितव्यात् दैवात् अन्यत्र कुलाऽपि अन्यस्मात् कस्मादपि कारणात् अयं दुर्विपाकः न पतति सम्पतति।

Digitized by Google

न कुत्राप्यन्यत्र प्रबलभवितव्यादयमहो
विशुद्धैवोत्पत्त्या पतति न च तत्पापधिषणा ।
यथा खैरं भ्राम्यन्निरवधि वियत्यस्तशिखरं
व्युदस्यायं भास्वांस्तदनुगतपक्षार्चिरपि सा ॥ ८ ॥

तदत्र प्रतीकारेषु केवलं मतिसन्धानजृम्भितमवशिष्यते । कृतमनेन । वत्से ! अवैषि किमुपक्रमस्तावद्दैवो दृषत्कन्धरः ।

तिज । (22) कणिट्ठमादामह ! सामी क्खु संपदं सव्वतोभद्दं णाम अट्टालअं आरुहिअ तीए रक्खसकुलकालरत्तीए अधिट्ठिदं असोअवणिअं जेव्व पुलोअन्तो चिट्ठदि । अणं अ ईदिसुहं पउत्ताए एसा पउत्ती सुदा "एदं खु अरवुत्तन्तं अणुहविअ किं वि दुम्मणाअन्ती सामिणी पढ़िवोहेउं तहिं जेव्व पत्थिदेत्ति ।"

अहो रावणस्य उत्पत्त्या ब्रह्मसम्बन्धेन विशुद्धा विमला एव तस्मिन् सीताहरणरूपे पापे धिषणा बुद्धिश्च न पतति सम्भवति । यथा अयं भास्वान् सूर्यः खैरं स्वेच्छया वियति नभसि निरवधि भ्राम्यन् अस्तशिखरं व्युदस्य वर्जयित्वा न पतति । सा तदनुगतस्य सूर्यानुगतस्य पक्षस्य दिवसस्य अर्चिः प्रभा अपि न पतति ।

(22) कनिष्ठमातामह ! स्वामी खलु साम्प्रतं सर्वतोभद्रं नामाट्टालकमारुह्य तया राक्षसकुलकालरात्र्याऽधिष्ठितामशोकवनिकामेव पश्यन् तिष्ठति । अन्यच्च वीथिसुखप्रवृत्त्यैषा प्रवृत्तिः श्रुता 'एतच्चगरवृत्तान्तमनुभूय किमपि दुर्मनायमाना स्वामिन्यपि प्रतिबोधयितुं तत्रैव प्रस्थितेति ।' "शोडशाक्षसमायुक्तो नानारूपसमन्वितः । अनेकशिखरस्तद्वत्सर्वतोभद्र

Digitized by Google

माल्य। (23) वत्से! स्त्रीत्वेऽपि वरं सा खलु देवी मन्दोदरी, यन्मतिः प्रतिबोधनायोत्साह्यति। न पुनर्देवो यः प्रतिबोधितोऽप्यापि न बुध्यते। तदेहि तावदभ्यन्तरं प्रविश्य प्रणिधिकार्यं विचारयामः।

[इति निष्क्रान्तौ।

[इति विष्कम्भकः।

ततः प्रविशति सोत्कण्ठो रावणः।

रावणः। *सीतां विभाव्य—

(24) मुखं यदि किमिन्दुना, यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवौ।

---

* सीतामनुसन्धाय।

तद्वक्त्रं यदि सुद्रिता शशिकथा.....

सा दृष्टिर्यदि हारितं कुवलयैः.....। बा०. रा०. २. १७.।

धिक् कन्दर्पधनुर्भुवौ यदि च ते ...। दर्पणदृतपाठः।

उच्यते॥" इति मातृस्वसुः। अशोकवनिकायां सीता दृष्ट्वाऽऽसीत्, रा०. २. ६२. ३२.। तामेव पश्यन् तिष्ठति सीतादर्शनलालसया तदुपवनमेव निरीक्षमाणः कालं नयतीति भावः। प्रहस्तया गतया मया प्रहस्तिः वार्त्ता श्रुता। स्वामिनं मन्दोदरी। प्रतिबोधयितुं रावणमिति शेषः।

(23) प्रतिबोधनाय रावणाय सम्यक् कथयितुम् उत्साह्यति व्यापृता भवति। किन्तु रावणो दत्तोपदेशोऽप्युपदेशं न ग्रहीष्यति। प्रणिधिकार्यम् अधुना चरैः किं कर्तव्यमिति विचारयामः मन्त्रयामः।

(24) सीतायाः वदनेन सह चन्द्रस्य का तुलना, चन्द्रादपि सौन्दर्य-

Digitized by Google

किमात्मभवधन्वना, यदि सुसंयताः कुन्तलाः
किमम्बुवहडम्बरैर्यदि तनूरियं किं श्रिया ॥ ९ ॥

सञ्जीवनम्। अहो! हलमुखविनिर्भिन्नविश्वम्भराविर्भूत-योषिद्रत्नमनुभवतो मम मनोरथेन चिराय फलितम्। विच्छन्न। अनुकूलस्य विधेः किलायं विश्वासः। सगर्वम्। *अथवा क एष विधिरपि।

(25) पित्वा ब्रह्माण्डमस्मादथ भुवनविभागादुदस्यापि किञ्चिद्-ब्रह्माण्डं चाधिकृत्याप्रतिमरुचितरं स्वं प्रतापं यशस्व।

---

* अथवा क एष विधिरपि मदिरोधाय। प्र०-रा०. १.।

आननमिति भावः। चलाञ्चलाभ्यां चलापाङ्गाभ्यां नेत्राभ्यां सह उत्पलकदम्बकानां नीलपद्मसमूहानां का तुलना, तदपेक्षयाऽधिक-चञ्चल इति भावः। तथाहि नैषधः "नलिनं नलिनं विहरन्ती धृतनीलसरोरुहती तदीक्षणे" (इति २, ३)। तरङ्गभङ्गिभ्याम् आयत-रेखाभ्यां भ्रूभ्यां सह कन्दर्पधनुषः का तुलना, तदपेक्षया वक्रे ते इति भावः। "धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भुवौ" इति च नैषधः। केशैः सह मेघानां का तुलना, ततोऽपि नीलत्वात्। तस्याः शरीरेण सह खड्गाद्याः का तुलना, अधिकतरकान्तिमत्त्वात्। हलस्य मुखेन अग्रभागेन विनिर्भिन्नायाः विदारितायाः विश्वम्भरायाः पृथिव्याः आविर्भूतम् उत्थितं योषिद्रत्नं सीतां (१, ४१, टीका) अनुभवतः ध्यायतः मम चिरेण सीताप्राप्तिरूपा कामना सिद्धा।

(25) यदि मम आत्मदोषः न स्यात्, अहं ब्रह्माण्डं पित्वा निगिल्य अथ अनन्तरम् अस्मात् भुवनस्य विभागात् अंशात् ब्रह्माण्डं

सूर्येन्दू संविधाय स्वयमधिकतरं निर्वृतः स्यामहं चे-
न्न स्यादालस्यदोषः सकरुणमथवा कोऽनुकम्प्येषु कोपः ॥१०॥

ततः प्रविशति मन्दोदरी चेटी च ।

चेटी । (26) इदो भट्टिणी । एदं अ राअअसोवाणमग्ग-दुआरअं । ता आरोहदु भट्टिणी ।

मन्दो । सोपानारोहणं नाटयित्वा, रावणं निरूप्य । (27) कहं एसो महाराअदसकन्धरो उवविट्ठो वट्टदि । निर्वर्ण्य । कहं असोअवणिआसम्मुहं पुलोएहि । सखेदम् । कहं दूरिसेवि रिउवक्खाहिओए संवुत्ते राअकज्जणिवेक्खो लक्खीअदि महाराअदसकन्धरो त्ति । उपसृत्य । जेदु जेदु महाराअदस-कन्धरो ।

रावणः । आकारसंवरणं नाटयित्वा । कथं मन्दोदरी ?

[इति पार्श्वे सम्पवेशयति ।

प्रजापतिम् अपि किञ्चित् उदस्य विक्षिप्य, स्वं निजम् अप्रतिमरुचितरम् अनुपमोज्ज्वलं प्रतापं यशश्च अधिकृत्य उद्दिश्य सूर्यं चन्द्रञ्च संविधाय स्थापयित्वा स्वयम् अधिकतरं निर्वृतः सुखी स्यां भवितुं शक्नुयाम् । अथवा सकरुणं सदयम् अनुकम्प्येषु दैवादिषु कः कोपः । निजायत्ते दैवे अयुक्तः कोप इति भावः । एतेन प्रथमपद्यं खण्डयति ।

(26) इतो भट्टिनी । एतच्च राजतसोपानमार्गद्वारकम् । तदा-रोहतु भट्टिनी ।

(27) कथमेष महाराजदशकन्धर उपविष्टो वर्तते । कथमशोक-

मन्दो । (28) तथा कृत्वा । महाराज ! किं एत्थ चिन्तिदं ?

राव । कुत्र ?

मन्दो । (28) रिउवक्खआहिओए ।

राव । सोत्प्रासम् । कथं रिपुस्तत्पक्षस्तदभियोगश्चेत्यश्रुतं आव्यते देव्या ?

(29) योऽहं द्वाभ्यां भुजाभ्यां रुधभुवि युगपन्मत्तदिग्दन्तिदन्तान्
रुद्ध्वा दोर्भिश्चतुर्भिः सरभसमजितान् दिक्पतीनप्यरौत्सम् ।
दीप्यद्बाह्यादिचण्डप्रहरणपतनक्षुण्णवक्षस्त्वचो मे
तस्यापि प्रातिभाद्यद्रिपुरिति कलितः, कोऽप्यपूर्वः प्रमादः ॥११
भवतु तथापि श्रोतव्यम् । देवि ! स कः ?

वनिकासम्मुखं पश्यति । कथमीदृशेऽपि रिपुपक्षाभियोगे संवृत्ते राजकार्यानवेक्षो लक्ष्यते महाराजदशकन्धर इति । जयतु जयतु महाराजदशकन्धरः ।

(28) महाराज, किमत्र चिन्तितम् । रिपुपक्षाभियोगे ।

(29) योऽहं रुधभुवि रथाङ्गने द्वाभ्यां भुजाभ्यां मत्तानां मदोत्कटानां दिग्दन्तिनां दिग्गजानां दन्तान् युगपत् सहं रुद्ध्वा, सरभसं जवेन चतुर्भिः दोर्भिः भुजैः अजितान् दिक्पतीन् लोकपालान् अपि अरौत्सम् । रुधाङ्गेर्लुङि रूपम् । दीप्यद्बाह्यादीनां चण्डानां प्रहरणानाम् आयुधानां पतनेन क्षुण्णा वक्षसः त्वक् चर्म यस्य तस्याऽपि मम प्रातिभाद्यात् प्रतियोधत्वेन रिपुरिति कलितः गृहीतः । कोऽपि अपूर्वः प्रमादः अनवधानता । लोकपालजेतुर्मम प्रतिभटो नास्ति । अतो मम रिपुर्न सम्भवतीति भावः ।

Digitized by Google

मन्दो। (30) णिखिलवलीमुहचक्काणुमदसुग्गीवाग्गेसरो सहकणिट्ठो दासरही रामो त्ति सुणीअदि।

राव। किं सहानुजस्तापसः। देवि! किं गतेन तेन तैर्वा सः?

मन्दो। (31) महाराअ! समुद्दाओ क्खु सक्कीअदि। अवरं अ सागरवेलासु सेणां विणिवेसिअ आहुदो णेण सागरो ण णिग्गदो भवणादो त्ति। तदा तु। संकृतमाश्रित्य।

(32) प्रायुंक्तास्त्रं स किञ्चिज्जलनिधिकुहरे यन्महिम्ना क्षणार्द्धा-
दाहृत्याहृत्य चक्रभ्रममखिलमभूत् क्षाथतः क्षोणमभ्भः।
उन्मूर्च्छच्चक्रचक्रं झटिति परिदलत्कच्छपौघं प्रमुह्यद्-
भूयः पाथोमनुष्यं स्फुटदतुलरवं प्रस्फुटच्छङ्खशुक्ति॥ १२॥

राव। साधुसम्। किं ततः?

---

(30) निखिलवलीमुखचक्रानुगतसुग्रीवाग्रेसरः सहकनिष्ठो दाशरथी राम इति श्रूयते। वलीमुखचक्रं वानरसमूहः।

(31) महाराज! समुद्रादयः खलु शक्यते। अपरञ्च सागरवेलासु सेनां विनिवेश्याहूतोऽनेन सागरो न निर्गतो भवनादिति। समुद्रादयः सर्वम्।

(32) स किञ्चित्सावकमिति भावः अस्त्रं जलनिधिकुहरे समुद्रगर्भे प्रायुंक्त प्रक्षिप्तवान्। यस्य महिम्ना प्रभावेण क्षणार्द्धात् अर्द्धमुहूर्त्तेन चक्रभ्रमम् आहृत्य आहृत्य चक्रवत् भ्रान्त्वा भ्रान्त्वा। वीप्सायां द्विः। अखिलं सर्वं क्षाथतः निष्पाकेन क्षोणं रक्तम् अभ्भः जलम् उन्मूर्च्छत् दाहेन विसर्पत् चक्रचक्रं कुम्भीरसमूहः यस्मिन् तत्, परिदलत् विदीर्य-

मन्दो। (33) महाराअ! तदो अ पुंखमेत्तपेक्खिज्जमाणतिक्खसरणिअरपम्हलिदसरीरेण णिक्कमिअ सलिलादो सबादबड़णं अब्भत्थिअ मग्गो उवदिट्ठो। साहसिएण उण तेण साहिज्जवित्ती सुणीअदि।

राव। महाराज। अस्तु श्रूयते। देवि! कौदृशः?

माणः कच्छपौघः कूर्मसमूहो यस्मिन् तत्, प्रसुप्तान्तः भूयांसः बहवः पाथोमनुष्याः जलमानुषाः यस्मिन् तत्, स्फुटदक्षरवं निष्क्रामन्महानिर्घोषं प्रस्फुटन्तः विशीर्यमाणाः शङ्खा शुक्तयश्च यस्मिन् तत्, अभूत्। "व्यचितमभवत् सागरजलं, परिभ्रेसुर्नक्राः, स्फुटनमगमत् शङ्खमक्षयः" इति महानाटकम्। "ते ज्वलन्तो महावाडवास्त्रेजसा पावकोपमाः। विविशुः सागरस्याशु सलिलं तप्तपञ्जरम्॥ ततो वेगः समुद्रस्य सनक्रो मकरो महान्। संबभूव" (रा०. ५. १२. अ०.) "महाघोरः समाकृतरवस्तथा॥ महोर्म्मिजालचकितः शङ्खजालसमाहतः। बभूवुः परिवर्त्तोर्म्मिः सहसाऽऽसीन्महोदधिः॥ आवर्त्तिततरक्षौघः सम्भ्रान्तोरगराक्षसः। उद्वर्त्तितमहाग्राहः सघोषो बद्धवारयः॥" इति रा०. बु०. स०.।

(33) महाराज! ततश्च पुङ्खमात्रप्रेक्ष्यमाणतीक्ष्णशरपक्ष्मक्षितशरीरेण निष्क्रम्य सलिलात् सपादपतनमभवत्। मार्ग उपदिष्टः। साहसिकेन पुनस्तेन साध्योऽयमिति श्रूयते। पुङ्खाः बाणमूलानि॥ शरैरेव पक्ष्मक्षितं पक्ष्मजालसमाहतम् आहतमिति भावः शरीरं यस्य तेन। साध्यः निष्क्रमः मार्ग इति शेषः। साहसिकेन रामेण।

Digitized by Google

मन्दो । (34) महाराअ ! वलीमुहसहस्साणीदेहिं महीहरेहिं सेदू णिम्मीअदि ।

राव । देवि ! विप्रलब्धासि केनचित्। अकलितगाम्भीर्यमहिमा किलायं पाथोनाथः ।

जम्बुद्वीपेऽथ वान्येषु द्वीपेष्वपि महीधराः ।
(35) यावन्तस्तैः कुक्षिकोणोऽप्यस्य न भ्रियते किल ॥१३॥

अपिच । साहसिकेनेति वदन्त्या देव्या विस्मृतप्रायं मत्साहसे तु ।

(36) उत्पुष्पद्वलघमनिस्फुटप्रसर्पत्-
प्रत्यग्रचतजभरीनिवृत्तपाद्यः ।
हर्षाश्रुप्रचुरमधुस्मितस्फुटास्रि-
वक्त्राब्जार्चितचरणः शिवः प्रमाणम् ॥ १४ ॥

---

(34) महाराज ! वलीमुखसहस्रानीतैः महीधरैः सेतुर्निर्मीयते । वलीमुखो वानरः ।

(35) तैः तावद्भिः पर्वतैः अस्य सागरस्य कुक्षिकोणोऽपि एकदेशोऽपि न किल भ्रियते पूर्यते ।

(36) उत्पुष्पद्वलघमनिभ्यः विकसत्कठिनाङ्गिभ्यः स्फुटं प्रसर्पतां प्रत्यग्राणाम् अभिनवानां चतजानां रक्तानां भरीभिः प्रवाहैः निवृत्तं पाद्यं पादधावनं यस्य सः, हर्षाश्रुप्रचुरमधुस्मितस्फुटास्रिवक्त्राब्जैः आनन्दजलवद्भुलैः स्मितसुधोद्भासितैः मम वदनकमलैः अर्चितौ पूजितौ चरणौ यस्य स शिवः मम साहसे प्रमाणम् । निजशिरांसि छित्त्वा तमतोषयमिति भावः । रामायणे शिवस्तु शिरश्छेदोल्लेखो नास्ति ।

Digitized by Google

मन्हो । (37) महाराअ ! ओधारेहि किं वि अण्णारिसी रअणा कस्सवि वलीमुहस्स हत्थपुण्णदो। उवरि जेव्व चिट्ठंदि ते महीहरा जलम्मि त्ति ।

राव । (38) सचिरःकम्मम् । दूदं तदप्रतीकार्थ्यं मौग्ध्यमवलानां यद् यावाणोऽपि प्लवन्त इति । देवि ! किं बहुनोक्तेन ।

श्रुतं मे जानाति श्रुतिकविरथाऽऽत्मां सहचरः
स यच्चा धैर्य्यं चाऽऽत्मनिरथ यशोऽद्भिभुवनम् ।
बलं कैलासाद्रिः, किमपरमहो ! साहसमपि
चरत्कीलालाभःऋपितचरणः खण्डपरशुः ॥ १५ ॥

जेवलं "तुष्टाव दशभध्वजम् । सामभिर्विविधैः स्तोत्रैः प्रणम्य स दशाननः ॥" (७. १६. २४.) इत्येवं पठते । ब्रह्मतोषणाय तु नवानां शिरसां बलौ कृपणं वर्णितम् । १०. १०—१२ । शैवाः खण्डरोमाकालव्यवर्त्तनाय शिवतोषायैव रावणेन स्वानि शिरांसि छिन्नानीति वदन्ति । तथाहि आर्षः "शिरोऽतिरागाद्यजनं चिकर्त्तिषुः । अतर्कयद्विघ्नमिवेशसाहसः प्रसादमिच्छाखडयं पिनाकिनः ॥" इति ।

(37) महाराज ! अवधारय किमन्यादृशी रचना कस्यापि वलीमुखस्य हस्तपुण्यतः । उपर्येव तिष्ठन्ति ते महीधरा जल इति । प्लवन्त एव पर्वता इति भावः ।

(38) मौग्ध्यं मूर्खता । श्रुतिकविः वेदप्रवक्ता ब्रह्मा मम श्रुतं वेदज्ञानं जानाति, तपस्यायां निरर्गलवेदमन्त्रोच्चारत्वात् । अथ सच्चाः सहचरः देवेन्द्रः आत्मां जानाति, जितस्य तस्यात्माकरत्वात् । अग्निः

Digitized by Google

नेपथ्ये महान् कलकलः।

बन्दी। (39) महाराज! परित्राहि परित्राहि।

[इति सलाघसदीर्घते।

राव। देवि! अलं शङ्कया।

पुनर्नेपथ्ये। भो भो लङ्काद्वाररक्षिणो राक्षसगणाः!

(40) दत्त द्वाराणि तूर्णं, सरलतरगुरूणश्मसारार्गलानि
क्षिप्यन्तां, यन्त्रजातं तदुपरि नयत, स्वान्यथीं स्वावधत्त।
रुध्यध्वं निर्विषास्तून् शिशुयुवतिजनान्, वीवधांस्वादियध्वं,
प्राप्तः सुग्रीवमुख्यप्लवगपरिवृतः सानुजो रामभद्रः॥ १६॥

वज्रं च मम धैर्यं जानाति, इन्द्रेण महत्त्वमपि क्षिप्तस्य वज्रस्य वैफल्यात्। अदः इदं त्रिभुवनं यशो जानाति, वितततत्वात्। कैलासाद्रिः बलं जानाति, तोलनात्। किम् अपरम् अहो अरता छिन्नेभ्यः मत्तालकोभ्यः निर्गच्छता कीलालाप्लुता अतस्त्वमेव रक्तेन क्षपितचरणः धौतपादः खड्गपरशुः शिवः मम साहसमपि जानाति, निजशिरःकर्तनात्।

(39) महाराज! परित्राहि परित्राहि।

(40) तूर्णं शीघ्रं द्वाराणि दत्त आहत। सरलतराणि अत्यूर्जानि गुरूणि अश्मसारमयानि लौहनिर्मितानि अर्गलानि क्षिप्यन्तां युष्माभिः द्वारेषु निवेश्यन्ताम्। "गुरुरश्मसारार्गलाश्च" इति पाठः प्रमत्तः, गुरुरिति द्वितीयाबहुत्वात् क्षिप्यन्तामिति च कर्मणि प्रयोगत्वात्। तेषाम् उपरि यन्त्रजातं यन्त्राणि नयत कुरुत। स्वान् यवीन् मानान् च अवधत्त अप्रमादेन रक्षत। 'यातेः किदुद्वे च' इति कौमुदी। निर्विषाः निष्कालसहाः अवयः प्राचाः येषां तान् शिशुयुवतिजनान् रुध्यध्वम् उप-

नेपथ्येऽन्त प्रविष्टा प्रतीहारी ।

प्रतीहारी । (41) भट्ट, एसो पड़ाहारभूमिए चिट्ठदि सेणावइ पहत्थो विण्णविदुकामो ।

राव । कथं सेनापतिः प्रहस्तः ? प्रवेशय ।

प्रती । तहा । [इति निष्क्रान्ता ।

ततः प्रविशति प्रहस्तः ।

प्रह । अहो ! मनुष्यपोतस्य तावदत्यूर्ज्जस्वलं चरितम् । तथाहि ।

(42) भीमं गोष्पदवल्लिलङ्घ्य परितः कल्लोलमालाकुलं
पाथोनाथमुपेत्य मन्थरतरं लङ्कानिबद्धेक्षणः ।
स्कन्धावारमसौ निवेश्य विषमे सौवेलमूर्ध्नि स्वयं
कैश्चिद्वानरपुङ्गवैः परिवृतोऽध्यास्ते पुरः प्राङ्मुखम् ॥१७॥

पुरो निरूप्य । कथमयं लङ्केश्वरः ?

राव । भद्र सेनापते ! किंहेतुरयं कलकलः ?

तिष्ठध्वम् । अन्वध्वमिति पाठो व्याकरणविरुद्धः । वीक्षध्वम् साधु-सामग्रीः आदियध्वम् अवधत्त । सुग्रीवप्रमुखैः वानरैः परिवृतः वृतः लक्ष्मणो रामः प्राङ्मुखः उपागतः ।

(41) भट्ट, एष प्रतीहारभूमौ तिष्ठति सेनापतिः प्रहस्तो विज्ञापयितुकामः ।

(42) परितः सर्वतः कल्लोलमालाकुलं दुरुत्तरङ्गसंकुलं भीमं भीषणं पाथोनाथं जलधिं गोष्पदवत् विलङ्घ्य तीर्त्वा, लङ्कायां निबद्धम् ऐक्षं

प्रह० । सगतम् । कथमस्याप्यनभिज्ञ एव देवः । भवतु कार्यमात्रं विज्ञापयामि ! प्रकाशम् ।

पुरं निःशेषघटितं कपाटद्वारमाहतम् ।

(43) रक्षा चास्मै भल्लिमल्लिः कौणपैः परितः स्थिता ॥ १८ ॥

राव० । किमिति ?

प्रह० । सगतम् । कथं सैवावस्था ? भवतु । प्रकाशम् । देव लङ्केश्वर !

मनुष्यपोतमात्रेण सानुजेन पुरी तव ।

(44) रुध्यते स्म यथासारं, वीवधाद्यपि दुर्लभम् ॥ १९ ॥

चक्षुः यस्य तदभिमुख इति भावः । मन्थरतरं मनैः मनैः उभेत्य उपस्थत्य, असौ रामः विषमे दुर्गमे सौवेलमूर्ध्नि सुवेलगिरिशिखरे स्कन्धावारं कटकं निवेश्य स्थापयित्वा, स्वयं कैश्चित् कतिपयैः वानरपुङ्गवैः यूथपैः परिवृतः पुरः लङ्कायाः प्राङ्मुखम् अध्यास्ते अधितिष्ठति । तत्र वर्तत इति भावः । सुवेलो लङ्कासन्निहितः पर्वतः । "ततः सुवेलमारुह्य रामस्तैर्हरिभिः सह । निषसाद गिरेस्तस्य शृङ्गे समधिकातले ॥" इति रा०. ६. १४. १५. । को हेतुरस्येति किंहेतुः । किंहेतुमिति पाठः प्रमत्तः, हेतौ "प्रथमाद्विनीवे न स्तः" इति दीक्षितवचनात् ।

(43) कौणपाः मद्यमिनो राक्षसाः । भल्लैः विशस्तैः ।

(44) यथासारम् आसारक्रमेण सर्वतो निरोधेन । वानरैः "सर्वतः संवृता लङ्का दुष्प्रवेशाऽपि वायुना ॥" इति रा०. ६. १६. ४८. ।

Digitized by Google

प्रविश्य प्रतीहारी ।

प्रती । (45) भट्ट, एसो कोवि वलीमुहो रामस्स दूदो त्ति भणिअ पड़ीहारदेसे चिट्ठदि ।

राव । सावधानम् । वलीमुखः । प्रवेशय ।

प्रती । (46) तहा । इति निष्क्रम्याङ्गदेन सह प्रविश्य तं प्रति । एसो भट्टो । उपसर्प्य ।

अङ्ग । उपसृत्य । जयति जयति परममाहेश्वरो लङ्केश्वरः ।

राव । सुग्रीवानुचरो भवान् ?

अङ्ग । नहि नहि ।

राव । तर्हि कस्य ?

अङ्ग । लङ्केश्वर ! श्रूयतां योऽहं यदर्थमागतश्च ।

(47) दृप्यद्राक्षसचक्रकाननमहादावानलस्याज्ञया
दूतो दाशरथेस्तदीयवचसा त्वामागतः ग्रासितुम् ।
सीतां मुञ्च भजावरोधनसुहृद्भ्रात्रादिपुत्रान्वितः
सौमित्रेश्चरणौ नचेत्तदिषुभिः ग्रासिष्यसे दुर्मदः ॥ २० ॥

---

(45) भट्ट, एष कोऽपि वलीमुखो रामस्य दूत इति भणित्वा प्रतीहारदेशे तिष्ठति ।

(46) तथा । एष भट्टः । उपसर्प ।

(47) दृप्यतां राक्षसानां चक्रस्य सङ्घस्यैव काननस्य वनस्य महादावानलस्य अनलस्य दाशरथेः रामस्य आज्ञया दूतोऽहम् । तस्य वचसा

राव । सहासम् । वल्मीमुखोऽपि वाचाटः किं वक्तव्यम् ?

अङ्ग । अहं यत् किञ्चित् स्याम् । त्वन्तु सिद्धान्तमेवावधारय ।

(48) तत्पादाम्बुजनखं किं वा तत्तीक्ष्णेषुमुखं नताः ।
स्रष्टारस्तेऽद्य मूर्द्धानस्तयोरभिमतं वद ॥ २१ ॥

राव । (49) सक्रोधम् । कः कोऽत्र भोः, यत्किञ्चिदादिनोऽस्य मुखं संस्कुर्य्यात् ।

प्रह । (50) देव ! दूतः किलायम् । किमत्र क्रोधेन ।

राव । एतन्मुखसंस्कार एव तपस्विनः प्रत्युत्तरीकरणम् ।

अङ्ग । उद्रोमकूपस्फुरणमभिनीय ।

त्वां शाधि निदेष्टुम् आगतः । यत् त्वं सीतां मुञ्च, अवरोधनेन दारैः सुहृद्भिः दायादैः अक्षयहरैः पुत्रैः च अन्वितः युक्तः सौमित्रेः सुमित्रासूनोः लक्ष्मणस्य चरणौ भज । न चेत्, दुर्मदस्तं तस्य इषुभिः बाणैः शासिष्यसे दण्डयसे ।

(48) अद्य तव मूर्द्धानः तस्य लक्ष्मणस्य पादाब्जस्य चरणकमलस्य नखं वा तस्य तीक्ष्णम् इषुमुखं शल्यं वा स्रष्टारः स्रक्ष्यन्ति । तयोः नमनमरणयोः किं तेऽभिमतं तद्वद ।

(49) संस्कुर्यात् विरूपीकुर्विति भावः । "अथैनं परुषं वाक्यं ब्रुवाणे हरिपुङ्गवे । क्रोधेन महताविष्टः" सचिवानाह रावणः । "दृष्टतामेष दुर्मेधाः शास्यतामिति चाब्रवीत् ॥" इति रा०. ६. १६. ८५. ।

(50) रामायणे वैरूप्यादेरदोषत्वमुक्तम् । "वैरूप्यमङ्गेषु कशानिपातो मौण्ड्यं तथा लक्ष्मणसन्निपातः । एतद्विधानर्हति दण्डवादी दण्डेषु दूतस्य वधो न दृष्टः ॥" इति ५. ४८. ६. ।

Digitized by Google

(51) यथासंख्यं तीक्ष्णक्रकचविषमक्रूरनखर-
प्रगल्भव्यापारप्रमथितशिरोबन्धशिथिलैः ।
शिरोभिस्ते दिग्भ्यो बलिमनुपहृत्यैव किमहं
निवर्त्तें यत् स्यां चेन्न रघुपतिदौत्येन परवान् ॥ २२ ॥

[इत्याशुल्ल निष्क्रान्तः ।

राव । निरूप्य । अहो! जातिसुलभं चापलमप्रतीकार्य्यम् ।

प्रह । देव ! निदेशाक्षरमालिकापरिग्रहायोत्कण्ठते हृदयम् ।

राव । किमत्रापि प्रष्टव्यो निदेशः ?

(52) कोटप्रख्यामभितोऽर्गलानि भुवनप्रख्यातसारोद्भवैः
पाद्यन्तां परितो रथानि च परव्याक्षेपिभी राक्षसैः ।
मथ्यन्तां रिपुघस्मरप्रहरणं विक्षोभ्य भङ्क्त्वा भुजाः
खण्ड्यन्तां च मुहुर्विवल्गनहतोत्थानोत्कटा मर्कटाः ॥२३॥

---

(51) अहं चेत् यदि रघुपतिदौत्येन रामस्य दूतत्वात् न परवान् न पराधीनः स्यां तदा अहं यथासंख्यं शिरःसंख्यया तीक्ष्णस्य क्रकचस्य करपत्रस्य इव विषमाणां क्रूराणां नखराणां प्रगल्भेन व्यापारेण विदारणेन प्रमथिताः शिरोबन्धाः उष्णीषाः येषां तैः अतएव शिथिलैः ते शिरोभिः दिग्भ्यो बलिम् अनुपहृत्य अप्रदाय किं निवर्त्ते । सर्वथा नवोष्णीषान् हरामीति भावः ।

(52) भुवने प्रख्यातः सारः वीर्यं येषां तैः उद्भवैः राक्षसैः अभितः अर्गलानि लोकानां द्वाराणि अपाक्रियन्तामिति भावः । परव्याक्षेपिभिः

प्रह। यदाज्ञापयति महाराजः। [इति निष्क्रान्तः।

नेपथ्ये महान् कलकलः।

सर्वे। सभ्रममाकर्णयन्ति।

पुनर्नेपथ्ये।

(53) बध्यन्तेऽस्रपपुङ्गवाः प्रतिभयाभोगैः प्लवङ्गाधिपै-
र्बध्यन्ते च वितर्दिकाः प्रतिदिशं क्रुद्धैरदोमूर्द्धभिः।
छिद्यन्ते च वहिः प्रपित्सव इमे मध्ये क्रुधान्धाः क्षणाद्
भिद्यन्ते पुरगोपुराः प्रतिदिशं विप्लैश्च गण्डोपलैः ॥२४॥

राम। अर्द्धमवलोक्य सक्रोधसंत्रासं च। कथमेते तपस्वि-पक्षपातादनाक्रम्या वासवपुरःसरा दिवौकसोऽपि मत्सरिणो विलुम्पन्ते। तद्देवि! त्वमभ्यन्तरे प्रविश। अहमपि तावत्

शत्रुविमर्दनकारिभिः राक्षसैः परितः सर्वतः रक्षांसि च पाद्यन्तां वानरैः सह युद्धानि च क्रियन्ताम्। रिपुशरं शत्रुनाथि प्रहरणं यत्नं भङ्क्त्वा विलोठ्य भ्रमयित्वा भुजाः मथ्यन्तां विलोड्यन्ताम्। विवल्गनेन आस्फन्देनैव दृप्त्योत्थानेन निष्कलीकृत्वा उत्कटाः दुर्मदाः भर्कटाः वानराश्च सुहृदः खण्ड्यन्तां विनाश्यन्ताम्।

(53) अस्रं रक्षं पिबन्तीति अस्रपाः राक्षसाः तेषां पुङ्गवाः श्रेष्ठाः प्रतिभयाभोगैः भीमशरीरैः प्लवङ्गाधिपैः यूथपैः बध्यन्ते क्रन्द्यन्ते। अमीषां राक्षसानां क्रुद्धैः छिन्नैः मूर्द्धभिः शिरोभिः च प्रतिदिशं सर्वतः वितर्दिकाः वेदिकाः बध्यन्ते निर्मीयन्ते। वहिः प्रपित्सवः प्राप्तुमिच्छवः बोढुं निर्गच्छन्तः इमे राक्षसाः क्रुधा क्रोधेन

(54) कैश्चिद्दोर्भिः प्रमत्तान् प्लवगपरिवृढान् दिक्षु विक्षिप्य दृप्तै-
रन्यैः पिष्ट्वापि युद्धाभिनयविधिनटौ तौ तपस्विप्ररोहौ ।
श्लिष्टैः कृत्वा स्वचेतःप्रतिफलितदृथारम्भमात्रप्रविष्टान्
दुष्टांस्तैर्विष्टपानप्यपगतकरणस्तैर्बिभर्मि स्वकारान् ॥ २५ ॥

[इति विकटं परिक्रम्य निष्क्रान्तः ।

ततः प्रविशति रथेन सपरिवारो वासवः सूतश्च मातलिः ।

मात । देव दिवस्पते ! यथा तावदधिलङ्कमेषः

(55) संवर्त्तप्रकटविवर्त्तसप्तपाथो-
नाथोर्मिव्यतिकरविभ्रमप्रचण्डः ।
निर्घोषः स्फुरति भृशं परःसहस्र-
व्यावल्गत्प्रबलगतागतास्त्रपाणाम् ॥ २६ ॥

अन्याः संख्याः मध्ये अन्तरा प्राग् निष्क्रमणादिति भावः छिद्यन्ते । क्षिप्तैः भग्नोपलैः गलद्गैलैः पुरश्च गोपुराश्च प्रतिदिशं भिद्यन्ते भज्यन्ते ।

(54) कैश्चिद्दोर्भिः भुजैः प्रमत्तान् प्लवगपरिवृढान् वानरसुख्यान् दिक्षु विक्षिप्य, दृप्तैः क्षुभ्यद्भैः अन्यैः भुजैः युद्धस्य अभिनयविधौ प्रयोगकर्मणि नटौ योधाविति भावः तौ तपस्विप्ररोहौ तापसश्रेष्ठौ वनवासिनाविति भावः रामलक्ष्मणौ पिष्ट्वापि अवमृद्यापि कृत्वेत्यर्थः, श्लिष्टैः विंशतेः भुजानाम् अवश्लिष्टैः स्वचेतसि प्रतिफलिते मनःकल्पित इति भावः दृथारम्भमात्रे प्रविष्टान् दृथोन्मत्तानिति भावः दुष्टान् तैर्विष्टपान् देवान् कृत्वा आक्रम्य अपगतकरणः निर्दयः सन् तैः स्वकारान् मम चारकं बिभर्मि पूरयामि ।

(55) संवर्ते प्रलयकाले प्रकटः स्फुटः विवर्त्तः भ्रमः येषां तेषां सप्तानां पाथोनाथानां समुद्राणाम् ऊर्मीणां कल्लोलानां व्यतिकरस्य

Digitized by Google

तथा तर्कये युयुत्सया निर्यियासति नक्षञ्चरचक्रवर्त्तीति ।

राम । सूत ! पश्य पश्य ।

(56) दृढतरमभियोगं वीक्ष्य रक्षोविनेता
सह तनुजसगर्भप्रेष्यरक्षःसहस्रैः ।
सरभसमररात्रि द्रागपाहृत्य विद्रा-
वितनिखिलवनौका निर्गतोऽयं नगर्याः ॥ २७ ॥

यन्त्रवत्कं नाटयित्वा । आः क एषः कौवेर्याः ककुभः क्षणत्-कनककिङ्किणीजालमालिना विमानेन सरभसमित एवाग-च्छेति ।

सूत । (57) निर्वर्त्य । देव ! भवतैव गन्धर्वराज्याधिपत्या-भिषेकक्षतमहाप्रसादश्चित्ररथः ।

सम्मोदस्य विभ्रमः भ्रान्तिः इव प्रचण्डः परःसहस्राणाम् असंख्यानां व्यावल्गतां त्वरमाणानां प्रवलानां गतानाम् आगतानां च अश्वपानां राक्षसानां निर्घोषः भयम् अत्यन्तं स्फुरति उद्रेति । तर्कये सम्भाव-यामि नक्षञ्चराणां रजनीचराणां चक्रवर्ती अधिपः रावणः युयुत्सया योद्धुमिच्छया निर्यियासति निर्गन्तुमिच्छति ।

(56) दृढतरम् अभियोगम् आक्रमणं वीक्ष्य दृष्ट्वा अयं रक्षसां विनेता यासकः रावणः तनुजानां पुत्राणां सगर्भाणां बन्धूनां प्रेष्याणां सेव-कानां च रक्षसां सहस्रैः सह प्राक् झटिति सरभसं जवेन अरात्रि कवाटानि अपाहृत्य उद्घाट्य विद्रावितः निक्षिप्ताः सर्वाः वनौकसः वानराः येन स यथा नगर्याः निर्गतः । कौवेरी ककुप् उत्तरा दिक् ।

(57) "यन्त्रदयानां भ्रान्त्यानधिको युद्धैः योऽयमिन्द्ररथो नाम

Digitized by Google

ततः प्रविशति विमानाधिरूढश्चित्ररथः ।

चित्र । जयति जयति देवराजः ।

वास । गन्धर्वराज ! समरदिष्टवानिभरं किं चेतः ?

चित्र । तदप्यन्यदपि ।

वास । किमन्यत् ?

चित्र । (58) अलकेश्वरनिदेशः ।

वास । कौटस्थः ?

चित्र । (59) दुर्बोधो जनिदिवसान्मम प्रहर्षः
कोऽप्याधिः प्रबलतमोऽथवा त्रिलोक्याः ।
तस्येदं निधनदिनं विधेर्विलासात्
कल्याणी परिणतिरस्तु वान्यथा वा ॥ २८ ॥

तदवगन्तुमहं प्रहितः ।

सम्भूत्यन्नः । स किल सकलत्रिभुवनप्रख्यातपराक्रमो भगवताऽऽत्मसदृशेन सुहृच्छब्देनोपदर्शितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यं यौवत एवाप्नवान् ।" इति कादम्बरी ।

(58) अलकायाः नगर्याः ईश्वरस्य नाथस्य कुबेरस्य निदेशः आज्ञा ।

(59) रावणस्य जनिदिवसात् जन्मदिनावधि मम दुर्बोधः दुर्निवार्यः कोऽपि अचिन्त्यः आधिः मनस्तापः प्रहर्षः । अथवा त्रिलोक्याः त्रिभुवनस्य प्रबलतमः आधिः प्रहर्षः, निरन्तरनिर्भोगात् । तस्य रावणस्य विधेः दैवस्य विलासात् इदं निधनदिनम् । कल्याणः परिणामोऽस्तु न वेति अवगन्तुं ज्ञातुं रामरावणयुद्धदर्शनायेति भावः । अहं कुबेरेण प्रहितः प्रेरितः ।

Digitized by Google

वाच । (60) सकुल्यानामपीष मनोरथः ।

चित्र । (61) किं चित्रं सहजाः किल ते मिथः शत्रवः । कृत्रिमतापि निधिपुष्पकादिहरणोद्वृत्तेर्दुर्वृत्तस्य सुप्रथिता । अथवा । यावच्चिलोक्यं किल जन्तुजातं

तत् सर्वमस्योद्धतदुश्चरित्रैः ।
कदर्थितं श्रीरघुनन्दनस्य
प्रीत्या विधत्ते विजयप्रतीक्षाम् ॥ २९ ॥

वाच । (62) निरूप्य । गन्धर्वराज ! यदिदमधित्यकातः सुवेलाद्रेरकाण्ड एव प्रबलकिलिकिलाकोलाहलमुखरित-हरिन्मुखं बलीमुखचक्रमक्रमेवोच्चलितम् । तथा मन्ये पतितमेव प्रहरणैरिति ।

---

(60) सकुल्यानाम् एकवंशजानाम् । कुबेरोऽपि विश्रवसः पुत्रः, रा०. ७. २. ६. ।

(61) किं चित्रं नास्त्वर्यमेतत् । यतः भ्रातरावपि कुबेरदशाननौ यतू । रावणः किल ब्रह्मवरं लब्ध्वा कुबेरहस्तात्पुष्पकामाच्छिद्यवान्, रा०. ७. ११. अ०. । परेण चाऽलकायां तं जित्वा "पुष्पकं तस्य जग्राह विमानं जयलक्षणम्" रा०. २. १५. २. । दैत्यस्य दुर्वृत्तस्य दुराचारस्य रावणस्य कृत्रिमता याच्ञा प्रथिता प्रख्याता । अनेन रावणेन कदर्थिताः विप्रकृताः सर्वे त्रिभुवनस्थाः प्राणिनः प्रीत्या रामस्य विजयस्य प्रतीक्षां कुर्वन्ति ।

(62) हरिन्मुखं दिङ्मुखम् । पतितमेव प्रहरणैः अस्त्राणि मुक्तानि रावणेनेति शेषः ।

Digitized by Google

चित्र। देवराज! पश्य पश्य।

(63) अयं रघोनाथः क्षितिधरशिरोबन्धुरतरे
रथे तिष्ठन् प्रष्ठः प्रधनरसनिष्णातमनसाम्।
मुहुर्जीवाघोषैर्बधिरयति दिक्प्रान्तशिखरि-
प्रतिध्वानाघ्मातैर्गगनविवराभोगमभितः॥ ३०॥

वास। (64) गन्धर्वराज! न तुलाधृतस्तावदनयोर्वीरस-
मयोचितः परिकरः। सावेगम्। सूत सूत सांग्रामिकं मे रथ-
मुपहर रामभद्राय। अहमपि गन्धर्वराजाधिष्ठितं विमान-
मेवाधितिष्ठामि। तथा करोति।

सूत। यथाज्ञापयति देवराजः। [इति निष्क्रान्तः।

चित्र। (65) देवराज! कथमतिसन्धेयं तुमुलम्। तथाहि,

---

(63) क्षितिधरस्य पर्वतस्य शिरसि अग्रे इव बन्धुरतरे अतिविषमे रथे तिष्ठन् प्रधनस्य युद्धस्य रसस्य निष्णातानि कुशलानि मनांसि येषां तेषां वीराणां प्रष्ठः अग्रगण्यः अयं रावणः अभितः दिशां प्रान्तस्थेषु शिखरिषु पर्वतेषु प्रतिध्वानेन प्रतिस्वनेन आघ्मातैः स्फीतैः जीवाघोषैः मौर्वीनिनादैः गगनविवरस्य आभोगं विस्तारं मुहुः बधिरयति।

(64) रामरावणयोर्युद्धसज्जा न समाना। "भूमौ स्थितस्य रामस्य रथस्थस्य च रक्षसः। न समं युद्धमित्याहुर्देवगन्धर्वदानवाः॥ देवतानां वचः श्रुत्वा शतक्रतुरमत्सरम्। प्रेषयामास रामाय रथं मातलिसारथिम्॥" इति रा०. ६. ८६. ६–७.।

(65) प्रहस्तानां प्रक्ष्वेड्य मूढात्मभिः रक्षोभिः विपिनौकसां

Digitized by Google

रक्षोभिर्विपिनौकसां परिहृढैरारादपास्तक्रमं
मुष्टीमुष्टि कचाकचि प्रहरणप्रक्षेपमूढात्मभिः ।
प्रारब्धं रणकर्म दुर्धरमिथोनिष्पेषशौर्योद्धतै-
र्निष्ठूतास्त्रभरीभिरेव सरणिर्दुःसञ्चराभूद्यथा ॥ ३१ ॥

अपिच ।

(66) वीराणां कृष्णतुण्डप्रविघटनपटुस्फारदोर्दण्डखण्ड-
व्यापारक्षिप्यमाणप्रतिभटविकटाटोपवर्म प्ररूढः ।
कूटः कोऽप्येष युद्धाजिरभुवि जरठश्चित्रकूटानुकारी
क्षीयन्ते यत्र शत्रुप्रपतनविवशाः कोटिशः शूरकीटाः ॥३२॥

वाच । गन्धर्वराज ! हूत हूतः ।

वानराणां परिहृढैः च आरात् समीपे अपास्तक्रमं विश्लथं मुष्टी-मुष्टि मुष्टिप्रहारैः कचाकचि केशाकर्षणैः । दृच् कर्मव्यतिहारे, पा०. ५. ५. १२७. । दीक्षितेन "पूर्वपदान्तस्य दीर्घः" इति "दण्डादण्डि मुष्टीमुष्टि" इति चोक्त्वाप्युष्टीमुष्टीति पाठोऽत्र निवेशितः । "मुष्टामुष्टि" इत्यन्यपुस्तकानां पाठः । रणकर्म युद्धं प्रारब्धं यथा दुर्धरेण असह्येन मिथोनिष्पेषेण परस्परविमर्दनेन शौर्योद्धतैः दलितेभ्यः वपुर्भ्यः निष्ठू-तानां च्युतानाम् अस्त्राणां रक्षानां भरीभिः प्रवाहैः एव सरणिः मार्गः दुःसञ्चरा दुर्गमा अभूत् ।

(66) वीराणां दृप्तानां शूराणां तुण्डानां मुखानां च प्रवि-घटने विश्लेषणे शिरश्छेदे इति भावः पटूनां दक्षाणां स्फाराणां विशा-लानां दोर्दण्डानां भुजानां खण्डव्यापारेण छेदकर्मणा क्षिप्यमाणेभ्यः प्रतिभटानां प्रतियोधानां विकटाटोपेभ्यः आध्मातेभ्यः वर्मभ्यः

(67) ग्रासप्रोतप्रवीरोल्बणरुधिरपरामृष्टबुक्कालिघत्सा-
धावद्गृध्राधिराजाप्रतिमतनुरुहच्छायया वारितोष्णाः ।
विश्राम्यन्ति क्षणार्द्धं प्रधनपरिसरेष्वेव मुक्ताभियोगा
वीराः यक्षप्रहारव्रणभरुधिरोद्गारदिग्धाखिलाङ्गाः ॥ ३३ ॥

इतोऽपि । (68) प्रतीक्षन्ते वीराः प्रतिसुखमुरोभिः सरभसं
विपक्षाणां क्षेत्नीः प्रतिनियतधैर्यानुभवतः ।
विदीर्णत्वग्भारा दलितपिशिताश्छिन्नधमनि-
प्रकाण्डास्थिन्यायुस्फुटतरविलक्ष्यान्त्रनिवहाः ॥ १४ ॥

देहेभ्यः प्रच्युतः स्खलितः वृक्षालिरभुवि रक्षाङ्गने एव कोऽपि जरठः जीर्णः चिरकूटानुकारी लिकूटसदृशः कूटः प्राग्भारः । यत्र यत्नूनां प्रयत्नेन पातेन विवशाः व्याकुलाः कोटिशः असंख्याः शूरकोटाः कोटसदृशाः वीराः जीवन्ते मूढं तिष्ठन्ति ।

(67) प्राशप्रोतानां निक्षिप्तकुन्तानां तदाकृतानामिति भावः प्रवीराणां उल्बणैः प्रभूतैः रुधिरैः परामृष्टायाः संस्पृष्टायाः बुक्कायाः अपमांसस्य लिघत्सया भोजनेच्छया धावतां गृध्रराजानां अप्रतिमानाम् अनुपमानां तनुरुहाणां लोम्नां छायया वारितोष्णाः निवारितघर्मोष्णाः यक्षप्रहारव्रणानां भरुधिराणां प्रभूतानां रक्तानाम् उद्गारेण दिग्धानि अखिलानि सर्वाणि अङ्गानि येषां ते वीराः मुक्ताभियोगाः युद्धं परित्यज्य प्रधनपरिसरेषु रक्षाङ्गनाङ्गेषु एव क्षणार्द्धं विश्राम्यन्ति । "प्राश-" इत्यत्र "प्राश्न-" इति "वारितोष्णाः" इत्यत्र च "वारितोष्मा" इति लिपेनन्दकीर्तौ पाठौ लिपर्थकौ न वयं जानीमहे ।

(68) प्रतिनियतस्य धैर्यस्य अनुभवतः अनुभवेन वीराः प्रतिसुखम् अभिमुखम् उरोभिः वक्षोभिः विपक्षाणां यत्नूनां क्षेत्नीः यक्षाणि सरभसं

चित्र। (69) देवराज! अपूर्वोऽयं रक्षःपतेः संग्रामावतरणसर्गः। तथाहि,

प्रेष्याः संग्रामसीमन्यनुजयतहतो मेघनादोऽपि पार्श्वे
वामेऽन्यत्र प्रवीरेष्वतिविषममदोद्बोधितः कुम्भकर्णः।
कैकस्या बन्धुवर्गोऽप्ययमतिविकटः पृष्ठतस्तिष्ठमानोऽ-
ध्यास्ते मध्ये निषण्णो रथशिरसि भृशं विन्ध्यवद्दुर्विगाहः ॥२५॥

वास। (70) गन्धर्वराज! एवमभियोगोद्धुरं द्विषन्तमभिवीक्षापि निष्क्रम्य एव रामभद्रः। अथवोचितमेवैतत्। यतः

न काम्यन्ते भक्षणामरुति किल वाति प्रतिदिशं

जवेन प्रतीक्षन्ते भक्षणपतनं सङ्कल्प इति भावः। किम्भूताः वीराः विदीर्णः त्वग्भारः चर्म येषां ते, तथा दलितं पिशितं मांसं येषां ते, तथा छिन्नासु धमनिषु प्रकाण्डास्थिस्नायुषु च स्फुटतरं विलक्षाः दृश्याः अन्ननिबद्धो येषां ते।

(69) सर्गः निश्चयः। तदर्थं रघुः "सङ्काश्च भक्षं यदि सर्ग एव ते" २. ५१. । प्रेष्याः सेवकाः संग्रामसीमनि नासीरचराः। भ्रातृभिः परिवारितो मेघनादः इन्द्रजित् अपि पार्श्वे। अन्यत्र वामे वामतः प्रवीरेषु वीराणां मध्ये विषमदात् निद्रायाः उद्बोधितः उत्थापितः कुम्भकर्णः। अयं अतिविकटः कैकस्याः रावणमातुः बन्धुवर्गः पृष्ठतः तिष्ठमानः। एतेषां मध्ये निषण्णः विन्ध्याचल इव भृशम् अत्यन्तं दुर्विगाहः दुर्धर्षः रावणः रथशिरसि अध्यास्ते उपविष्टः।

(70) अभियोगोद्धुरं युद्धनिर्भरं द्विषन्तं शत्रुम्। भक्षणामरुति

समुन्मूर्च्छत्सारा: कुलगिरिखरिण: किञ्चिदपि ते।
न मर्य्यादां तेऽपि प्रतिजहति गाम्भीर्य्यगरिम-
स्फुरद्ब्रह्मेशाणोऽकलितमहिमानोऽम्बुनिधय: ॥ ३६ ॥

चित्र ! देवराज ! पश्य पश्य ।

(71) भक्तिप्रह्वं कथमपि यवीयांसमुत्कृष्य चापा-
रोपव्यग्राङ्गुलिकिसलयं मेघनादक्षयाय ।
लक्ष्मीकृत्य प्रधनकुशलं सानुजं राघवेन्द्रं
जीवां भूयो रघुपतिदृषा सार्यतः संस्करोति ॥ ३७ ॥

कथमेतदतिदुष्करमिव मन्ये ? तथाहि—

(72) आक्रम्यैकैकमेते रजनिचरभटाः कोटिशः शस्त्रवर्षै-
र्भास्वद्वंशप्ररोहं पिदधति परितः सत्क्रियायौगपद्यात् ।

प्रचण्डानिले प्रतिदिशं वाति वहति सति समुन्मूर्च्छत्सारा: प्रकृष्टवीर्याः ते प्रसिद्धाः कुलगिरिखरिणः कुलपर्वताः किञ्चिदपि न कस्मिन्ने । ते गाम्भीर्यगरिम्णा स्फुरत् यद् ब्रह्मेशाणः ईश्वरस्य जलमूर्त्तिः येषु ते अकलित-महिमानः अम्बुनिधयः समुद्राः अपि मर्यादां न प्रतिजहति नेवां नातिक्रामन्ति ।

(71) मेघनादस्य क्षयाय वधाय चापस्य आरोपे आकर्षणे व्यग्राः अङ्गुलिरेव किसलयः यस्य तं भक्त्या प्रह्वं नम्रं यवीयांसं कनिष्ठभ्रातरं लक्ष्मणं कथमपि कष्टेन उत्कृष्य त्यक्त्वा प्रधनकुशलं युद्धदक्षं सानुजं राघवेन्द्रं रावणं लक्ष्मीकृत्य रघुपतिदृषा राघवेन्द्रो रामः भूयः सार्यतः सार्येण जीवां धनुर्गुणं संस्करोति मार्ष्टि ।

(72) सत्क्रियायाः शत्रुमर्दने यौगपद्यं समकालक्रिया सङ्कल्पितेति यावत् नेवां ते एते रजनिचरभटाः राक्षसप्रवीराः एकैकं भास्वद्वंश-

Digitized by Google

अथवा किं नाम दुष्करम् ।

एतावप्युभावावकलितमहिमप्राभवौ युद्धभूमा-
विन्धाते यत्नुयक्षप्रविदलनफलस्पष्टवाग्भियोगौ ॥ ३८ ॥

सगलतोऽवलोक्य । अहो कथमेते वनौकसोऽपि महति सपल्लसङ्करे स्वाभिधानयोगमेव ख्यापयन्तः पशुवाः केवलं रामभद्रपादमूलमासेवन्ते । तथाहि—

सुग्रीवः स्वन्दनस्याग्रे, सोऽङ्गदः पृष्ठतः पुनः ।
(73) पशुवा जाम्बुवान् भावी जङ्घाधीशोऽपि पार्श्वयोः ॥३९॥

विचिन्त्य । हनूमान् पुनः कनीयांसं काकुत्स्थम् । सविमर्षम् । वरमेत एवोभयथा रामभद्रपादपद्मोपसेविनः । यतस्तावदेतेषाम्—

(74) स्वामिभक्तिश्च धैर्यञ्च व्याख्याते गात्रमक्षतम् ।
रक्षोऽभियोगस्त्वन्येषां दृश्यते दैन्यमप्यलम् ॥ ४० ॥

प्ररोहं स्कन्धवंशोद्भूतं कोटिशः आक्रम्य परितः सगलतः शल्यवर्षैः पिदधति आच्छादयन्ति । उत्थितः प्रभावः पराक्रमः ययोः तौ, तथा अकलितः अचिन्त्यः महिमा प्राभवं प्रभुत्वं च ययोः तौ, तथा यत्नुयक्षाणां प्रविदलनं मथनं फलं यस्य सः स्पष्टः वाग्भिः अभियोगः युद्धं ययोः तौ एतौ, रामलक्ष्मणौ अपि युद्धभूमौ ध्यायते उद्भासेते । सपल्लसङ्करे यत्नुयुद्धे । स्वाभिधानानां स्वनाम्नां योगम् औचित्यमेव ख्यापयन्तः प्रकटीकुर्वन्तः । पशु वा घट् वा पशुवाः उपपशुवाः ।

(73) जाम्बुवान् ऋक्षराजः । भावी जङ्घाधीशः विभीषणः । कनीयांसं काकुत्स्थं लक्ष्मणम् । ७७ टीकां पश्य ।

(74) एतेषाम् अक्षतं गात्रं स्वामिभक्तिञ्च धैर्यञ्च व्याख्याति प्रदर्श-

Digitized by Google

वाच । (75) गन्धर्वराज ! मानुषे लोके वाग्बलं नाम केवलमखिलेन्द्रियवशीकरणचूर्णमुष्टिः । यतः

सौमित्रिः शतहस्तताप्रभृतिभिर्न्यूनो न कैश्चिद्गुणैः
सारेणापि पुनः प्रसिद्धमहिमा शौर्य्यायणी रावणिः ।
द्वित्वं तुल्यतरे किल व्यतिकरे रामस्य रक्षःप्रभो-
रान्योन्यं शरदृष्टिरेव वलते दृष्टिस्तयोर्वत्सला ॥ ४१ ॥

चित्र । देवराज ! युक्तमेवैतत् । एवं वाक्सत्यमनुरुध्यन्ते किल महात्मानः । साद्भुतोऽत्तक्यम् । पश्यतु देवराजः ।

(76) सौमित्रेर्वाणवर्ष्मैरधिकतरममी मर्म्मवेधं प्रविद्धाः
धावन्तः क्ष्माधरेन्द्रा इव रजनिचराः श्येरते युद्धसौम्नि ।
रक्षोनाथोऽपि पुत्रान् कतिचन पतितान् वीक्ष्य रामाभियोगं

यति । अन्येषां वानराणां रक्षोभिः अभियोगो दृश्यते, अयं पर्वाग्रं दैन्यमपि दृश्यते ।

(75) इन्द्रियवशीकरणे चूर्णमुष्टिः इन्द्रियमोहनमिति भावः । सौमित्रिः लक्ष्मणः कैश्चित् शतहस्तताप्रभृतिभिः दाक्ष्यादिभिः गुणैः न न्यूनः हीनः । पुनः शौर्यायणिः शूरत्वेन प्रसिद्धः रावणिः रावणनन्दनः मेघनादः सारेणापि प्रसिद्धमहिमा । द्वित्वं तुल्यतरे किल तयोः व्यतिकरे युद्धे रामस्य रक्षःप्रभोः शरदृष्टिरेव अन्योन्यं वलते आवहतीति, वत्सला दृष्टिस्तु तयोः लक्ष्मणरावणयोः उपरि वर्तत इति शेषः ।

(76) सौमित्रेः वज्रसदृशैः वाणैः अधिकतरं मर्मवेधं समर्मघातं प्रविद्धाः भिन्नाः धावन्तः क्ष्माधरेन्द्राः महापर्वता इव अमी रजनिचरा युद्धसौम्नि श्येरते स्थिता इत्यर्थः । रक्षोनाथः रावणोऽपि कतिचन पुत्रान् पतितान् भूमिशायिनः वीक्ष्य रामेण अभियोगं संलक्ष्य

संत्यज्यानिष्टशङ्की निपतति तरसा मेघनादोपकण्ठम् ॥४२॥
तदेतदत्याहितमाशङ्के ।

वाच । (77) गन्धर्वराज ! किमत्र नामात्याहितम् अपरिच्छेद्यमहिमानः किलैते ककुत्स्थकुलप्ररोहाः । तथाहि—
परःसहस्रा रजनीचरेन्द्रा यथास्य वीरस्य किलैकलक्ष्यम् ।
तथा रणेष्वद्भुतवीरगोष्ठीभूषायमाणो दशकन्धरोऽपि ॥ ४३ ॥

किल । (78) देवराज ! बहुभिरेकस्याभियोगेऽपि शुभोदर्कतत्येतद्बहुव्यक्तिनिष्ठम् । सचमत्कारम् । इतोऽवधत्तां देवराजः ।

(79) रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छुः
शुभ्यत्युच्चै रघुपतिशरैः कीलितः कुम्भकर्णः ।

अनिष्टशङ्की अशुभं शङ्कमानः तरसा मेघनादोपकण्ठं मेघनादान्तिकं निपतति धावति ।

(77) ककुत्स्थकुलप्ररोहाः रघुनन्दनाः । इक्ष्वाकुपौत्रः परञ्जयो दनुरूपिणः यतक्रतोः ककुत्स्थोऽसुरान् निजघान । ततश्चासौ ककुत्स्थसंज्ञामवाप, वि०. ४. २. १२. । वीरगोष्ठीषु भूषायमाणः भूषां जनयतीति भावः ।

(78) न बहुषु व्यक्तिषु निष्ठा अवस्थानं यस्य तत् । न खलु जयः संख्याधीनः इति भावः ।

(79) इतः सरभसं जवेन निर्गते रक्षोनाथे रावणे, विग्रहेच्छुः युद्धाकाङ्क्षी कुम्भकर्णः रघुपतेः शरैः कीलितः आविद्धः उच्चैः शुभ्यति । तस्य पुत्रः कुम्भोऽपि पितुः एतान् उपसत्तान् उपस्थितां वस्थाम् अवस्थां

कुम्भोऽप्येतां पितृव्यतां वीक्ष्य वध्यां वपुष्मान्
गर्वः किंवा निपतति जवात्सङ्गमः क्ष्माधरेन्द्रः ॥ ४४ ॥

अद्भुतम् । अहो क्षिप्रसञ्चारिता मर्कटजातेः । यतः

(80) उद्दिश्याराद्दशरथकुलाङ्कुरमाद्यं पतन्तं
सद्यः कुम्भं सधभुवि कपिः कोऽपि मध्ये करोध ।

सविस्मयं निर्वर्ण्य । कथं सुग्रीव एव । सविचिकित्सम् ।

दोस्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ
क्रान्त्वाप्येनं प्रतिघविवशो माषपेषं पिपेष ॥ ४५ ॥

सायक्षम् । (81) एतन्निरीक्ष्य निपपात च कुम्भकर्णः
सुग्रीवमुग्रतरविद्रुतिरग्रहीच्च ।

वीक्ष्य वपुष्मान् मूर्तः गर्वः किंवा अथवा जङ्गमः क्ष्माधरेन्द्रः महीधर इव जवात् निपतति धावति ।

(80) आद्यं प्रथमं दशरथस्य कुलस्य अङ्कुरं रामम् उद्दिश्य पतन्तं धावन्तं कुम्भं सधभुवि रणाङ्गने कोऽपि कपिः सद्यः सपदि मध्ये करोध । अथ दोस्तम्भाभ्यां भुजदण्डाभ्यां सरभसं जवेन आपीड्य निर्मथ्य भूमौ निक्षिप्य क्रान्त्वा दलित्वा अपि प्रतिघविवशः क्रोधान्धः एनं माषपेषं पिपेष माषवत् चूर्णीचकार ।

(81) उग्रतरा प्रचण्डा विद्रुतिः धावनं यस्य स सुग्रीवम् अग्रहीत् । निपुणः स सुग्रीवः अपि स्वम् आत्मानम् उन्मोच्य मोचयित्वा अनुसृत्य कुम्भकर्णस्य नासां स्वसुः शूर्पणखायाः च लक्ष्मां युगपत् समं निश्चर्तं लिक्षवान् । भगिन्याः सदृशं चकारेति भावः । "तमभ्युपेत्याद्भुतघोरवीर्यः स कुम्भकर्णो युधि वानरेन्द्रम् । जहार सुग्रीवमभिप्रगृह्य यथार्भको गरुडप्रचण्डः ॥ ... ततः करायैः सहसोर्ध्व-

उन्मोच्य सोऽपि निपुणः क्षममुत्थ नासां
लज्जां क्षणेन युगपत् किल निश्चकर्त्त ॥ ४६ ॥

माव । गन्धर्वराज ! द्रुत द्रुतः ।

(82) लघुरघुपतिरेष राक्षसाना-
मधिभुवि किञ्च कुमारमेघनादे ।
किमपि चरितमद्भुतं व्यतानीत्
सपदि यथा प्रतिघान्धतामधत्त ॥ ४७ ॥

अहह ! इदमतिदुष्करं प्रतिसंविधानमापतितमस्य रघुपतेः । तथाहि—

(83) यावन्मन्त्रप्रभावादनधिगतगतीन् मेघनादप्रयुक्तान्
दुर्भेद्यान्नागपाशान् विहगपरिवृढास्त्रप्रयोगाद्व्यधूनोत् ।
तावद्रक्षोविनेता पुनरतिरभसं मर्म्मणि क्रोधभूम्ना
गाढं विद्धः शतघ्ना चतुरमति सहसा मोहनिघ्नो न्यषण्णत् ॥ ४८

मेत्य राजा हरीणामधरेन्द्रशत्रोश्चकर्त्त कर्णौ दशनैश्च नासां ददार पार्श्वेषु च कुम्भकर्णम् ॥" रा०. ६. ४६. अ०. ।

(82) एष लघुः कनीयान् रघुपतिः लक्ष्मणः राक्षसानाम् अधिभुवि प्रधाने रावणे किञ्च पुनः कुमारे मेघनादे किमपि अद्भुतं चरितं व्यतानीत् वितनुतवान् दिव्यास्त्रं प्रयुक्तवानिति भावः यथा सपदि सद्यः तयोः प्रतिघान्धतां क्रोधान्धताम् अधत्त संघटितवान् ।

(83) यावत् लक्ष्मणः मन्त्रप्रभावात् विहगपरिवृढस्य पक्षीन्द्रस्य गरुडस्य अस्त्रस्य प्रयोगेण मेघनादेन प्रयुक्तान् क्षिप्तान् अनधिगतगतीन् अप्राप्तप्रसरान् दुर्भेद्यान् नागपाशान् व्यधूनोत् विचिक्षेप तावत् पुनः रक्षोविनेता राक्षसाधिपेन क्रोधभूम्ना क्रोधभरेण अति-,

Digitized by Google

चित्र । (84) देवराज! अयमत्राद्भुततरो विमर्दः । यदा तु भ्रातुर्मोहमधिगम्य भाविलङ्केश्वरादक्रममेव करुणवीरानुभावभावितचित्तवृत्तिस्तथाविधस्यापि दर्शनोत्सुकः समवरुध्यत परितः कुम्भकर्णप्रमुखया रक्षःपृतनया, तदा पुनरिदमेव प्रत्यक्षार्षीत् । तथाहि—

(85) पुरां जेता पूर्वं त्रिपुरविजये यामुदवहत्
स्थितिं तामेवायं रघुपतिरुषाश्रित्य वपुषा ।
क्षणाद्रक्षोनाथानुजमिषुभिराच्छिद्य कणश-
स्तनूं भस्मीकृत्याप्यनुजमभियात्युत्सुकतमः ॥ ४९ ॥

निर्वर्ण्य । (86) अहो वात्सल्यमहिमा रघुपुङ्गवस्य! येन

रभसम् अतिजवेन शतघ्नी मर्मणि याढं विद्धः । "शतघ्नी तु चतुस्ताला लौहकण्टकसञ्चिता । यष्टिः" इति कोशवः । सहसा मोहवशीभूतः सन्नमति तस्य शरीरे न्यपतत् निपपात । निपततेर्वुञ्जि रूपम् । "शक्त्या निर्भिन्नहृदयः पपात भुवि लक्ष्मणः" इति रा०, ६, ८, ३८ ।

(84) रक्षःपृतनया राक्षससेनया परितः समन्ततः समवरुध्यत वेष्टितो बभूव ।

(85) पुरां त्रयाणां पुराणां जेता शिवः पूर्वं पुरा त्रिपुरविजये (१, १०८, टीकां पश्य) यां स्थितिम् उदवहत् बभार । अयं रघुपतिरुषा रामः वपुषा तामेवाश्रित्य क्षणात् रक्षोनाथानुजं कुम्भकर्णं इषुभिः बाणैः कणशः आच्छिद्य खण्डखण्डं कृत्वा चमूं सेनाम् अपि पावकास्त्रेण भस्मीकृत्य उत्सुकतमः अतित्वरः अनुजं लक्ष्मणम् अभियाति अभ्येति । अयमित्यत्राद्येति तृचेनष्टहीतः पाठः ।

(86) यातुधानाधीशेन राक्षसाधिपेन रावणेन । बहुक्षतानि

पुनर्विषयीकृतमात्मानमेवानुजस्यावस्थामभिजानाति स्म। परितो निरूप्य, सदृशम्। हिष्ट्या खल्वि रघुकुलकुमाराभ्यामेताभ्यामुत्पश्यामि। यतस्तावदेतयोरस्मिन् व्यसनमहार्णवे यातुधानाधीशेनापि सपरिवारेण कुम्भकर्णवधात् संभ्रान्तम्। पुनरेतौ निर्वर्ण्य। कथमद्यापि प्रमुग्धाविव। विषमो ध्यानव्यतिकरस्तावदापतितः। यतः

बहुच्छलानि रक्षांसि रिपवस्त्ववशः स्वयम्।
एषावस्थापि कपयः सहायास्तेऽपि विह्वलाः॥ ५०॥

तत् किमुपक्रमं दैवमचेति न जाने।

वाच। (87) गन्धर्वराज! किमेवमाशङ्कसे? पश्य। जीवव्यतिबोधितः किलायमचिन्त्यमहिम्नां प्रथमः प्राभञ्जनिः। सम्प्रति—

उत्स्फूर्जद्रोमकूपः प्रलयपरिमिलत्पांशुवर्षानुकारी

नानामायानि रक्षांसि रिपवः। स्वयं रामस्तु अवशः संमूढः। ते कपयोऽपि विह्वलाः संभ्रान्ताः। कः उपक्रमः आरम्भः अस्य तत् किमुपक्रमम्।

(87) अचिन्त्यमहिम्नां महाप्रभावाणां प्रथमः मुख्यः प्राभञ्जनिः हनूमान्। उत्स्फूर्जन्तः स्फुरन्तः रोमकूपाः यस्य स रोमाञ्चकण्टकितगात्रः, अत एव प्रलयकालीनस्य परिमिलतः पांशुवर्षस्य धूलिरायेः अनुकारो विडम्बी सदृश इति भावः, किञ्चिद्भुग्नस्य क्षोककुञ्चितस्य कपिपुच्छस्य लाङ्गूलाग्रस्य अप्रतिमेन अद्भुतेन विचलनेन कम्पेन अपास्तं गगनात् विच्छिन्नं नक्षत्रचक्रं तारासमूहः येन सः, भूम्ना अतिशयेन औत्सुक्यस्य अनुरूपा सदृशी व्यवस्थितिः यत्नो यस्य सः,

Digitized by Google

किञ्चिद्भुम्नाग्रपुच्छाप्रतिमविचलनापास्तनक्षत्रचक्रः ।
भूक्षोत्सुक्यानुरूपव्यवसितिरधिकं पर्य्यवप्लुत्य गत्वा
क्वापि प्राप्तः क्षणार्द्धात् कमपि गिरिमसावाहरन्नाजगाम ॥५१॥

चित्र । विभाव्य सोल्लासम् । देवराज ! पश्य ।

(88) यथा चन्द्रालोकं कुमुदनिवहस्तुम्बकमणिं
दृषत्सारस्पृक्त्वामृतमपि भवाम्भोनिधिगतः ।
तथा सम्भाव्यैतौ हनुमदुपनीताद्रिमरुतं
झटित्युल्लृम्भेते, किमपि गहनो वस्तुमहिमा ॥ ५२ ॥

अधिकम् उच्चैः पर्यवप्लुत्य वल्गित्वा क्वाऽपि कुत्रापि गत्वा प्राप्तः असौ हनूमान् कमपि गिरिं पर्वतं क्षणार्द्धात् निमेषमात्रेण आहरन् आनयन् आजगाम निहतः । "द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः" इति वि०, २, ४, २६, श्लोकं स्मृत्वेत्यर्थः समभेऽङ्के हनुमता द्रोणाद्रिमाहरणमुक्तम् । श्रीधरेणाप्यस्य "यस्य हनुमताऽऽनीय प्रतिनीतः" इति व्याख्या योजिता । रा०, पुनः "नाध्यगच्छमहं तस्मिन्नोषधीं गन्धमादने । ततोऽयं शिखरः क्षिप्तो गिरेस्तस्य मयाऽहृतः ॥" ६, ८२, ४१, इति पठते ।

(88) चन्द्रस्य आलोकं सम्भाव्य यथा कुमुदानि उल्लृम्भन्ते विकसन्ति । यथा चुम्बकमणिम् अयस्कान्तं सम्भाव्य दृषतः उपलस्य सारः लौहः उल्लृम्भते तदभिमुखं धावति । यथा वा भवे एव अम्भोनिधौ वस्तुत्वे गतः मग्नः संसारमायाविप्लवः पुरुषः तत्त्वामृतं परमज्ञानम् अधिगम्य उल्लृम्भते मुक्तिं प्राप्नोति । तथा एतौ रामलक्ष्मणौ हनुमता उपनीतस्य अद्रेः मरुतं वायुं सम्भाव्य झटिति विगतमोहौ भवतः । वस्तोः महिमा किमपि गहनः अत्यन्तं दुर्बोधः ।

Digitized by Google

दक्षिणतो विभाव्य । (89) अयमेष लङ्केश्वरः ? कल्पावसाननिर्मर्यादं पाथ इव पाथोनाथस्य राक्षसबलमाकर्षन् पुनरभ्यमित्रमेति । विक्रम्य । सम्प्रति तु धर्मयुद्धसम्भावनाप्रतिहतबहुतरप्रधानव्यक्तिरावणमेघनादशेषमेतद्राक्षसबलमेताभ्यामवगणितमित्येतावप्युभौ न गणयन्ते परःसहस्रमप्यल्पकीटाः । पुनर्ब्रह्मणं विवर्ण्य । एवं तु—

(90) घ्राणोत्कीर्णो मणिरिव घनाभोदमुक्तो विवस्वान्
निःक्रोशोऽसिर्भ्रुटिति विगलत्कञ्चुकः पन्नगेन्द्रः ।
दीव्यत्युच्चैर्लघुरघुपतिः, किन्नु वा स्यात्, किमन्यद्-
दिव्यौषध्या जयति महिमा कोऽप्यचिन्त्यानुभावः ॥५२॥

निरूप्य । (91) कथं प्रक्रान्तमेव ऋषिराक्षसनासीरचरयोर्भटयोः पुनरायोधनम् । तथाहि,

---

(89) पाथोनाथस्य समुद्रस्य कल्पावसाननिर्मर्यादं प्रलयपरिक्षुब्धम् । पाथः जलम् । अभ्यमित्रम् अभिमुखं यतोः अभिमुखम् । अल्पकीटाः क्षुद्राः राक्षसा एतौ अपि न गणयन्ते ।

(90) "विकोषनिर्धूतनभोंऽशुसेः फणावतश्च त्वचि विच्युतायाम् ।
निरस्तधूमस्य च रात्रिवक्रैर्विना तमोभेद इवं न रेजे ॥" इति भारविः । लघुः रघुपतिः रामचन्द्रः उच्चैः दीव्यति दीव्यते ।

(91) नासीरचरयोः सेनाप्रधानयोः भटयोः वीरयोः आयोधनं युद्धं पुनः प्रक्रान्तम् आरब्धम् । क्रियायाः युद्धस्य सातत्येन नैरन्तर्येण अपि अकृत्रिमया अकृत्रिमपूर्विकया आक्रान्तानि मनांसि येषां ते, तथा प्रबलतमेन संमर्देन युद्धेन च विदलन्त्याः विदीर्यमाणायाः क्षितेः भूमेः क्षोदैः धूलिभिः पिष्टातकेनेव सुरभीणि वक्षस्तटानि मुखान्तराणि च विभ्रति

शितैर्वाणैरेके वधभुवि परे तीक्ष्णनखरैः
क्रियासातत्येनाप्यहमहमिकाक्रान्तमनसः ।
मिथो विध्यन्ति स्म प्रबलतमसम्मर्दविदलत्-
क्षितिच्छेदैः पिष्टातकसुरभिवच्चस्टभृतः ॥ ५४ ॥

सविशेषं निश्चित्य । (92) तावदन्तरमनयोर्बलयोरधिगम्यमानं प्रातः सन्ध्यायां यावदन्धतमसारुणालोकयोः । तथाहि,

प्रतिक्षणमियं रक्षःपृतना क्षीयतेतराम् ।
यथा, तथा प्लवङ्गानामनन्तगुणतैधते ॥ ५५ ॥

वाच । (93) गन्धर्वराज ! पुनरितो महत् कदनमुपक्रान्तम् ।

रक्षोनाथो रघूणां त्वरितमधिभुवा रावणिर्लक्ष्मणेन
द्वन्द्वीभूय प्रवृत्तभुजबलमहिमाविष्कृतेष्वासशिक्षौ ।

वहन्ति ये ते, भटाः एके राक्षसाः शितैः तीक्ष्णैः बाणैः, परे वानराः तीक्ष्णनखरैः मिथो परस्परं विध्यन्ति मथ्नन्ति स्म ।

(92) अन्धतमसं घनान्धकारम् । रक्षसां पृतना सेना यथा क्षीयतेतराम् अत्यन्तं ह्रासमुपैति । तिङन्त, पा०. ५. ३. ५६. इति तरप्, बादाम्बद्रव्यप्रकर्षे, पा०. ३. ११. इत्यासुप्रत्ययः । तथा वानराणाम् अनन्तगुणता असंख्यवाराधिक्यम् एधते वर्धते ।

(93) कदनं मारणम् । रक्षोनाथः रावणः त्वरितं शीघ्रं रघूणाम् अधिभुवा प्रधानेन रामेण, रावणिः मेघनादः लक्ष्मणेन द्वन्द्वीभूय, अमू द्वन्द्वौ प्रवृत्तप्रभूतभुजबलमहिम्नि आविष्कृता दृष्टासस्य बाणक्षेपस्य कार्मुकस्य शिक्षा अभ्यासः याभ्यां तौ उचितां दिव्यास्त्राणां प्रयोगस्य प्रतिकृतिं प्रतिकारम् आप्नुवानौ लभमानौ, मिथः सैन्ययोः मूर्धतः

दिव्यास्त्राणां प्रयोगप्रतिकृतिमुचितां चाप्नुवानौ मिथोऽमू
मूर्च्छत्कल्पावसानज्वलनपरिभवं सैन्ययोः पर्यदाताम् ॥५६॥

चित्र। देवराज! दुरवरोधोऽयमनयोर्महावीरयोर्मिथो-
विमर्दः। तथाहि,

(94) क्ष्वेडाभिः ककुभः पृषत्कनिकरैर्व्योम द्विधा खण्डिते-
र्देहैर्विद्विषतां धरातलमपि प्रच्छादयन्तौ चिरम्।
कुर्वातेऽस्रजलाविलेक्षणपथान्येतावकाण्डोच्चर-
द्रोमाञ्चानि सवेपथून्यपि मुहुर्वर्त्मानि नः पश्यताम् ॥५७॥

सविशेषं विभाव्य। कथं प्रत्यक्षानुमानाभ्यामुपलभ्यमानमेक-
मेव वस्तु विप्रकृष्टान्तरं सम्पद्यते। तथाहि,

(95) अस्माद्रावणहस्तात्राघवहस्तं तु दशगुणं वीक्ष्य।
अनुमन्येऽनन्तगुणं पार्श्वपतत्कौणपेन्द्रविनिपातैः ॥ ५८ ॥

परितो निरूप्य, सकृतकार्थम्।

प्रसर्पतः कल्पावसानस्य प्रलयस्य ज्वलनस्य अग्नेरिव परिभवं पर्यदातां व्यधत्ताम्। परिददातेर्डुदाञ् रूपम्। उभयसैन्यरुदनं चक्रतुरिति भावः।

(94) क्ष्वेडाभिः सिंहनादैः ककुभः दिशः, पृषत्कनिकरैः बाणैः व्योम नभः, विद्विषतां शत्रूणां द्विधा खण्डितैः देहैः धरातलमपि चिरं प्रच्छादयन्तौ एतौ पश्यतां नः अस्माकं वर्त्मानि देहानि मुहुः अस्रजलेन आविलाः दृक्पथाः लोचनानि येषु तानि, तथा अकाण्डे उच्चरन्तः आविर्भवन्तः रोमाञ्चाः येषु तानि, तथा सवेपथूनि कम्पितानि अपि कुर्वाते।

(95) पार्श्वे पततां कौणपेन्द्राणां राक्षसभटानां विनिपातैः नाशैः अनन्तगुणम् अनुमन्ये। अतोऽनुमानोपलब्धिर्न दर्शनसमाना।

(96) यावन्तो रजनीचराः प्रहरणोद्घूर्णद्भुजाकेतवो
युध्यन्तोऽभिमुखाः स्फुरद्रजमदाध्माताः पुरो निर्गताः ।
प्रक्षिप्ताशुगजालपक्षपवनाधूते प्रतापानले
चित्रं दाशरथेः क्षणाच्छलभतां यान्ति स्म सर्वेऽपि ते ॥५९॥
विस्मयम् । (97) एव किलेयं पाञ्चभौतिकी सृष्टिः ।

त्रैलोक्यमप्यपर्याप्तं रक्षसां स्थातुमप्यदः ।
येषां, ते केवलं भूमौ विलिल्युः पञ्चतां गताः ॥ ६० ॥

वाच । (98) गन्धर्वराज ! पश्य विस्मयनीयविप्रलब्धौ किलामू रामलक्ष्मणौ । यतः—
एताभ्यां राघवाभ्यां सकृतुकमिषुभिश्छिद्यमानेषु मूर्द्ध-

---

(96) यावन्तः प्रहरणानि शस्त्राणि उद्घूर्णन्तः आस्फालयन्तः भुजा एव केतवो येषां ते, रजनिचराः राक्षसाः अभिमुखाः युध्यन्तः स्फुरद्भुजगर्वेण आध्माताः उत्सिक्ताः पुरः अग्रे निर्गताः, चित्रं आश्चर्यं सर्वेऽपि ते दाशरथेः रामस्य प्रक्षिप्तेन आशुगजालेन बाणसमूहेन पक्षपवनेन पार्श्ववायुना आधूते चालिते प्रतापानले क्षणात् क्षुद्रतेन शलभतां यान्ति स्म पतङ्गवृत्तिमन्वकुर्वन् दाहमगमन् । यद्यपि पाक्षिणिना युधेरात्मनेपदत्वं कथितं तथाऽपि "स्त्रियोऽपि यत्र युध्येयुः" "युध्यतो स्खलाघवम्" इत्यादि बहुलः परस्मैपदप्रयोगो दृश्यते ।

(97) पाञ्चभौतिकी पञ्चभूतमयी । अदः इदं त्रैलोक्यम् अपि येषां रक्षसां स्थातुम् अवस्थानाय न पर्याप्तम् । ते पञ्चतां गताः मृताः केवलं भूमौ विलिल्युः विलीनाः ।

(68) विस्मयनीयः विस्मयार्हः विप्रलब्धः प्रतारणा ययोः तौ एताऽपि राक्षसराक्षसीमायया वञ्चितावित्याश्चर्यम् । 'एताभ्यां राघवाभ्याम्'

Digitized by Google

खेकस्यैकोऽप्यनल्पः किमु सरसगुणो वर्णनीयोऽपरस्य।
एतत् संपश्यतोरप्यतिचिरमनयोः कोऽप्यचिन्त्यः प्रभावो
यत्रोत्साहो न धैर्यादिरमति न शिरश्छेदतः पत्रिणोऽपि ॥६१

नेपथ्ये। भो भोः रामभद्र! किमद्यापुपेक्षसे दुर्वृत्तमेनम्? कथं वैकक्रियासाध्यमेतावन्तमर्थम्? अवधत्स्व तावत्—

(99) भवान् सीतां, लोकस्त्रिभुवनगतः प्रीतिमुचितां,
कनीयान् पौलस्त्यः पुरममरतां स्वां पुनरयम्।
किमत्राप्यत् साक्षात्कृतपरमतत्त्वो मुनिगणः
प्रसादप्रोन्मीलन्मुदि मनसि शान्तिं च लभताम् ॥ ६२ ॥

चित्र। विष्कम्भः। कथमेष दिव्यर्षिगणोऽभ्येतयोर्वधाय

दूषणजनरवाकर्णनात् रावणस्य विप्रलम्भाभावात् 'रामलक्ष्मणौ' इत्यत्र 'रामरावणौ' इति पाठः प्रायेण लिपिकरप्रमादजः। एताभ्यां राक्षसाभ्यां रामलक्ष्मणाभ्यां सकृत्कृतम् दृष्टिभिः बाणैः छिद्यमानेषु मूर्द्धसु एकस्य रावणस्य एकोऽपि मूर्द्धा अनल्पो भवतीति शेषः न खलं गच्छति, अपरस्य मेघनादस्य सरसगुणः सारवत्ता किमु वर्णनीयः अवश्य इति भावः। एतत् शिरसां पुनरुत्थानम् अतिचिरं सम्पश्यतोः अपि अनयोः रामलक्ष्मणयोः कोऽपि अचिन्त्यः प्रभावः यत्र उत्साहः धैर्यात् न विरमति धैर्यं न जहाति, पत्रिणः शरा अपि शिरश्छेदतः न विरमन्ति।

(99) भवान् सीतां लभताम्। त्रिभुवनस्थः लोकः उचितां प्रीतिं हर्षं लभताम्। कनीयान् पौलस्त्यः विभीषणः पुरं लङ्कां लभताम्। अयं रावणः पुनः स्वाम् अमरतां दिव्यत्वं लभताम्। पूर्वमपि रावणोऽमर आसीदिति केचित् पौराणिका वदन्ति। अत्र किमन्यत् कथ्यते।

Digitized by Google

राघवौ स्मरयति ? अथवा दुष्टप्रशान्तिः कस्य न मनः-प्रीतये ? वर्तन्तामनुभावोत्सवाः । देवराज ! पश्य ।

(100) आभ्यां ब्रह्माच्युतास्त्रस्मरणसुरभिभिर्मार्गणैराघवाभ्यां मूर्धानौ चिच्छिदाते रजनिचरपतेः रावणस्य क्रमेण । पश्चाद्दग्धःकबन्धौ सुधभुवि, विवशः सोऽपि रक्षोऽवरोधः शोच्यां, श्रीदाशरथ्योः शिरसि च वियतः पुष्पवर्षं पपात ॥६२॥

वाच । (101) नेपथ्याभिमुखमवलोक्य, सोल्लासम् । गन्धर्वराज ! पश्य तावदेते किल त्रिभुवनमयत्नोद्दण्डकबन्धस्य निधन-वृत्तान्तश्रवणेन प्रमोदनिर्भराः महर्षयः सुमनसः कमपि

साक्षात्कृतं सत्यं परमतत्त्वं येन स मुनिगणः अनुपदेशेन दुष्टदमनेन दुष्टे मनसि शान्तिं च लभताम् ।

(100) आभ्यां राघवाभ्यां रामलक्ष्मणाभ्यां ब्रह्मणः अच्युतस्य विष्णोश्च अस्त्रयोः स्मरणेन सुरभिभिः मार्गणैः बाणैः रजनिचरपतेः रावणस्य रावणेश्च मेघनादस्य च क्रमेण मूर्धानौ चिच्छिदाते छिन्नौ । कर्मणि लिटि रूपम् । पश्चात् तदनन्तरं रक्षःकबन्धौ रावणमेघनाद-शरीरे सुधभुवि रणाङ्गने पतितः । सोऽपि रक्षसः रावणस्य अवरोधः विवशः शोकाभिभूतः शोच्यां भूमौ पपात । श्रीदाशरथ्योः रामलक्ष्म-णयोः शिरसि च वियतः गगनात् पुष्पवर्षं पपात ।

(101) अनुभूभुजन्तः अनुभवितुम् इच्छन्तः । अनुभुवः सज्जनाच्छद-मन्त्रयः ।

प्रथमं शैवकाशायां नगरे शिवसागरे ।
तदनु नलिरावादे दिग्भागे वासवावित्ते ॥
ततश्च दिशि कौबेर्यामराजराजसञ्चिते ।

Digitized by Google

महोत्सवमनुभूयन्तो मामेव प्रतीक्षन्ते। तद्गच्छाम्येतेषां मनोरथसम्पादनाय। त्वमपीतस्तावन्निवेदनेन प्रियसखं मल्लकेश्वरं प्रीणय।

[इति परिक्रम्य निष्क्रान्ताः सर्वे।

इति महावीरचरिते षष्ठोऽङ्कः।

अधुना मध्यमे भागे वर्द्धमानाभिधे पुरे॥
इष्टेन राजकार्येण वक्तुमात्मकथासनात्।
समस्तो विषमैः श्लोकैः षष्ठोऽङ्को विमलोद्गतः॥

Digitized by Google

अथ सप्तमोऽङ्कः ।

ततः प्रविशति शोकाकुला लङ्का ।

लङ्का । (1) साक्रोशम् । हा महाराज दशकन्धर त्रैलोक्य-वीरलक्ष्मीपरिभवदुर्ललित ! हा समरराक्षसलोकपरिपालनसमर्थदुर्मद-बाहुदण्ड ! हा पशुपतिपादयुगलक्षणोपयुज्यमानसुगन्धसुखपुण्डरीक ! हा वैकसीपुत्रतिलक ! हा बन्धुजनवत्सल ! कुत्र मया त्वं प्रेषितव्यः ? हा कुमार कुम्भकर्ण ! हा वत्स मेघनाद ! कुत्रासि ? देहि मे प्रतिवचनम् । कथं कोऽपि न मन्त्रयति ? हा दुष्टदैवदुर्विलसित ! कस्मादेवं परिभूतमसि ? अथवा कोऽत्र भवत उपालम्भः आत्मन एव दुश्चरितमेतं विपरिणमति । त्रैलोक्यस्य वीरलक्ष्म्याः परिभवेण

---

(1) साक्रोशं साक्रन्दम् । हा महाराज दशकन्धर त्रैलोक्यवीर-लक्ष्मीपरिभवदुर्ललित ! हा समरराक्षसलोकपरिपालनसमर्थदुर्मद-भुजदण्ड ! हा पशुपतिपादयुगलक्षणोपयुज्यमानसुगन्धसुखपुण्डरीक ! हा वैकसीपुत्रतिलक ! हा बन्धुजनवत्सल ! कुत्र मया त्वं प्रेषितव्यः ? हा कुमार कुम्भकर्ण ! हा वत्स मेघनाद ! कुत्रासि ? देहि मे प्रतिवचनम् । कथं कोऽपि न मन्त्रयति ? हा दुष्टदैवदुर्विलसित ! कस्मादेवं परिभूतमसि ? अथवा कोऽत्र भवत उपालम्भः आत्मन एव दुश्चरितमेतं विपरिणमति । त्रैलोक्यस्य वीरलक्ष्म्याः परिभवेण

Digitized by Google

को एत्थ भवदो उवालब्भो। अत्तणो एव्व दुच्चरिदं एदं विपरिणमेदि। [इति सास्रक्रोधं रोदिति।

ततः प्रविशत्यङ्गदः।

अङ्ग। (2) अहो कथमस्य रक्षःपतेरपूर्वः कोऽप्ययं दशापरिपाकः! यदेतावानपि रक्षःसर्गः क्षणेनैव विभीषणमात्रशेषः संवृत्तः। भवत्वेवं नाटयित्वा परिक्रम्य। कथं कनीयसी मे भगिनी प्रत्यग्रभर्तृविरहव्यथाविधुरा क्रन्दन्ती लङ्का? उपसृत्य। भगिनि! समाश्वसिहि समाश्वसिहि।

लङ्का। (3) विभाव्य। कहं वहिणिआ मे अलआ?

अङ्गदः। (4) भगिनि! समाश्वसिहि समाश्वसिहि। एवं किलेयं लोकयात्रा।

लङ्का। (5) अयि वहिणिए कुदो मे आस्सासो? जुवइ-

स्वीकारेण दुर्वहित उन्नत्त। पशुपतेः शिवस्य पादयुगले स्वयम् उपयुज्यमानं निवुज्यमानं छित्त्वा प्रदत्तं शुम्भत्स्वशिरोरुहं येन स अतिसाहसिक इत्यर्थः।

(2) दशापरिपाकः अवस्थापरिणामः। रक्षःसर्गः राक्षससृष्टिः राक्षससमुदाय इत्यर्थः। प्रत्यग्रस्य नवस्य भर्तुः रावणस्य विरहेण व्यथया विधुरा कातरा। कनीयसी अवरजा भगिनी लङ्का, रावणो हि धनकोश्वरस्य कुबेरस्यानुजः।

(3) कथं भगिनी मेऽलका?

(4) एवं शोकवशेनेति भावः। लोकयात्रा संसारगतिः।

(5) अयि भगिनि! कुतो मे आश्वासः? युवतिजनसामान्येना

Digitized by Google

अवमेत्तवेसा सम्वुत्त म्हि। एक्को उण कुलतन्तू कुमार-विहीसणो क्खु चिट्ठदि त्ति सुणीअदि। सोवि मन्दभाइ-णीए अधण्णदाए रिउवक्खं जेव्व सेवेदि।

अवरा। अयि भगिनि! मा मैवं, न खल्वस्माकं स रिपुपक्षः।

वडा। (6) कहं विअ।

अवरा। (7) यस्य रिपुः स गतः। तच्च गतं, संप्रति तु निसर्गसुहृदस्माकं त्रिभुवनप्रसिद्धसम्बन्धो दाशरथिः।

वडा। आमन्त। (8) कहं ईरिसो वि?

अवरा। ईदृश एव।

वडा। (9) कहं अम्ह सामिसु ईरिसो वि परिणदो?

अवरा। अप्यननुसन्धाने किमेवं भाषसे। शृणु।

(10) रघुकुलतिलकेऽस्मिन् भ्रातृमात्रद्वितीये
किमपि पितृनिदेशाद्दण्डकां संप्रविष्टे।

संवृत्ताऽस्मि। एकः पुनः कुलतन्तुः कुमारविभीषणः खलु तिष्ठतीति श्रूयते। सोऽपि मन्दभागिन्या अधन्यतया रिपुपक्षमेव सेवते।

(6) कथमिव।

(7) यस्य रामस्य रिपुः स रावणः गतः निधनं प्राप्तः। तस्य निधनेन खलु तत् शालवस्य गतं विनष्टम्।

(8) कथमीदृशोऽपि।

(9) कथमस्माकं स्वामिन्यीदृशोऽपि परिणतः।

(10) भ्रातृमात्रद्वितीये लक्ष्मणैकसहाये अस्मिन् रघुकुलतिलके रामे पितुः निदेशात् आज्ञया दण्डकारण्यं संप्रविष्टे गते सति किमपि

अनुचितमनुना ते राक्षसानां विनेत्रा
विहितमयमशेषः कर्मणस्तस्य पाकः ॥ १ ॥

छाया । (11) हुं तुमं उण दूरिसे पत्थावे कहं एत्थ उवट्ठिदासि ?

अवका । (12) अवधत्स्व अहं किल वैमात्रकेण पौलस्त्येन गन्धर्वराजाच्चित्ररथादमुं हृत्वात्मसमुपलभ्य शिष्टबन्धुप्रतिबोधनाय, विभीषणस्य च लङ्काभिषेकसाक्षात्करणाय, रावणापहृतविमानराजस्य पुष्पकस्य च रामभद्रोपस्थानोपदेशदानाय सन्दिष्टा ।

छाया । (13) अम्मो कहं भअवदो पसुवदुणो वि मित्तं णिधाणाहिवदी सअं एव्वं उवचरदि रामभद्दं ?

अवका । अयि किमत्रास्थेयम् ।

सीताहरणरूपम् अनुचितं कर्म तव राक्षसानां विनेत्रा शासकेन अनुना रावणेन विहितं कृतम् । अयं तस्य कर्मणः अशेषः पूर्णः पाकः परिणामः । अनुचितमित्यत्र यदुचितमिति क्वचित्पाठः ।

(11) हुं, त्वं पुनरीदृशे प्रस्तावे कथमत्रोपस्थितासि ।

(12) वैमात्रकेण भिन्नमातृगर्भजेन भरद्वाजदौहित्रेण पौलस्त्येन पुलस्त्यपौत्रेण कुबेरेण । विमानराजस्य व्योमयानमुख्यस्य । उपस्थानं सेवा ।

(13) अम्मो कथं भगवतः पशुपतेरपि मित्रं निधानाधिपतिः स्वयमेवमुपचरति रामभद्रम् । निधानाधिपतिः धनेशः ।

Digitized by Google

(14) इदं हि तत्त्वं परमार्थभाजा-
मयं हि साक्षात् पुरुषः पुराणः ।
त्रिधा विभिन्ना प्रकृतिः किलैषा
त्रातुं भुवि स्वेन सतोऽवतीर्णा ॥ २ ॥

बङ्गा । (15) कहं अम्ह सामिणा रक्खसणाहेण एदं ण ओधारिदं ?

अलका । (16) अयि सरले ग्रापमहिम्ना किल मूर्च्छ-
मोहः सोऽपि नापराध्यति ।

नेपथ्ये कलकलः ।

उभे । वयस्यममाकर्णयतः ।

पुनर्नेपथ्ये । (17) समवधत्त भोस्त्रिजगच्चराणि भूतानि ।

---

(14) परमार्थभाजां तत्त्वदर्शिनां ज्ञानिनाम् इदं हि तत्त्वम्—अयं रामो हि साक्षात् पुराणः पुरुषः परमेश्वरः—एषा किल त्रिधा विभिन्ना त्रैगुण्यात्मिका प्रकृतिः मूलकारणम् । "सत्त्वं रजस्तम इति प्राकृतन्तु गुणत्रयम् । एतन्मयी च प्रकृतिर्माया या वैष्णवी श्रुता ॥" इति स्मृतिः । सतः साधून् त्रातुं स्वेन स्वात्मना भुवि अवतीर्णा आविर्भूता ।

(15) कथमस्माकं स्वामिना राक्षसनाथेनैतत्स्वावधारितम् ।

(16) सरले मायाशून्ये । नन्दीश्वरस्य (रा०. ७. १७. १६–७) शापस्य महिम्ना प्रभावेण मूर्च्छन् प्रसर्पन् मोहः यस्य स रावणोऽपि नापराध्यति न दोषभाक् । तस्य रामस्वरूपात्मानं क्षमम् ।

(17) त्रिजगच्चराणि त्रिभुवनस्थितानि भूतानि प्राणिनः । अष्टाभिः वसुभिः द्वादशभिः अर्कैः एकादशभिः रुद्रैः सहितः साक्षात्

वस्वर्करुद्रसहितः स्वयमेव साक्षाद्
इन्द्रश्रवाः समभिनन्दति साधु साध्वीम्।
अग्निप्रवेशपरिनिर्गमशुद्धभावां
सीतां रघूत्तम भवत्स्थितिमाद्रियस्व ॥ १ ॥

अन्वया। (18) कथमेते दिवौकसोऽपि दृश्यकन्धरारूढ-निवासव्यसनकौलीनयशःप्रपनुत्ये कृतपावकप्रवेशनिर्गमनां सीतादेवीमभिनन्दन्ति ? अहह !

(19) पतिव्रतामयं ज्योतिर्ज्योतिषान्येन शोध्यते।
इदमार्यकर्म्मथवा लोकस्थित्यनुवर्त्तनम् ॥ ४ ॥

अन्वा। यद्दृश्यवर्त्म नाटयित्वा। (20) कथं मङ्गलतूरवनिस्वानो गीर्दीयो निशामीयन्ति ?

इन्द्रश्रवाः इन्द्रः स्वयमेव साध्वीं सीतां साधु शोभनं समभिनन्दति। रघूत्तम रामभद्र अग्निप्रवेशात् (रा०. ७. १०१. अ०.) परिनिर्गमेन निष्क्रमेण शुद्धभावां पतिव्रतां भवतः स्थितिं बंधवर्धनां सीताम् आद्रियस्व परिरक्षाय। १०२ अ०.।

(18) दिवौकसः देवाः। कौलीनयशःप्रपनुत्यै अपवादनिरासाय कृतपावको वह्निः।

(19) अन्येन ज्योतिषा अग्निना शोध्यते पवित्रीक्रियते इदमार्यकर्म्म। यथोक्तमुत्तरचरिते "उत्पत्तिपरिपूतायाः किमन्याः पावनान्तरैः। शौचेऽदग्धश्च वह्निश्च नान्यतः शुद्धिमर्हतः॥" इति १. १२.। अथवा इदम् आचारानुष्ठानम्।

(20) कथं मङ्गलतूर्यनिस्वा गीतयो नियम्यन्ते श्रूयन्ते।

Digitized by Google

अङ्का । नेपथ्याभिमुखमवलोक्य । (21) कथं सीताविशुद्धप्र-
नुमोदनार्थमवतीर्णाभिरप्सरोभिर्दिव्यर्षिगणैश्च रामभद्र-
निर्देशेन निष्पादिताभिषेककल्याणो विभीषणः पुष्पकं पुर-
स्कृत्य राममद्रमभ्येति । तदेहि तथाविधसहजमहिममह-
नीयचरितमहानुभावावलोकनेन चक्षुः कृतार्थयावः ।

[इति परिक्रम्य निष्क्रान्ते ।

[इति (22) मिश्रविष्कम्भकः ।

ततः प्रविशति पुष्पकं पुरस्कृत्य विभीषणः ।

विभी । (23) अनुष्ठितः किल मया रामभद्रादेशः । तथाहि । सत्कृतं मातलिमनु

(24) अजस्रगलदस्रसंभ्रवकिणाङ्कगण्डस्थलाः
स्खलत्कनककङ्कणा नियमितैकवेणीकृतः ।

---

(21) निष्पादितं कृतम् अभिषेक एव कल्याणं मङ्गलं यस्य सः ।

(22) "विष्कम्भस्तु द्विधा सोऽयं शुद्धः संकीर्ण एव च । शुद्धो मध्यमपात्रेण सङ्कीर्णो मध्यमाधमैः ॥" इति भरतः । अर्थप्रतिबन्धो मिश्रविष्कम्भ इत्यस्माकं मतम् ।

(23) सत्कृतं मातलिम् अनु मातलिपूजनानन्तरम् । अनुयोगेन द्वितीया ।

(24) अजस्रं सततं गलता स्रवताम् अस्राणां नेत्रजलानां संभ्रमेण भरेण किणाङ्कानि चिह्नितानि गण्डस्थलानि यासां ताः स्खलत्कनक-कङ्कणाः श्लथत्सुवर्णवलयाः, नियमितां प्रोषितभर्तृकाभिर्वाभिः एक-वेणीं दधत्यः, अमातङ्गे रावणेन बन्दीकृताः सुरस्त्रियः मोचिताः

Digitized by Google

क्षमातलविवर्त्तनातिमखिनाम्बरा मोचिताः
प्रयान्ति किल सत्क्रिताः क्व सुरलोकवन्दिस्त्रियः ॥ ५ ॥
उपसृत्य । जयति जयति रामभद्रः । देव ! एतदवसानः किल निर्देशः सम्पादितः ।
(25) वन्दीभिरेधिताः कारा: मृङ्खलाभिरलङ्कृताः ।
कार्त्तस्वराभिर्दृश्याभिः पताकाभिश्च साम्प्रतम् ॥ ६ ॥
अयं च पुष्पकनामा स विमानराजः ।
(26) असंख्यगतेरिष्टप्रवृत्तेर्वशवर्त्तिनः ।
मनोरथस्यानुगुणं सर्वदा यस्य चेष्टितम् ॥ ७ ॥
रामः । (27) साधु लङ्केश्वर ! साधु सम्पादितम् । सुग्रीवं प्रति । सखे वैकर्तने ! किमत्रावशिष्यते ?

मोचिताः सत्कृताः सत्क्रिताः दिवं प्रयान्ति क्व । "सूदवत्तनवकङ्कुचम्" इति पाठो न मनोरमः । एतत् अवसानम् अन्तः यस्य स एतदवसानः ।

(25) वन्दीभिः वन्दिजनैः एधिताः स्तोताः कारा: बन्धनागाराश्च साम्प्रतम् अधुना कार्त्तस्वराभिः सुवर्णनिर्मिताभिः मोचितवन्दिस्त्रीभिः मृङ्खलाभिः शृङ्खलाभिः दृश्याभिः सुदर्शनाभिः पताकाभिः च अलङ्कृताः ।

(26) असंख्या गतिर्यस्य तस्य, दृष्टप्रवृत्तेः अभिलाषप्रवृत्तेः वशवर्त्तिनः अनुगस्य यथाभिलषितचेष्टितस्य मनोरथस्य अनुगुणम् अनुसारेण सर्वतो यस्य पुष्पकस्य चेष्टितं प्रवृत्तिः । "यत्राविधो ये मनसोऽभिलाषाः प्रवर्त्तते पश्य तथा विमानम्" इति रघुः ।

(27) विकर्तनस्य सूर्यस्य तनयः वैकर्तनिः सुग्रीवः ।

Digitized by Google

त्यो । (28) उत्खातत्रिभुवनकण्टकोऽतिदृप्य-
दोर्दण्डाञ्चितमहिमाप्ययं निकारः ।
देव्याश्च प्रतियमितस्तथात्र सन्धा
निर्व्यूढा प्रगुणविभीषणाभिषेकात् ॥ ८ ॥

(29) संप्रति तु द्रोणाद्रिं प्रत्याहरतो हनूमतः सविशेषं गृहीतप्रवृत्तिर्दुर्मनायते किल कुमारभरतः । तं प्रति वार्त्ताहरः प्रविरुह्यतां प्राभञ्जनिः । स्वयमप्यलंक्रियतां विमानराजः ।

राजः । यदभिरुचितं प्रियवयस्याय । [इति तथा करोति ।

[सर्वे विमानारोहणं नाटयन्ति ।

सीता । अपवार्य लक्ष्मणं प्रति । (30) अम्हेहिं सम्मदं कहिं पत्थीअदि ।

लक्ष्म । देवि ! रघुकुलराजधानीमयोध्यां प्रति ।

---

(28) अतिदृप्तदोर्दण्डैः बलोन्मत्तैः दोर्दण्डैः अञ्चितः पूजितः महिमा यस्य स त्रिभुवनकण्टकः जगच्छत्रुः रावणः उत्खातः उद्धृतः । भवता देव्याः सीतायाः अयं रक्षसा कृतः निकारः प्रतियमितः अन्तं नीतः । प्रगुणस्य गुणवतो विभीषणस्य लङ्काराज्ये अभिषेकात् सन्धा प्रतिज्ञा निर्व्यूढा सम्पादिता ।

(29) प्राभञ्जनिः वायुपुत्रो हनुमान् प्रविरुह्यतां प्रेष्यताम् । द्रोणाद्रिनिवेशनं ६. ८७. टीकायां द्रष्टव्यम् ।

(30) अस्माभिः साम्प्रतं कुत्र प्रस्थीयते ।

Digitized by Google

सीता । (31) अपि समाप्तः स वनवासस्य अवधिः ।

लक्ष्म । देवि ! अद्यतनमेव दिनं तत् ।

[हर्षं विमानगतिं रूपयन्ति ।

सीता । साद्भुतम् । (32) अज्जउत्त एदे उण कदमा दुरादो अणिद्धारिदद्दक्खिणोहेसा अवित्थरिज्जन्तसामलत्तणपरिसरा दीसन्ति ।

रामः । देवि ! नैते भुवां परिसराः किन्तु

(33) साक्षात् किलाष्टमूर्त्तेस्तस्येषा मूर्त्तिरग्र्या प्रथमा ।
गीतः सागर इति मुनिभिरपरिच्छेद्यगाम्भीर्यः ॥ ९ ॥

सीता । (34) जो अम्हाणं जेट्ठससुरेहिं किदणिम्माणो त्ति वुड्ढपरंपराए सुणीअदि । एदस्स मज्झे वि किं एदं

---

(31) अपि समाप्तः स वनवासस्य अवधिः । अवधिः समयः ।

(32) आर्यपुत्र एते पुनः कतमा दूरतोऽनिर्द्धारितदक्षिणोद्देशाः अविस्तीर्यमाणश्यामलत्वपरिसरा दृश्यन्ते ।

(33) एषा तस्य सर्वलोकप्रसिद्धस्य अष्टमूर्तेः ईशस्य (अ०. १. १.) साक्षात् अग्र्या जलरूपा प्रथमा मूर्तिः । "आप एव ससर्जादौ" इति श्रुतेः । मुनिभिः सागरः इति गीतः कीर्तितः यः अपरिच्छेद्यगाम्भीर्यः । "विष्णोरिवास्यानवधारणीयमीहत्तया रूपमियत्तया वा ।" इति रघुः ।

(34) जो अम्हाकं ज्येष्ठश्वशुरैः कृतनिर्माण इति वृद्धपरम्परया श्रूयते । एतस्य मध्येऽपि किमेतद्दूरप्रसारितं भवत्यंशुकमिवाभिनवलक्ष्याच्छन्नं

दूरप्रसारितं धवलंसुभ्रं विभ्र. महिणवतिषच्छासु भूमिसु दीसइ।

लक्ष्म। देवि!

(35) सोत्साहं धृतयासनैः सकुतुकैर्दृष्टौकसां नायकैः
दिक्पर्यन्तधराधरेन्द्रशिखराख्यानाय निर्मापितः।
कल्पान्तावधिवन्दनीयमहिमा लोकस्य सेतुर्नवः
कीर्तिस्तम्भ इवायमार्यचरितस्याम्भोनिधौ लक्ष्यते॥ १०॥

रामः। अकृत्या निर्दिश्यतु। वत्स!

(36) एता भुवः परिचिनोषि मिलत्तमाल-
च्छायान्धकारिततुषारनिकुञ्जपुञ्जाः।
उन्मूर्च्छदच्छमलयाचलतुङ्गशृङ्ग-
प्राग्भारनिष्पतितनिर्झरपूरभाजः॥ ११॥

भूमिषु दृश्यते। ऋक्षेश्वरैः सगरपुत्रैः। सगरस्य लवणस्य नीलदर्शनात् दृष्टाऽऽस्था भूमिरित्युक्तम्।

(35) सोत्साहं धृतयासनैः गृहीतनिदेशैः सकुतुकैः कुतूहलिभिः दृष्टौकसां वानराणां नायकैः यूथपैः दिक्पर्यन्तस्थितानि धराधरेन्द्राणां महापर्वतानां शिखराणि आनाय्य निर्मापितः। एतेनानुचरैर्वानरैर्न्तु यूथपैः शिखरानयनं सूचितम्। कल्पान्तावधि प्रलयपर्यन्तं वन्दनीयः महिमा यस्य, लोकस्य नवः सेतुः स्थितिः। अयं अम्बुनिधौ सगरे कीर्तिस्तम्भ इव लक्ष्यते।

(36) एताः, मिलताम् आश्लिष्टानां तमालवृक्षाणां छायया अन्धकारिताः कृष्णालोकाः तुषाराः गीतलाः निकुञ्जपुञ्जाः यासु ताः

लक्ष्म। आर्य्य! ता एवैताः। नातिदूर एव तावदासां स जीर्णकन्दरः।

(37) गर्जाजर्जरितासु दिक्षु, वधिरे तत्स्फूर्जथुस्फूर्जितै-
र्व्योम्नि, भ्राम्यति दुष्प्रभञ्जनजवादभ्रेऽप्यदभ्रे मुहुः।
आच्छिद्यान्धयति द्रुमान्धतमसे चक्षुः, प्रविश्य क्षपा
यत्रासीत् क्षपिता चरञ्जलधरे त्वक्सारलक्षीकृते॥ १२॥

सीता। खगतम्। (38) अहो प्रमादो कहं मह मन्द-भाईणीए दूट्ठदेव्वेहिं एदे वि महाणुहावा ईरिसं अवत्थन्तरं अनुहाविदा।

विभी। देव रामभद्र दृश्यन्ते किलैताः कावेरीतीरभूमयः।

उन्मूर्च्छन्तं विसर्पन्तम् अभ्रं निर्मलं मलयाचलस्य तटस्य उन्नतस्य गृङ्गस्य प्राग्भारात् शिखरात् निष्पतितानां निर्झराणां पूरं जलौघं दधत्यः भुवः परिचिनोषि जानासि।

(37) गर्जाभिः गर्जितैः जर्जरितासु दिक्षु, तैः श्रोत्रविदारिभिः स्फूर्जथुस्फूर्जितैः वज्रनिर्घोषैः वधिरे व्योम्नि नभसि दुष्प्रभञ्जनजवात् प्रचण्डवायुवेगेन अदभ्रे प्रभूते अभ्रे मेघेऽपि मुहुः भ्राम्यति सति, द्रुमाणां वृक्षाणाम् अन्धतमसे घोरान्धकारे आच्छिद्य चक्षुः अन्धयति अन्धीकुर्वति, चरज्जलधरे वर्षन्मेघे त्वक्सारस्य गुडत्वचः गन्धेन लक्षीकृते यत्र कन्दरे प्रविश्य आवाभ्यां क्षपा रजनी क्षपिता नीता आसीत्। रा०. ४. २६. ४.। ४. २७ अ०. मूलेयं कविसृष्टिः।

(38) अहो प्रमादः। कथं मम मन्दभागिन्या दुष्टदैवैरेतेऽपि महानुभावा ईदृशमवस्थान्तरमनुभाविताः।

Digitized by Google

(39) यत्पर्यन्तमहीध्रसीम्नि कुहलीमाध्वीकधारोद्गिर-
द्धृष्यत्पूगवनीघनीकृततलैस्तुङ्गैर्जरच्छाखिभिः ।
लक्ष्यन्ते विविधाश्रमाः, स्थिरतपःस्वाध्यायसाक्षात्कृत-
ब्रह्माणो निवसन्ति यत्र मुनयः कल्पस्थितेः साक्षिणः ॥१२॥
यतो नातिदूर एव किलावाच्यां लोपामुद्रापरिष्कृतपरिसरे
दीप्यति कौम्भसम्भवं ज्योतिः ।

राजः । कथमतिक्रान्तमाश्रमपदम् ।

(40) अयं वारां राशिः किल मरुरभूद्यद्विलसितै-
रयं विन्ध्यो येनाहृतविकृतिराध्मानमजहात् ।

---

(39) यासां प्रपर्यन्तस्थस्य महीध्रस्य गिरेः सीम्नि नितम्बे कुहलीनां ताम्बूलीनां माध्वीकस्य मधोः धारां प्रवाहम् उद्गिरताम् अत एव हृष्यतां पूगानां क्रमुकानां वल्या गहनेन घनीकृतानि तलानि येषां तैः तुङ्गैः उन्नतैः जरच्छाखिभिः पुराणवनस्पतिभिः विविधाश्रमाः लक्ष्यन्ते, यत्र येषु आश्रमेषु स्थिराभ्यां तपःस्वाध्यायाभ्यां तपसा वेदाध्ययनेन च साक्षात्कृतः दृष्टः ब्रह्मा यैः ते कल्पस्थितेः साक्षिणः मन्वन्तरपुराणाः मुनयः निवसन्ति । अवाच्यां दक्षिणेन लोपामुद्रया निजभार्यया परिष्कृतः परिसरः पर्यन्तः यस्य तस्मिन्नाश्रम इति शेषः । कौम्भसम्भवं ज्योतिः कुम्भजन्मा मुनिः अगस्त्यः दीप्यति वसतीति भावः ।

(40) यस्य विलसितैः चेष्टितैः अयं किल वारां राशिः समुद्रः मरुः शुष्कः अभूत् । येन आहृता उद्धृता विकृतिः विकारो वर्धनमिति भावः यस्य स अयं विन्ध्यः आध्मानम् अवलेपम् अजहात् अत्यजत् । यस्य कुक्षिस्थितग्निनि जठराग्नौ वातापिश्वपुषा विनिस्सृते वातापिशरीरं

Digitized by Google

विलिखे यत्कुक्षिस्थितग्रिस्थिनि वातापिवपुषा,
स कासां वाणीनां मुनिरकलितात्मास्तु विषयः ॥ १४ ॥
तदप्रमेयविभवा विश्वान्तरात्मसाक्षिणस्ते महात्मानः कुतश्च नाभिवन्द्याः ।

[सर्वे तथा कुर्वन्ति ।

आकाशे । सानुजस्त्वं प्रजाः शाधि कल्पान्तस्थायि ते यशः ।
(41) नामापि राम स्मृतामृतत्वाय कल्पताम् ॥१५॥

रामः । आकर्ण्य । (42) कथमशरीरिण्या गिरा परमनुगृहीतो महामुनिवन्द्यः ।

[इतरे अभिनन्दन्ति ।

विभी । देव रामभद्र ! एतास्ताः पम्पापर्यन्तभूमयः यासु बहोः कालादनुभूयमानान्यप्यभिज्ञानानि बलाच्चक्षुराकर्षन्ति । तथाहि—

लोकं बभूव । स अकलितात्मा अचिन्त्यप्रभावो मुनिः कासां वाणीनां विषयोऽस्तु । अगस्त्येन सुरविद्विषां काकेयकानां विनाशाय सप्तदूनिपातं अ०. १. १०५ अ०. वर्णितम् । ज्योतिश्चयरोधाय विवर्धितात् विन्ध्याचलात् अगस्त्येन दक्षिणदिशि गमनाय मार्गप्रार्थनया दृढिसंस्कारः १०४ अ०. द्रष्टव्यः । वातापिभक्षणजरखे रा०. २. १६. अ०. वर्णिते ।

(41) हे राम तव नाम अभिधानमपि स्मृतां पठताम् अमृतत्वाय मोक्षाय कल्पताम् ।

(42) वन्द्यते स्तूयतीति वन्द्यः स्तोता ।

Digitized by Google

(43) वामेनैकेन विद्धं विलसति पुरतस्तज्जरत्तालखण्डं
सोऽपि क्रीड़ाकपित्वं क्षणमिषुनिवहैरन्वभूदत्र बाली।
सौमित्रिः पादघातादिह हि सकुतुकं प्राक्षिपत् कूटमस्थ्नां
कावन्धं, दृष्टमस्मिन् हनुमति भवतैवोत्तरीयं च देव्याः ॥१६॥

सीता। खगतम्। (44) किं नाम मह उत्तरीअं अज्ज-उत्तेण हणुमन्तअ हत्थे दिट्ठम्।

रामः। सस्मरणम्। हे देवि! तदा किल वैक्लव्यादपक्रिय-माणाया भवत्याः प्रभ्रष्टमनसूयानामाङ्कमुत्तरीयमस्माभिः प्रथममभिज्ञानमासादितम्।

(45) दृशोः शरच्छीतकरप्रकाशः
कायेऽपि कर्पूरपरागपूरः।

---

(43) एकेन वामेन विद्धं तत् परिचितं तालखण्डं पुरतः विलसति विभाति। अत्र स वीर्यवान् बाल्यपि इषुनिवहैः शरैः अयं शरत्वात् पूर्वं क्रीड़ाकपित्वम् अन्वभूत् खेलनवानरो बभूव। इह हि सौमित्रिः पादघातात् कावन्धं कबन्धस्य अस्थ्नां कूटं सकुतुकं प्राक्षिपत्। पञ्चमेऽङ्के रामेण दुन्दुभिकङ्कालक्षेपोक्तत्वात् कावन्धस्य च सौमित्रिणा दारुनोल्लेखा-दत्र हौ भग्नौ लक्ष्येते। अस्मिन् देव्याः सीतायाः उत्तरीयञ्च हनुमति हनुमत्काये भवतैव दृष्टम्।

(44) किं नाम ममोत्तरीयमार्येण हनुमतो हस्ते दृष्टम्।

(45) तदा यत् किल दृष्टमात्रं दृशोः चक्षुषोः शरच्छीतकरप्रकाशः शरदिन्दोः आलोकः आसीत्, कायेऽपि कर्पूरपरागपूरः कर्पूरचूर्णराशि-

Digitized by Google

स्नान्तेऽपि सान्द्रामृतकुम्भसेक-
स्तदा यदासीत् किल दृष्टमात्रम् ॥ १७ ॥

[सीता लज्जां नाटयति।

लक्ष्म। अयम्
तातस्य मित्रं किल गृध्रराज-
स्तं पापमस्मिन् सहसानुबध्नन्।
गात्रं जराजर्जरितं विहाय
यशःशरीरं नवमाललम्बे ॥ १८ ॥

सीता। स्वगतम्। (46) कहं मह कारणादो तारिसाणं वि महानुहावाणं ईरिसो अवत्थाविसेसो णिसामीअदि।

उभौ। देव! अतिक्रम्यन्ते किलैता दण्डकासीमानः!

(47) यत्र तेऽपि स्वसुः कर्णनासौष्ठविचिचीषया।
सानुप्लवा क्वापि यातास्मिमूर्खरदूषणाः ॥ १९ ॥

सीता। वेपमाना। (48) अम्मो कहं पुणोवि रक्खसा जेव्व सुणीअन्ति।

रासीत्, स्नाने मनसि अपि सान्द्रामृतकुम्भसेकः स्निग्धामृतघटस्य-मासीत्।

(46) कथं मम कारणात्तादृशानामपि महानुभावानामीदृशोऽवस्था-विशेषो निशम्यते श्रूयते।

(47) विचिचीषया अन्वेषणेच्छया। सानुप्लवाः सानुचराः।

(48) अहो कथं पुनरपि रक्षस एव श्रूयन्ते।

Digitized by Google

रामः । (49) देवि ! अलं शङ्कया अभिधानमात्रमवशिष्यते ।

शरासनस्य टङ्कारात्सौमित्रेः केवलं किल ।

रक्षसां प्रलयः सिंहजर्जनाद्दन्तिनां यथा ॥ २० ॥

निरूप्य । किमन्यादृग्वेव गतिरस्य विमानराजस्य ।

विभी । (50) देव ! अत्युच्चैः किलायं सह्यः सानुमान् । एनमतिक्रम्य गम्यते किलार्यावर्त्तः । तदतिक्रमणायेदमपि मध्यमलोकसान्निध्यं किञ्चिदुज्झति ।

सह्य । (51) द्रष्टव्यः किलोत्तमपुरुषपदलाञ्छितः प्रदेशः ।

[सर्वे उच्चैर्गतिर्वेगं निरूपयन्ति ।

रामः । निरूप्य सविस्मयम् ।

(52) यः पूर्वेषां नः कुलस्य प्रतिष्ठा
देवः साक्षादेष धात्रा निधानम् ।

---

(49) अभिधानमात्रं नाममात्रम् अवशिष्यते तिष्ठति ।

(50) "गोदावरी भीमरथी कृष्णवेण्यादिकस्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥" इति वि०, २, १, १२, दर्शनात्सह्यमद्रष्टुः सह्य इत्यनुमीयते । मध्यमलोकः पृथिवी ।

(51) उत्तमपुरुषपदलाञ्छितः "द्वितीयर्क्षरविक्रमपूतः" । विभीषणेन विमानस्य मध्यमलोकत्यागस्योक्तत्वान्मध्यमलोक इति पाठं प्रामादिकत्वेन लभ्य प्रदेश इति पाठः सन्निवेशितः ।

(52) यो नः कुलस्य पूर्वेषां पितॄणां प्रतिष्ठा प्रवविता स्रष्टा

Digitized by Google

त्रय्याः सारः कोऽपि मूर्त्तो विवस्वान्
प्रत्यासन्नः पुष्पकारोहणेन ॥ २१ ॥

[सर्वे कपोतकेन प्रस्थमन्ति ।

सीता । उच्चैर्निरूप्य । (53) अम्मो कहं दिनम्मि वि तारआचक्कं विअ एदं दीसदि ।

रामः । देवि ! तारकाचक्रमेवैतत् । अतिविप्रकर्षाद्रविकिरणप्रतिहतचक्षुर्भिर्न दृश्यते किल दिवसे । स विमानारोहणात्पास्तः ।

सीता । सकुतुकम् । (54) कहं गअणवाडिआए फुल्लाइं कुसुमाइं व दीसंदि ।

रामः । सस्मितमवलोक्य । कथमपरिच्छेद्यदिग्विभागमिव सम्प्रति जगत् । यतः

(55) संस्तूयन्ते विप्रकर्षात् भौमा नोपाधयः स्फुटम् ।
आन्तरीक्षाः पुनरमी सर्वतः सदृशा इव ॥ २२ ॥

त्रयाणां वेदानां सारः सूर्यः प्रत्यासन्नः सन्निहितः । कापोतकेन कङ्कविं वक्ष्यति ।

(53) अहो कथं दिनेऽपि तारकाचक्रमिवैतद्दृश्यते । तारकाचक्रं नक्षत्रसमूहः । "ज्योतींषि वर्त्तयति चक्रविभक्तरश्मिः" इति शाकुन्तलम् ।

(54) कथं गगनवाटिकायाः फुल्लानि कुसुमानीव दृश्यन्ते । वाटिका उपवनम् ।

(55) विप्रकर्षात् दूरत्वात् भौमाः पार्थिवाः उपाधयः विशेषाः स्फुटं न संस्तूयन्ते परिचीयन्ते ।

Digitized by Google

सुपी। (56) देव ! भ्रातुः सौहार्देन विधेयीकृतो यदृच्छया दिगन्तेषु विचरन्नभ्युपपन्नवानस्मि। तथाहि,

उदयास्ताचलावेतौ यत्क्रोडे बाल्यवार्द्धके।
विस्रब्धाचन्द्रसूर्याभ्यामतीयेते विनिर्भयम् ॥ २३ ॥

अवधत्तामितो देवः।

कैलासाञ्जनशैलावेतौ तुल्योन्नतत्वपरिणाहौ।
चन्दनमृगमदलेपं गमितौ चौर्व्या तु वक्षोजौ ॥२४॥

इतश्चायं काञ्चनाचलः। परतश्चायमभ्रङ्लषशिरः शिखरी गन्धमादनः। ततः परस्तादगम्या भाद्यां भूमयः।

रामः। परितो विलोक्य ससंभ्रमाद्भुतम्। कथमेकपद एव सर्वमहो चक्षुर्गोचरः। परिच्छेद्या च सर्गस्थितिः।

---

(56) अभ्युपपन्नवानस्मि संविजानामि। एतौ उदयास्ताचलौ ययोः क्रोडे चन्द्रसूर्याभ्यां विस्रब्धात् दैनिकभ्रमणजातविश्वासात् बाल्यवार्द्धके उदयनास्तमयने विनिर्भयं अतीयेते अतिक्राम्येते। तुल्योन्नतत्वपरिणाहौ समानोच्छ्रितविस्तृतौ। चौर्व्याः पृथिव्याः वक्षोजौ स्तनौ तु चन्दनमृगमदलेपं गमितौ चन्दनकस्तूरिलिप्तौ। अञ्जनशैलः नीलः। "नीलः श्वेतश्च ऋक्षौ च उत्तरे वर्षपर्वताः" इति वि०. २. २. १०.। कैलासस्य धवलत्वं प्रसिद्धम्। यथोक्तं मेघदूते "ऋक्षोच्छ्राये कुसुदविशदैर्यो वितत्य स्थितं खम्।" अत एव प्रथमस्य मृगनाभिलिप्तत्वं द्वितीयस्य च श्वेतचन्दनाक्तेतत्प्रेक्षासंशयः। काञ्चनाचलः मेरुः ऋषभो वा। यथोक्तं रा०. ६. ५२. अ०. "ततः काञ्चनमत्युच्चम् ऋषभाख्यं पर्वतम्। कैलासशिखरप्रख्यं ददृशुर्भीमविक्रमम् ॥" इति।

सीता । (57) अज्जो एदं किं वि अदिट्ठपुव्वं अण्णारिसं जेव्व दीसइ ण मानुसो णावि पसू ।

रामः । देवि ! अद्भुतमिदं किन्नरमिथुनमेतत् प्रायेणैतासु भूमिष्वेवंविधानामेव भूयसां प्रचारः ।

विभी । कथं सम्मुखमेवाभ्येति प्रायेणालकेश्वरादेशधारिणानेन भवितव्यम् ।

नेपथ्ये । (58) देव दिनकरकुलमणे रामभद्र भवन्तमेकपिङ्गाचलेश्वरनिदेशादुपश्लोकयितुं साकेतं प्रस्थितयोरावयो सुकृतपरिणामादन्तराल एव चक्षुर्विषयोऽसि । तन्निदेशपारतन्त्र्यमपि भूयसे गुणाय यत् पुराणस्यैव पुंसोऽभिव्यक्तिपर्यायनिष्ठं महः साक्षात्क्रियते । इति प्रदक्षिणीकृत्याभिवन्देते ।

[सर्वे निरूपयन्ति ।

पुनर्नेपथ्ये किन्नरः । (59) आपन्नवत्सलजगज्जनतैकबन्धो

विद्वन्मरालकमलाकर रामचन्द्र !

---

(57) अहो ! एतत् किमप्यदृष्टपूर्वमन्यादृशमेव दृश्यते न मानुषो नाऽपि पशुः ।

(58) एकपिङ्गाचलेश्वरः कुबेरः । यदुक्तं तेन "तत्र देवो मया दृष्ट उमया सहितः प्रभुः । सव्यं चक्षुर्मया दत्तात् तत्र देव्यां निपातितम् ॥ देव्या दिव्यप्रभावेण दग्धं सव्यं ममेक्षणम् । रेणुध्वस्तमिव ज्योतिः पिङ्गलत्वमुपागतम् ॥" इति रा० ७. १२. २२–२४. । उपश्लोकयितुं स्तोतुम् । पुराणस्य पुंसः विष्णोः अभिव्यक्तिपर्यायनिष्ठं प्रसिद्धप्रवरसंसक्तं दृश्यमिति भावः महः तेजः ।

(59) आपन्नवत्सल दीनप्रिय जगज्जनतैकबन्धो भूततारक विद्वन्म-

Digitized by Google

जन्मादिकर्मविधुरैः सुमनश्चकोरै-
राचम्यतां तव यशः शरदां सहस्रम् ॥ २५ ॥

तत्रैव किञ्चरी । (60) यावत् फणीन्द्रशिरसि क्षितिचक्रमेतत्
यावत् पुनर्ग्रहगणैः शबलं विहायः ।
वैदेहि तावदमलो भुवनेषु पुण्यः
श्लोकः प्रशस्तचरितैरुपगीयतां ते ॥ २६ ॥

[दम्पती मन्दाक्षं नाटयतः ।

इतरे । प्रियं नः प्रियम् ।

रामः । लङ्केश्वर चिरसञ्चरणादत्र नानुरोधं तर्कये । तद्वरमितो मध्यमलोकसान्निध्येन गन्तुम् ।

विभी । देव !

(61) एते ते सुरसिन्धुधौतदृषदः कर्पूरखण्डोज्ज्वलाः
पादा जर्जरभूर्जवल्कलभृतो गौरीगुरोः पावनाः ।

राजकमलाकर पण्डितहंसजलाशय । यथा हंसा जलाशय आसक्ता-स्तद्वत्पण्डिता अपि त्वयीति भावः । जन्मादिकर्मविधुरैः जन्मादिकर्मभिः विधुरैः । सुमनोभिः महात्मभिः एव चकोरैः तव यशः शरदां सहस्रं वर्षसहस्रम् आचम्यतां पीयताम् ।

(60) यावत् एतत् क्षितिचक्रं भूमण्डलं फणीन्द्रशिरसि अनन्त-मूर्ध्नि तिष्ठेदिति शेषः । "स बिभर्त्यखरीभूतमशेषं क्षितिमण्डलम् । आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः ॥" इति वि०. २. ५. २०. । पुनः यावत् विहायः नभः यद्गणैः शबलं कर्बुरम् । हे वैदेहि तावत् ते अमलः पुण्यः श्लोकः यशः प्रशस्तचरितैः महात्मभिः उपगीयताम् ।

(61) सुरसिन्धुधौतदृषदः गङ्गाप्रतिष्ठितोपलाः गौरीगुरोः हिमवतः पावनाः पादाः । यत्र येषु तत्त्वालोकनिरस्तमोहतमसां ज्ञानालोक-

Digitized by Google

तत्त्वालोकनिरस्तमोहतमसामध्यात्मविद्याभुषां
यत्र ब्रह्मविदां निसर्गमधुरं जागर्त्ति सौम्यं महः ॥ २७ ॥

वसि० । आर्य्य ! कथमेते भुवां परिसराः संस्तुतपूर्वान्य-विषयग्राहित्वं न भजन्ते चक्षुषोः ?

रामः । (62) निरूप्य सस्मरभावेनम् । वत्स ! ता एता गुरूणां कौशिकपादानां सचरणेन पवित्रितपर्य्यन्तास्तपोवनभूमयः । यत्र तु तत्रभवता याज्ञवल्क्यान्तेवासिना द्वितीयेन विदेहाधिपतिना सह तत्संलापामृतप्रमोदमनुभवतां गुरूणां लालनीयाभ्यामावाभ्यां वाग्योचितमुल्ललितम् ।

सीता । स्वगतम् । (63) कहं कणिट्ठतादो त्ति सुणीअदि ।

[इति परितः सस्पृहमालोकयते ।

रामः । लङ्केश्वर नोचितमिदानीं गुरुचरणपङ्कजपवित्रितेषु परिसरेषु विमानाधिरोहणम् ।

नेपथ्ये । भो भोः रामलक्ष्मणौ ! स भगवान् कुशाख्यान्तेवासी वां समाज्ञापयति ।

उभौ । विमानाधिदेवताभिक्रान्तेन स्वस्त्राय नियुज्य । अवस्थितौ स्वः ।

निर्धूतमोहाध्यकाराणाम् अध्यात्मविद्याभुषां लब्धपरमब्रह्मतत्त्वानां ब्रह्मविदां वेदविदां निसर्गेण स्वभावतः मधुरं सौम्यं प्रियं महः तेजः जागर्त्ति । अत्र ते तपस्यां कुर्वन्तीति भावः ।

(62) द्वितीयेन विदेहाधिपतिना जनकध्वजेन ।

(63) कथं कनिष्ठतात इति श्रूयते ।

Digitized by Google

पुनर्नैपथ्ये । (64) पुरीं यथा स्थितौ यातं, विलम्बेथां च मान्तरा ।
अरुन्धतीसहचरं ज्योतिर्वां संप्रतीक्षते ॥ २८ ॥
अहमपि तृतीयकालक्रियानुसन्धानपरवान् मुहूर्तद्वयेनागत एव ।

उभौ । यथाज्ञापयन्ति गुरवः । [पुनर्विमानं प्रतिष्ठेते ।

रामः । (65) अहो ! महात्मानोऽपि वात्सल्यपरतन्त्राः यन्मद्विघ्ना तपःस्वाध्याययोर्लवशो विभक्ते समये तत्प्राप्यागमनमनुरुध्यन्ते । अथवा युक्तमेवैतत् । यतः करुणापारतन्त्र्येण मृदुस्वभावास्ते तपोवनतरुषु तरुषु च किं मनुष्येषु । विशेषतस्तु

राज्ञां मार्तण्डवंश्यानां गृहे नो जन्म केवलम् ।
यान्नास्त्रज्ञानमुख्यस्तु संस्कारोऽस्मान्महात्मनः ॥ २९ ॥

विभो । विलोक्य । (66) किमिदमकाण्ड एव नीहारजालैरिव क्षमारजोभिराच्छाद्यन्ते ककुभः ?

[सर्वे सविस्मयं पश्यन्ति ।

---

(64) यथा स्थितौ पुरीम् अयोध्यां यातं गच्छतम् । अन्तरा पथि मा विलम्बेथाम् । अरुन्धतीसहचरं ज्योतिः अरुन्धतीसखो वशिष्ठो वां सम्प्रतीक्षते । तृतीयकालक्रियानुसन्धानपरवान् मध्याह्नसन्ध्यानुष्ठानासक्तः ।

(65) स्वाध्यायः वेदाध्ययनम् ।

(66) क्षमारजोभिः पार्थिवधूलिभिः । ककुभः दिशः ।

Digitized by Google

रामः । (67) सवितर्कम् । मन्ये प्राभञ्जनेरक्षत्प्रवृत्तिमुपलभ्य मां प्रत्युद्यातोऽहं ससैन्यो भरतः ।

प्रविश्य हनूमान् । सपादपद्मजमर्घं प्रणम्य । देव !

(68) स्थितो ध्यायन्नन्तः किमपि चरितं स्वेन भवत-
श्चिराद्वार्तामेनामथ मदुपलभ्य प्रचलितः ।
जटी चीरी रामेत्यमृतविभवं नाम रसयन्
मुहुर्हर्षोद्भ्रान्तप्रकृतिसहितोऽभ्येति भरतः ॥ ३० ॥

रामः । सोल्लासम् । अहो ! चिरायायुष्मत्सौहार्दमुपलभामहे इति सर्वानन्दानामुपरि वर्त्तामहे ।

लक्ष्म । सौत्सुक्यम् । सखे मारुते ! कुशार्यः ।

हनू । य एते सैन्यस्य पुरतः पञ्चषास्तस्थौ पुरःसरः सानुजः स महात्मा भरतः ।

[लक्ष्मणः निर्वर्णयति ।

---

(67) प्राभञ्जनेः हनुमतः । अक्षत्प्रवृत्तिम् अक्षदागमनवार्ताम् । प्रत्युद्यातीति सभाजनाय अभ्यागच्छति ।

(68) अन्तः मनसि किमपि अपूर्वं देवस्य चरितं ध्यायन् स्थितः । अथ चिरात् मत् मत्तः भवतः एनाम् आगमनविषयां वार्त्तां उपलभ्य प्राप्य स्वेन आत्मनैव प्रचलितः । जटी जटावान् चीरी वल्कलभृत् राम इति अमृतविभवं सुधामयं नाम रसयन् आस्वादयन् मुहुर्हर्ष निर्भरप्रजाभिः सह भरतः अभ्येति ।

Digitized by Google

सीता । निरूप्य । (69) कहं अम्हारिसो जेव्व दीसइ ।

विभी । हंहो विमानराज चिराय बन्धुजनदर्शनालिङ्गन-संभावनादिना मिथोऽङ्गप्रमोदमनुभवन्त्वेते महानुभावाः । तत् त्वयं विरम ।

[सर्वे विमानावतरणं नाटयन्ति ।

ततः प्रविशतः कतिचनप्रधानपुरुषपरिवृतौ भरतशत्रुघ्नौ ।

रामः । सरभसं पादपतितं भरतमुत्थाप्य । एह्येहि वत्स !

(70) अनुभावयति ब्रह्मानन्दसाक्षात्क्रियामिव ।
सार्यस्तेऽद्य वराब्जोजप्रस्फुरन्नालकर्कशः ॥ ३१ ॥

[इति निर्भरमालिङ्ग्य विसृजति ।

[लक्ष्मणः सपादपतनं भरतमालिङ्गति ।

[शत्रुघ्नः रामलक्ष्मणावभिवादयते ।

उभौ । कुलस्थितिमनुवर्तस्व ।

[भरतशत्रुघ्नौ दण्डवत् सीतां प्रणमतः ।

सीता । (71) कुमारा जेट्ठाणं भादुआणं अभिमदा होह ।

---

(69) कथमन्यादृश एव दृश्यते ।

(70) वरस्य श्रेष्ठस्य अब्जोजस्य कमलस्य प्रस्फुरन् विकसन् नालो दण्ड इव कर्कशः तव स्वर्गः आलिङ्गनं ब्रह्मानन्दसाक्षात्क्रियाम् आनन्दमयेश्वरदर्शनम् इव अनुभावयति उपलम्भयति मामिति शेषः ।

(71) कुमारौ ज्येष्ठयोर्भ्रात्रोरभिमतौ भवतम् ।

Digitized by Google

रामः। वत्सौ भरतशत्रुघ्नौ!

अस्माकं व्यसनाम्भोधावयं पोतत्वमागतः।
कपीन्द्रोऽयं च लङ्केन्द्रो मित्रं धर्म्महिते रतः॥ ३२॥

तत् परिष्वजतम्।

[इति सुग्रीवविभीषणौ दर्शयति।

[भरतशत्रुघ्नौ तौ परिष्वज्य यथोचितमुपचरतः।

भर। आर्य! कुलगुरुर्नो भगवान् मैत्रावरुणिः सिंहासनगृहे सम्पादितसकलाभिषेकसम्भारो भवन्तं प्रतीक्षते। यथाज्ञापयत्वार्यः।

रामः। स्वगतम्। कौशिकपादाः प्रतीक्षणीयाः स च भगवान् मैत्रावरुणिरेवमाज्ञापयति। भवतु समयोचितं प्रतिकरिष्यते। प्रकाशम्। यथाज्ञापयति कुलगुरुः।

[सर्वे परिक्रामन्ति।

ततः प्रविशति वशिष्ठो दशरथकलत्रैरुपचर्यमाणा अरुन्धती च।

वशि। स्वगतम्।

(72) क्षमायाः स क्षेत्रं गुणमणिगणानामपि खनिः
प्रपन्नानां मूर्त्तः सुकृतपरिपाको जनिमताम्।

---

(72) स क्षमायाः क्षेत्रं भाजनम्। गुणा एव मणयः तेषां गणानां समूहानाम् अपि खनिः आकरः। प्रपन्नानाम् आर्तानां खनिमतां प्राणिनां मूर्तः मूर्तिमान् सुकृतस्य परिपाकः परिणामः। अपा-

Digitized by Google

कृपारामो रामो बहिरिह दृशोपास्यत इति
प्रमोदाद्वै तस्याप्युपरि परिवर्त्तामह इमे ॥ ३१ ॥

भवतु तथापि लोकयात्रानुवर्तनीया। प्रकाशम्। वध्वौ कौशल्यासुमित्रे।

उभे। (73) आणवेदु कुलगुरू।

वसि। दिष्ट्याचतप्रतिनिवृत्तवत्से स्तः।

उभे। (73) तुह्माणं आसिसाणं पहावो।

अरु। कैकेयीं विलोक्य। वत्से कैकेयि! किमेवमतिदुर्मनायसे।

कैकेयी। (74) अम्ब! मह मन्दभाइणीए अधण्णदाए सअलो वि लोओ एव्वं कोलीणं भणदि। जं वच्छाणं पवासजणणी मज्झमजणणी मन्थरामुहे आसि। ता कहं वच्छाणं मए मुहं पेक्खिदव्वं।

अरु। वत्से! अलं वृथा कौलीनशङ्कया। आर्यमिश्रेरयमर्थस्तदैवान्तरेण चक्षुषा साक्षात्कृतः।

रामः दयानिधिः रामः इह बहिः बाह्यतः दृशा चक्षुषा उपास्यते इति हेतोः प्रमोदात् हर्षात् इमे वयं तस्यापि उपरि परिवर्त्तामहे निरतिशयानन्दमनुभवाम इति भावः।

(73) आज्ञापयतु कुलगुरुः। युष्माकमाशिषां प्रभावः।

(74) अम्ब, मम मन्दभागिन्या अधन्यतया सकलोऽपि लोक एवं कौलीनं भणति—यत् वत्सयोः प्रवासजननी मध्यमजननी मन्थरामुखं आसीत्। तत् कथं वत्सयोर्मया मुखं प्रेक्षितव्यम्। मन्थरामुखे प्रवासजनन्यासीत् मन्थरामुखेन प्रवासं कारयामास।

Digitized by Google

सर्वाः । (75) कथं विभ्र ।

अत्र । मन्थरारूपधारिण्या शूर्पणखया माल्यवद्वचना-
दितद्विहितमिति ।

सर्वाः । (76) अहो ! रक्खसाणं दुट्ठताभिओओ जो
दूह ट्ठिदं अवलाजणं वि वाधेदि ।

वसि । हुं मङ्गलसमयेऽलमलं यत्किञ्चिद्दुःखकैः का
पुनरद्यापि राक्षसाभियोगवार्त्ता ।

रामः । वसिष्ठं विलोक्य सोल्लासम् । स एष भगवान् मैत्रा-
वरुणिः ।

यद्दर्शनात् किमप्येवं द्रवीभवति मे मनः ।
(77) राकासुधाकरालोकाद्इन्दुकान्तोपलो यथा ॥ ३४ ॥

लक्ष्मणं प्रति । वत्स इत इतः ।

उभौ । उपसृत्य । भगवन् कुलगुरो ! रामलक्ष्मणावभि-
वादयेते ।

वसि । चक्षुषां स्वसमये संस्कारत्वं समाप्नुताम् ।
वत्सौ नयेन धर्मेण ज्ञानेन च पुरस्कृतम् ॥ ३५ ॥

[उभावूर्ध्वतीमभिवन्देते ।

---

(75) कथमिव ।

(76) अहो राक्षसानां दुर्वृत्ताभियोगो य इह स्थितमवलाजन-
मपि बाधते ।

(77) राकासुधाकरालोकात् पूर्णचन्द्रालोकात् इन्दुकान्तोपलः चन्द्र-

Digitized by Google

अरु । दृष्टेर्युज्येथाम् ।

[उभौ क्रमेण सर्वां मातरमभिवन्देते ।

सर्वाः । तौ निर्भरं परिष्वज्य मूर्ध्न्युपाघ्राय । (78) जं अम्हे चिन्तेमो तं तुम्हाणं होदु ।

[सीता उपसृत्य वसिष्ठं प्रणमति ।

वसि । वत्से ! वीरप्रसविनी भव ।

[सीता अरुन्धतीं प्रणमति ।

अरु । सीतां निर्भरमालिङ्ग्य ।

स्त्रीपामुद्रानसूयाहमिति विस्मस्वया सह ।
पतिव्रतावतस्त्रोऽत्र सन्तु जानकि साम्प्रतम् ॥ ३६ ॥

[सीता श्वश्रूरभिवन्देते ।

सर्वाः । (79) जादे कुलपइट्ठावअदारअप्पसविणी होहि ।

नेपथ्ये । (80) प्रवर्तन्तां पौराः प्रतिसदनमद्योत्सवविधौ
चिरं स्वे स्वे कर्मण्यथ समवधत्ताप्यधिकृताः ।

कान्तमणिः द्रवतीति प्राचीनानां धारणा । "द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ।" इति उ०. च०. ।

(78) यद्वयं चिन्तयामस्तद्युष्माकं भवतु ।

(79) जाते कुलप्रतिष्ठापकदारकप्रसविनी भव ।

(80) अद्य पौराः नागराः प्रतिसदनं गृहे गृहे उत्सवविधौ रामाभिषेककर्मणि प्रवर्तन्ताम् । अथ अधिकृताः नियोगिनः स्वे स्वे कर्मणि

यथोक्तं सम्भारं पुनरिह विधत्त द्विजवराः
क्रमाश्वास्ते वासौ कुशिकपतिराज्ञापयति वः ॥ २७ ॥

वसि । आकर्ण्य । अहोऽयं भाग्यमहिमा वत्सस्य यद् भगवान् कौशिकः स्वयं सिंहासने समभिषेक्तुं संप्राप्तः ।

इतरे । प्रियं नः प्रियम् ।

ततः प्रविशति सशिष्यो विश्वामित्रः ।

विश्वा ।

(81) सत्रप्रत्यूहशान्त्यै दशरथकरतः कर्षतैनं मया यद्
यत् स्वान्ते संविसृष्टं तदनुगुणविधौ यच्च वैयग्र्यमासीत् ।
तद्दैवस्यानुगुण्यात् प्रयतनविभवैस्याद्य राज्येऽभिषिच्य
श्रीरामं सिद्धतानां फलितमिति मुहुः संप्रमोदामहे नः ॥२८॥

[इति परिक्रामति ।

वसि । स एष कौशिकः ।

क्षात्रं प्राक्तनिकं तेजो ब्राह्मं यस्य विशिष्यते ।
लोकोत्तरचमत्कारनिधेस्तस्याद्भुतं न किम् ॥ २९ ॥

[वशिष्ठविश्वामित्रावुपसृत्याभ्योन्यमुपचरतः ।

चिरं समवधत्त आश्रियध्वम् । पुनः द्विजवराः दृढं यथोक्तं यथा-निर्दिष्टं सम्भारं विधत्त कुरुत । क्रमाश्वशिष्यः कौशिको विश्वामित्रो व आज्ञापयति ।

(81) सत्रप्रत्यूहशान्त्यै यज्ञविघ्नप्रशमनाय दशरथकरतात् एनं कर्षता मनाश्रमं नयता मया यत् यत् स्वान्ते मनसि संविसृष्टं विचारितं तदनुगुणविधौ तत्तदनुकूलविधौ यत् वैयग्र्यं व्यग्रता च आसीत् तत्तच्च

Digitized by Google

विश्वा । भगवन्नैवावरुणे ! किमद्यापि प्रतीक्ष्यते ।

वसि । यथोचितमाद्रियताम् ।

विश्वा । दिव्यर्षिगणसंहित्य । निर्वर्त्यतां रामभद्रस्याभिषेकः ।

[इतरे यथोचितमाचरन्ति ।

[नेपथ्ये दुन्दुभिध्वनिः ।

[सर्वे सविस्मयं पुष्पवृष्टिं रूपयन्ति ।

वसि । कथं सलोकपालो भगवान् पाकशासनो रामभद्रस्याभिषेकमनुमोदते ।

कृताभिषेकमङ्गलो रामः । वशिष्ठविश्वामित्रावुपसृत्य । गुरू अभिवादये ।

उभौ । रामभद्र गुणाराम स्वाभिरक्षं पुरस्कृतः ।

इक्ष्वाकुमुख्यैर्भूपालैश्चिरमूढां धुरं वह ॥ ४० ॥

इतरे । तथास्तु । [इत्यनुमोदन्ते ।

विश्वा । वत्स रामभद्र !

रामः । आज्ञापयन्तु गुरवः ।

विश्वा । (82) विसृज्येतावनुभूतोत्सवप्रमोदौ सुग्रीवविभीषणौ । पुष्पकं च संकल्पसमयसुलभं राजराजमेवाश्रयताम् ।

दैवस्यानुग्रहात् अनुकूलदैवात् निर्वृतानां निश्चिन्तानां फलितं फलितमिति प्रयतनविभवैः समाहृतसम्भारैः अद्य श्रीरामं राज्ये अभिषिच्य वयं अवलत् नः खेनैव सख्यमोदामहे आनन्दिताः ।

(82) संकल्पसमये सुलभं पुष्पकञ्च राजराजं कुबेरम् उपतिष्ठ-

[रामः तथा करोति ।

विश्वा । वत्स रामभद्र !

(83) निर्व्यूढं गुरुणासनं गुरुतरं धर्म्योऽपि संरक्षितो
रक्षःसंहरणात्त्रिकिल्बिषतमनोरोगा त्रिलोकी कृता।
सिद्धार्थाश्च सुराः, सहानुजसुहृद्वारेण राज्यं पुन-
र्लब्धं, किं करणीयमेतदधिकं श्रेयस्तदप्युच्यताम् ॥ ४१ ॥

रामः। श्रुतोऽधिकमपि श्रेयोऽस्ति। तथापीदमस्तु भगवत्पादप्रसादात्।

(84) क्ष्मापालाः क्षीणतन्द्राः क्षितिवलयमिदं पान्तु ते कालवर्षी
वार्वाहाः सन्तु, राष्ट्रं पुनरखिलमपास्तेति सम्पन्नयस्यम्।

ताम्। "अब्रवीच्च तदा रामस्तद्विमानं मनोजवम्। यक्षं वैश्रवणं देवमहमाज्ञापयामि ते ॥" इति रा०. ६. १११. ५६. ।

(83) गुरुतरं कर्कशं गुरोः पितुः यासनम् आज्ञा निर्व्यूढं प्रतिपालितम्। रक्षःसंहरणात् राक्षसवधेन त्रिलोकी त्रिकिल्बिषतमनोरोगा कृता त्रिभुवनस्य कण्टकः शोधितः। एतदधिकं किं श्रेयः भद्रं करणीयं तदपि उच्यताम्।

(84) क्ष्मापालाः राजानः क्षीणतन्द्राः अतन्द्रिताः इदं क्षितिवलयं भूमण्डलं पान्तु अवन्तु। ते वार्वाहाः मेघाः काले वर्षन्तीति कालवर्षाः सन्तु। कालवर्षा इति त्रिषेनष्टहीतः पाठः। पुनः अखिलं सर्वं राष्ट्रं राज्यम् अपास्ताः विगताः ईतयः अनावृष्ट्यादयुपद्रवाः यस्मात् तत् यथा सम्पन्नयस्यं भवतु। लोके कवयः नित्यप्रमोदं सदानन्दकरम्

Digitized by Google

लोके नित्यप्रमोदं विदधतु कवयः श्लोकमात्मप्रसादं
संख्यावन्तोऽपि भूत्वा परकृतिषु मुदं संप्रधार्य प्रयान्तु ॥४२॥

विश्वा । एवमस्तु ।

[निष्क्रान्ताः सर्वे ।

इति सप्तमोऽङ्कः ।

समाप्तमिदं महावीरचितं नाम नाटकम् ।

आत्मप्रसादं स्वात्मतुष्टिं श्लोकं विदधतु । संख्यावन्तः पण्डिता अपि परेषां कृतिषु प्रबन्धेषु भूत्वा सातिशयं मुदं हर्षं सम्प्रधार्य प्रयान्तु ।

आसीन्मे दयितो भ्राता जानकीरामविश्रुतः ।
पित्रोः प्रियतरः पुत्रः प्राग्ज्योतिष्पुरनन्दनः ॥
अङ्के यस्य पुराहत्ते सम्पत्तिर्धर्मयोधनः ।
स्वस्मिन्न क्षिते कार्ये सदा प्रवर्धमानवः ॥
विंशत्याब्दे गतेऽस्मिन् वर्षे सम्पद्योन्मिते ।
दृष्ट्या जगतः कर्तुरनभिज्ञेवतर्क्यया ॥
अधिगोध्य समारब्धमेतिहासिकपुस्तकम् ।
यो यौवनं समासाद्य जगाम निदयावयम् ॥
तदीयचरणायैव व्याख्या तत्नामसंश्रिता ।
पदवाक्यप्रमाणस्य तत्त्वस्य कृतेः कृता ॥
चतुस्त्रिंशत्तमे वर्षे गतार्द्धे पूर्वभाषिते ।
आश्विने द्वादशे दिने पञ्चम्यां गुरुवासरे ॥
समाप्तिमगमदेषा, लौकीयं कल्पानवम् ।
विदुषः प्रार्थये चैतत् दोषः सर्वत्र क्षम्यताम् ॥

—०००—

Digitized by Google

अतिरिक्ताष्टीकाः ।

१. ४. महाव्रतादेश्च क्वचिदपि प्रविहृतम् । यथोक्तं स्कान्दे "तथा पुरुषतन्त्रं देवि महाव्रतादेवनं शुभम् । यतोऽसौ भीमकायाख्यः पार्षदस्तत्र-स्थतायतः ॥" इति ।

१. ७. यज्ञाग्नीनां विवरणं विस्तरेणोक्तं हरगीतसंहितायाम् । यथा "अहिताग्नेस्तु पतितत्वादि सार्हणस्य इति श्रुतेः । यजमानस्तु यज्ञात्तु दक्षिणात्तु गतिं नयेत् । दक्षिणाग्निं तदाकृत्य दक्षिणत्वात्त्रं हिजाः ॥ आहिताग्नेस्तेन होमस्तु यज्ञाद्यर्थेषु वर्तते । तेनाहवनीय-त्वं गतो वह्निर्महाद्युतिः ॥ आवसथ्यन्तु ये चाग्निं पचनाग्निं प्रच-क्षते । तेषां सभागतो वह्निः सभ्य इत्यभिधीयते ॥... जुह्वाद्यर्थत्वं यो भुवं नयति स द्विजः । जुह्वाद्यधिष्ठानाग्निं यः स नयत्यन्तरीक्ष-त्वम् ॥ पृथिवीमन्तरीक्षं वा दिवमन्यतमं सह । नयत्याहवनीयं यो जुह्वाद्यग्निमनाद्यं द्विजः ॥ यज्ञावसथ्ये जुह्वाद्यजुह्वाग्निं विधिवद्द्विजः । स च सप्तर्षिलोकेषु सपत्नीकः प्रमोदते ॥ यज्ञाद्युपाये सभ्यं वा विधि-वत् प्रयतात्मवान् । स नयेद्वा यमसभां..." तत्रैवोक्तम् "यज्ञादये स भूतानां सर्वेषां निर्मितो मया । तस्मादग्नीत्यभिहितं पुराणज्ञैर्मह-र्षिभिः ॥" इति ।

१. ८. "चतुर्भेदः परिव्राट् स्यात् कुटीचरबहूदकौ । हंसाः परम-हंसाश्च वक्ष्यन्ते ते पृथक् पृथक् ॥ ... एकदण्डधरा हंसाः शिखोप-वीतधारिणः । सर्वयज्ञो व्रतैर्हंसात्मध्याने सदा रताः ॥ एकदण्ड-धरा शुक्लाः कन्थाकौपीनवाससः । अक्षालनक्रियोन्मुक्ताः सर्वदैव च मौनिनः ॥ ... ये ते परमहंसा वै नैष्ठिका ब्रह्मनिष्ठयः ॥" इति हरि-त्यराचरसंहिता ।

Digitized by Google

१. २५. एव एव क्षत्रियब्रह्मचारी वेश्यः । यथोक्तं गौतमेन । ब्राह्मणक्षत्रियवैश्यब्रह्मचारिणां यथाक्रमेण मौञ्जीमौर्वीसौत्री मेखलाः, क्षणसारस्तवस्ताजिनानि वासांसि, वार्क्षमाक्षिक्षारिद्राण्यध्नोवासांसि, वैल्यपैप्पलपैलवा दण्डाः । एतन्मनुनाऽपि वर्णितम् । २. ४१–४५. ।

२. १२. "पुराणं ब्रह्मणा दृष्टं वचनं यत्तपस्थितम् । मानुषेभ्यो विज्ञानेहि भवमित्रेव तत्तथा ॥" इति रा०. ६. २७. ६. ।

---

१. २५. "न केवलिदात्मनाभ्यर्थमूर्मिरतिक्रमितव्येति" उ०. च०. ४. ।
२. ५६. "अक्षतवर्तिरिव चक्षुषोरतिशयानन्दमुत्पादयन्ती" मा०. मा०. १. ।
१. ८८. "आवां एव खल्वानर्थकारस्वरूपवेदी" बा०. रा०. ७. ।
१. १११. "एष्येहि वत्स रघुनन्दन रामचन्द्र चुम्बामि तेऽद्य वदनम्..." बा०. रा०. १०. ६५. ।
२. ७१. "वीराणां समयो हि दारुचरसः क्षेत्रक्रमं बाधते" उ०. च०. ५. १६. ।
क्षत्रियब्रह्मचारिणां पञ्चशिखत्वं शास्त्रसम्मतम् । यथोक्तं बौधायनेन "एकशिखस्त्रिशिखः पञ्चशिखो वा"
२. ८८. "विदग्धैर्निर्माल्यो न पुनरविदग्धैरतिशयः" उ०. च०. ४. २०. ।
२. ११२. "शाकप्रकारचिरेण रावणिः" बा०. रा०. ७. ८६. ।
३. ७. "भिद्येत किं सहृत्तमीदृशस्य निर्माल्यस्य ।" उ०. च०. ४. ।
५. २४. "अङ्गे वासीन्नकृति शिखरे स्टप्रराजस्य बाणः" मन्दु०.
२. २५ श्लोकात् प्रक्षवयो जटायुषो निवासभूरुदिति लभ्यते ।

५. २५. "नेवलादेव यद्यावलादपि विभाव्यते । गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥" उ०. च०. २. २४. । "गोदावरीः पवति वितनद्भाजलाभोवहन्तीः ... यत्र रम्यो वनान्तः ॥" उ०. च०. २. २५. ।

५. ७२. "यानीरप्रसवैर्निकुञ्जसरितामाकल्पवासं यवः" मा०.मा०. ९. १४. ।

५. ८८. अञ्चलापि कविना गर्जनार्थे गुञ्जदिति प्रयुक्तम् । यथा आदु-ञ्जद्विरिक्तुञ्जकुञ्जरघटाविस्तीर्णवर्षाम्बर-" उ०. च०. ५. ६. ।

६. ४२. "तर्हि खल्विनो गोऽदयत् यत्तद्वः" मा०. रा०. ७. ।

७. ७०. "कठिनकलनदम्भपङ्कजो वरीरपृक्वो" उ०. च०. ४. ।

Digitized by Google

SANSKRIT-ENGLISH GLOSSARY

OF

DIFFICULT TERMS.

[*N. B.*—the Roman numerls refer to the numbers of Acts and the Arabic to the numbers of notes.]

I. 2. स्वयं: (या, यं) : self-standing, self-existent.
I. 4. कालप्रियनाथ: : dear lord of time; Siva.
I. 5. प्रत्याधारं : in every character.
I. 6. वक्त्रवाच् (mfn.) : having command of language; eloquent; fluent.
I. 11. मुनिवरा : great sage.
I. 21. दिव्यमुनि : devine sage.
" " नाथित: (ता, तं) : blessed.
I. 28. अभ्युदयात: (ता, तं) : come out to meet, to receive.
I. 29. ब्रह्मपारायणं : the entire Veds.
I. 34. राजन्यदारक: : child of the royal tribe.
I. 48. अरिष्टतातिं : for a train of happiness; for continuous good fortune.
I. 50 संख्याय: : free conversation.
I. 52. वैकर्तनसुमार: : solar prince; prince of the solar dynasty.
I. 70. द्राक् : instantly; at once.
" " अवयवं : piece; portion.
I. 71. कलिल: (ला, लं) : mixed; confused.
I. 72. छर्दित: (ता, तं) : vomited; belched.
I. 77. स्त्रैणं : effiminacy; tenderness; compassion.
I. 80. उत्पातवाताखि: : portentous gale.
I. 86. प्रारंभ: : beginning; commencement.
I. 92. केतुव्रातखचित: (ता, तं) : flooded with assemblage of lights.
I. 96. प्राणप्रवन्त: (वा, वं) : spirited; powerful.

Digitized by Google

I. 98. धनिनेत्रः : lord of fortune (Kuvera).
I. 101. आ-वस् : to be dependent.
I. 103. निकायः : collection ; assemblage.
I. 107. उपस्थानदायिन् (f. नी) : giving attendance ; attending ; appearing.
I. 111. पुष्करं-कं : lotus.
I. 118. प्रतीतः (ता, तं) : accepted ; received.
I. 119. वैदेहः : king of Videha ; Janaka.
II. 3. अनुचरः : follower ; attendant.
II. 12. तर्कागमः (मा, मं) : inconceivable ; incomprehensible.
II. 24. प्र-पद् : to reach, get to.
II. 27. उत्पातुकामः (मा, मं) : wishing to rise ; seeking advancement.
II. 35. कुलचारिन् (f. णी) : court-goer ; palace-frequenter.
II. 39. परिधारणा : circumspection ; reflection.
II. 41. त्रिः सप्तकृत्वः : thrice seven times.
II. 51. परिजनः : attendant ; servant.
II. 58. उत्सिक्तः (क्ता, क्तं) : puffed up ; arrogant ; proud.
II. 65. परिसरणं : going round ; meeting.
II. 66. सन्तानं : flow ; diffusion.
II. 69. कृत्तान्तः : render ; destroyer.
II. 72. विग्रहः : injury ; break.
II. 74. आवर्जितः (ता, तं) : bent ; made partial ; gratified.
„ „ अन्तेवासिन् (f. नी) : living near ; pupil.
II. 78. क्रुरणी : practice.
II. 79. आभोगः : fulness ; excess.
II. 84. हेरम्बः : Ganesha.
„ „ विशाखः : Kartikeya, the general of the gods.
„ „ विशिखः : arrow.
II. 91. ब्रह्मकोशं : Vedic treasure.
„ „ निर्णीथं : essence.
II. 97. कलधरः : carrying the maraiage string.
II. 98. अम्बुतं : water.

Digitized by Google

II. 99. ऐतिह्य : traditional,–ly.
II. 102. परेद्यु : afterwards.
II. 103. सत्यातिथेय : : hospitable.
II. 104. सामन्त : neighbour ; neighbouring king.
II. 105. सनाथ : (था, थ) : having.
III. 1. प्रेयस् (f. सी) : very dear.
III. 2. सं-ज्ञप् : to kill, slaughter.
III. 6. ऋतध्वराभिधान : (ना, न) : called 'truth-holding' 'truthful'.
III. 12. सनाभि (mfn.) : cognate ; relative.
III. 21. अतिप्रसङ्ग : : imprudence ; arrogance.
III. 26. काण्डपृष्ठ : : bow-bearer ; apostate.
III. 30. धविष् : fan.
„ „ प्रणीत : (ता, त) : consecrated.
„ „ अभिघार : : sprinkling ; dropping.
„ „ तनूनपाद् (m.) : fire.
III. 33. मृ : to read.
III. 35. कुल्य : (ल्या, ल्य) : of *or* descended from a race.
III. 39. अन्त्रभेदन : splitting up intestines.
III. 40. शात : (ता, त) : whetted ; sharpened.
III. 44. विश्रक्षित : (ता, त) : cut to pieces.
„ „ क्ष्वेडीर : : froth.
III. 51. शास्तृ (f. त्री) : teacher.
„ „ निबर्हण : : destroyer.
III. 54. क्षुर् : to flash ; light up.
III. 60. विनेतृ (f. त्री) : chastiser ; controller.
III. 63. शोणित : blood.
IV. 7. वैमानिक : : aeronant ; god.
IV. 9. कान्तार : : defile ; bad road.
„ „ सवितृ (f. त्री) : sacrificer.
IV. 14. निदा : intrigue ; sowing dissensions.
IV. 16. हृतजानि : : one whose wife has deen abducted.
IV. 17. हरि : : monkey.

Digitized by Google

IV. 20. प्रत्यासत्तिः : contiguity ; nearness ; approach.
IV. 21. स्वापप्रसङ्गं : passion for sleep.
„ „ प्रति-जप् : to counterplot.
„ „ संरोधनं : confinement ; imprisonment.
IV. 25. भुक्तिः : possession ; enjoyment.
IV. 28. कुलतन्तुः : family thread ; support of a family ; child.
IV. 32. लोकोत्तरः (रा, रं) : superhuman.
IV. 36. परि-या : to go beyond ; transcend.
IV. 37. सनत्कुमारः : son of the eternal (God) ; Vasishtha.
IV. 39. अरिष्टः : enemy ; destroyer.
„ „ समनीकं : war.
IV. 42. तपत् (mfn.) : ascetic ; devotee.
IV. 44. दुर्योगः : altercation ; quarrel.
IV. 45. वि-सह् : to determine ; put down.
IV. 49. प्रजापालः : protector of people ; ruler ; king.
IV. 55. प्रेङ्खं धाम : resplendent light.
IV. 62. प्रत्यग्ज्योतिः : supreme light ; pure knowledge.
IV. 67 शरीरनिर्माणं : form of body ; features.
IV. 69. चीरधरः (रा, रं) : clad in bark.
IV. 73. त्रयी : the three ; the three Veds.
IV. 78. क्षीरकण्डः : suckling ; child.
IV. 85. तपनीयोपानत् : golden shoe.
IV. 91. प्रातःपवित्रं : morning purifier.
V. 2. कुलायः : nest ; aerie.
V. 3. ककुभ् (f.) : quarter ; direction.
„ „ संवर्तः : contraction.
„ „ वार्वोदयः : hill ; mount.
V. 4. उल्लोलः : surge ; billow.
„ „ वैकुण्ठवराहः . heavenly Boar.
V. 8. तपनः : heater ; the sun.
„ „ क्षोभः : burning ; conflagration.
V. 11. विप्रकर्षः : distance ; length.
V. 20. कर्षं : war ; battle.

Digitized by Google

v. 22. सपत्नः : enemy ; adversary.
v. 23. शिवातिपरिणतिः : maturity of flow of good ; propitious end.
v. 24. प्रथिमन् (m.) : largeness ; extent.
„ „ क्षेपीयस् : very quick.
v. 25. अनीकहः : tree.
v. 28. नैतलसद्मन् (m.) : chief of the lower world ; Yama.
v. 29. नैर्ऋतः : goblin ; giant ; fiend.
„ „ तुण्डं : mouth.
„ „ क्रकचं : saw.
„ „ कौकसं : bone.
„ „ कण्डरा : large vein.
v. 34. महामौक्ष (mfn.) : brilliant ; resplendent.
v. 37. कदनं : slaughter ; destruction.
v. 33. वाडवः : submarine fire.
v. 45. कूर्चशुष्कं : beard.
v. 52. वज्रकर्षणः : drawer of thunderbolt ; Indra.
v. 53. हेमगिरिः : golden mount ; Sumeru.
v. 55. योजनबाहुः : league-long-armed ; Danukavandha.
v. 56. सौहित्यं : proper union.
„ „ नलकः : long bone.
v. 68. संक्रन्दनः : Indra.
v. 70. वैश्वानरः : fire.
v. 73. अव्यक्तं : sputtered speech.
„ „ स्थानं : thickness ; gravity.
v. 75. ताण्डवं : dance.
„ „ तापिञ्छं : blossom of the xanthocymus pictorious.
v. 77. चामीकरं : gold.
v. 79. प्रसूनं : flower.
v. 80. रघुध्वजः : Banner of the Raghus ; Rama.
„ „ ग्रहः : pertinacity.
v. 82. चारकः : spy ; secret emissary.
v. 85. वैदग्ध्यं : satiety ; satisfaction.

Digitized by Google

v. 86. याढ: : pertinacity ; obstinacy.
v. 88. सांक्रन्दनि: : son of Indra ; Bali.
v. 90. करङ्कं : skull.
v. 91. महार्घ: (र्घा, र्घं) : valuable ; covetable.
v. 93. सर्वंकष: विपाक: : all-grinding fate.
v. 95. विवर्त्त: : freak ; caprice.
v. 96. प्रहाणं : quitting ; going out.
v. 107. उपस्थानं : standing by ; looking after.
„ „ युक्त – युक्ति: : inference ; deduction.
vi. 7. रौक्मालय: : golden edifice.
vi. 10. प्रवृत्ति: : news, tidings.
vi. 16. अभ्रंकष: (षा, षं) : cloud-grinding ; sky-touching.
„ „ प्रतीचा: (चा, चं) : venerable ; great.
vi. 21. पापधिषणा : wicked thought.
„ „ घस्राचि: : day-light.
vi. 22. अशोकवनिका : garden of joy.
vi. 24. कदम्बकं : assemblage ; collection.
„ „ डम्बरं : show ; beauty.
vi. 29. मृधभू: : battle-field.
„ „ प्रातिभाव्यं : state of counter-combatant ; equality in contest.
vi. 32. नक्रचक्रं : circle of crocodiles ; all the crocodiles.
„ „ पाथोमनुष्य: : water-man, sea-man.
vi. 34. वलीमुख: : monkey.
„ „ पाथोनाथ: : ocean.
vi. 35. भृ : to fill ; fill up.
vi. 36. प्रत्यग्रचतजं : fresh blood.
vi. 38. श्रुतिकवि: : Vedic poet ; Brahma.
„ „ खण्डपरशु: : Siva.
vi. 40. अश्मसार: : iron.
„ „ ययी : road.
„ „ निर्विषासु (mfn.) : innocent.
„ „ वीषधं : provisions.

Digitized by Google

VI. 42. कल्लोलः : surge, billow.
VI. 43. कीणपः : corpse-eater.
VI. 47. अवरोधनं : seraglio ; females of the haram.
VI. 48. इषुमुखं : arrow-head.
VI. 53. असृपः : blood-drinker ; fiend.
VI. 54. परिवृढः : chief.
„ „ वैष्टपः : god.
„ „ कारा : prison.
VI. 55. संवर्तः : destruction of the world.
„ „ विवर्त्तः : dancing.
„ „ युयुत्सा : intention of fighting.
VI. 56. अरुरं : door.
VI. 59. जनिः : birth.
„ „ आधिः : anguish ; anxiety.
VI. 62. हरित् (f.) : quarter.
VI. 63. बन्धुरः (रा, रं) : rugged.
„ „ प्रधनं : battle ; engagement.
„ „ प्रथः (था, थं) : first ; chief.
„ „ निष्णातः (ता, तं) : familiar ; conversant.
„ „ जीवा : bow-string.
VI. 65. अतिसन्धेयं तुमुलं : they are entering on tumultuous combat.
„ „ विपिनौकस् : monkey.
„ „ सरणिः : road ; path.
VI. 66. रुण्डः : headless body.
„ „ वर्ष्मन् (n.) : body.
„ „ कूटः : heap ; mount.
VI. 67. वृका : heart.
„ „ जिघत्सा : desire of eating.
VI. 68. हेतिः : weapon ; arms.
VI. 69. सर्ग : resolution ; determination.
VI. 70. कुलशिखरी : principal mountain.
VI. 72. प्रावर्भं : strength ; ability.

Digitized by Google

VI. 72. षट्षा: : five or six.
VI. 75. वृ : to cover, enclose.
VI. 80. क्ष्माधरेन्द्र: : great mountain.
VI. 80. प्रतिघ: : wrath, rage.
VI. 83. विहगपरिवृढ़: : chief of birds (Garuda.)
VI. 84. पृतना : army ; forces.
VI. 86. यातुधान: : fiend ; goblin.
VI. 87. प्राभञ्जनि: : son of wind ; Hanumàn.
VI. 91. नासीरचर: : front-fighter ; van-guard.
VI. 92. अन्धतमसं : blinding darkness.
VI. 94. चेड़ा : war-whoof ; battle-ery
VI. 96. आशुगजालं : arrows.
VI. 100. क्षौणी : earth.
VII. 13. निधानं : treasure ; wealth.
VII. 17. इन्द्रश्वस् (m.) : Indra.
VII. 18. कीलोल : slander.
VII. 24. अस्रं : eye-drop, tear.
VII. 25. काञ्चनचर: (रा, रं) : golden.
VII. 27. वैवस्वतनि: : son of sun ; Sugriva.
VII. 29. प्रत्या-हृ : to take back.
VII. 35. हरीकस् (m.) : monkey.
VII. 37. ऋजूर्जयु: : thunder.
„ „ क्षपा : night.
VII. 47. विचिचीषा : desire of searching.
VII. 55. सं-स्तु : to recognise, know.
VII. 58. एकपिङ्गाचल: : Kuvera's mount ; Kailàsha.
VII. 59. मराल: : goose ; swan.
VII. 66. क्ष्मा : earth.
VII. 77. राकासुधाकर: : full moon.
„ „ इन्दुकान्तोपल: : moon-stone.
VII. 84. ईति : calamity of season.
„ „ संख्यावत् (m.) : learned man.

Digitized by Google

CORRECTIONS.

3. 21. यस्य स (यस्य). 6. 6. पुवेण (पुवण). 14. 7. अूयन्त (अयन्त). 16. 23. दूषुधी (दूषधी). 17. 18. प्रियेषीपपदेन (प्रियेणीपदेव). 18. 24. ख्युट् (ख्युट). 22. 6. पुनरियं (पुनरीयं). 22. 20. दशरथात्मजः (दशरात्मजः). 38. 15. दूव (दूक). 41. 14. अवधी (अवधी). 46. 10. दलितेन्दु (दलितेन्द). 51. 3. इन्दीन (इन्दन). 52. 6. स्रीत्र (स्रोत्र); 17. विषयकः (विषयक); 18. गर्ग (गर्भ). 56. 4. स्रं (स्रं). 57. 7. सै (मे). 58. 2. स्वायम्भुवः (स्वायम्भगः). 63. 24. षड्वक्त्री (षड्वक्त्री). 66. 23. स्यात् (चेत्). 70. 7. द्योत्यते (द्योतते); 20. चरितानि (चरितानि). 71. 9. द्योत्यते उल्लासते। णिजन्तस्य कर्मणि रूपं (द्योतते उल्लासते). 72. 9. तत्परः (तपरः). 74. 5. कन्दड (कन्दम); 7. उद्भन्तासि (उद्वभन्तासि). 75. 15. अवभुग्नस्य (अवगुग्नस्य). 77. 22. वहन् (वहन्); 24. अतिदूर (अगदूर) 80. 6. साहसिच (साहसिचं); 20. साहसिक (साहसिकं). 82. 23. धारणाय (चारणाय). 83. 21. यस्य (यस्यं). 86. 23. पृथिव्यौ (क्षथिवी). 87. 21. कचुकितं (कचकितं). 91. 11. सचयः (सचःय); 25. याज्ञवल्क्यः (ख्। अयवक्यः). 94. 2. संहतः (संहतः); 10. क्रदसवन (दसवक्रन). 102. 24. अवि- (अव-). 106. 9. वने (वन). 112. 11. ऋचातिरिक्तं (ऋजतिरिक्तं); 16. चत्रियसेवकस्येति भावः after रचितस्य. 113. 6. भार्गव (भार्गवः). 115. 18. किंचत्रियः (किं चत्रियः). 118. 13. डिण्डीरस्य फेनस्य (फेनस्य डिण्डीरस्य). 119. 11. चतुर्णां (चतुर्णां). 122. 20. मिलिताः after उपस्थिताः; 22. अल्प इव द्वाविंशः धीरः परिमरः वधः असु एकविंशतिवारान्तु निहतमेव before चचमिति भावः. 126. 8. कीखास (कीलास). 128. 4. विरूविदं (विरूविदं); 7. तस्या (तस्यां). 134. 9. संरोधन (सरोधन). 139. 23. उपादानं (उपादान). 140. 20. वाङ्मनसयोः (वाङ्मनसीः). 143. 11. तपतां (तपसां). 151. 13. ३ (७). 154. 13. रथे (रथै). 155. 13. काल (वाल). 156. 21. सप्रमादस्य (प्रमादस्य). 157.

Digitized by Google

20. ममानुग (ममानुज.); वृषो (वृषा). 64. 3. स्यू (स्यू). 171. 17. किल (किम). 177. 16. कथमिव (कथमपि). 178. 14. प्रथिमा (प्रथिमता). 182. 17. व्यञ्जितं (व्याञ्जितं). 203. 16. निज्ञान् (विज्ञान्). 204. 11. ४९ (४८); 12. सत्यं (सत्यं). 212. 22. मर्यादा (मर्यादां). 214. 9. स्व (स्व). 215. 19. अवधीर्यं (आवधीर्यं). 217. 4. याच्ञाङ्गुरो (याच्ञाङ्करो). 218. 12. २५ (२). 219. 4. कपिपुङ्गवा (कपिपुङ्गवा). 221. 19. मारुतात्मज: (मारुतात्मगः). 222. 19. विविध (विविध). 223. 16. दौचा (दौत्या) 224. 13. अविमृष्य- (अवमृष्य-). 228. 9. राघकन्या (राघवकन्यां). 229. 3. रिक्तवक्त्रा (रिक्तवक्त्रया). 230. 1. सुगी (सुगी). 233. 12. इत्येव (इत्येवं). 234. 21. निष्कलसा: (निष्कलमसाः). 235. 1. मैपथेऽहं (मैपथेऽह्न); 2. पढ़ीहार (पढ़ाहार). 244. 17. रा०. ७ (रा० ३.) 252. 7. चित्रं (किंच). 266. 10. वहि (वह्नि). 267. 4. वक्त्रं (वक्त्रं). 279. 17. कवन्ध (कावन्ध). 296. 14. निर्यूढं (विन्यूढं). 297. 7. चरितं (चितं).

---

1. 4. rals (rls); 12. divine (devine). 2. 33. marriage (maraige). 3. 29. aeronaut (aeronant); 33. been. (deen).

I. 23. vowel (vowal). IV. 13. Charana (charana). X. 19. been (deen).

Digitized by Google

BY THE SAME AUTHOR

An English-Sanskrit Dictionary. Vol. I. A to Falseness. Pages 580 and xx. and 9. Price 12 Rs. Agents:—KHETROMOHAN MUKHERJEA, 49 *Mechua Bazar Road, Calcutta;* WYMAN AND Co., 10 *Hare Street, Calcutta;* GANTZ BROTHERS, 7 and 8 *Mount Road, Madras;* THACKER AND Co., *Bombay;* TRUBNER AND Co., *London* :—

"Your work is evidently not simply a Sanskrit-English Dictionary mechanically inverted, but you have treated each word independently, and by giving the nearest approach to each English word in Sanskrit, you have shewn your familiarity with the idioms of both languages. The passages from Sanskrit writers, illustrative of the employment of Sanskrit words, are extremely useful and give to your work a really scholarlike character" Extract from a letter from Professor MAX MULLER, *dated Oxford the 31st December* 1875.

"Mr. Anondoram Borooah has undertaken a gigantic task—an English-Sanskrit Dictionary, and he deserves all praise for the patience and perseverance with which he is pursuing it. We have the first volume of the great work before us; it has been prepared with much care and labor." THE HINDU PATRIOT, *dated August 6th* 1877.

"Mr. Anondoram Borooah has shown that his mastery of western thought by no means disqualifies him for the most minute and painstaking study of the ancient literature of his native land. At the same time, he has learnt in the west that the object of all study is enlightment, not obscuration; and he is not ashamed to furnish Mlecchas with the means of clothing this barbarous ideas in elegant Sanskrit. Now that the importance of the language which is the only key to Hindu customs and Hindu ideas is thoroughly recognised in Europe, we may anticipate that Mr. Borooah's work will obtain all the recognition it deserves. It seems to us to be far more perfect in its way than the English-Greek vocabularies which aided or rather worried, the students of twenty years ago....."Writing makes an accurate man," in Sanskrit as in every other language; and those who wish to acquire an accurate knowledge of Sanskrit cannot do better than provide themselves with Mr. Anondoram Borooah's work." (THE ENGLISHMAN *the 6th August* 1877).

Digitized by Google